श्री धर्मबिन्दु-
प्रकरणम्

।। १ ।।

सूरिपुरंदर-याकिनीमहत्तराधर्मसूनु-श्रीहरिभद्रसूरिविरचितं श्रीमुनिचन्द्रसूरिविरचितवृत्तिसमलङ्कृतं

# धर्मबिन्दुप्रकरणम्

संपादक

न्यायविशारद पूज्यपाद आचार्यदेव श्रीमद् विजय चन्द्रगुप्तसूरीश्वरजी महाराजा

प्रकाशक
श्री जिनाज्ञा प्रकाशन
हितेशभाइ जे. शाह
१/२०२, निर्मल एपार्टमेन्ट, एच.डी.एफ.सी. बेन्कनी बाजुमां
सयाजी रोड, नवसारी - ३९६४४५ (गुजरात)

।। १ ।।

श्री धर्मबिन्दु-
प्रकरणम्




ग्रन्थ : श्रीधर्मबिन्दुः ( सटीकम् )

कर्ता : पूज्यपाद आ. भ. श्री हरिभद्रसूरीश्वरजी महाराजा

टीकाकार : पू. आ. भ. श्री मुनिचन्द्रसूरीश्वरजी महाराजा

प्रथमावृत्ति : वि.सं. २०७४

नकल : ५००

: प्राप्तिस्थान :

मुकुंदभाइ रमणलाल शाह
२०१, नवरत्न एपार्टमेन्ट, अन्नपूर्णा होलनी सामे,
नवा विकासगृह मार्ग, पालडी, अमदावाद-
३८०००७.
मो. ९९०९४ ३१३६२

जतीनभाइ हेमचंद शाह
'कोमल' छापरीया शेरी,
महीधरपुरा, सुरत-३९५००३.
मो. ९८७९५ ४५८८०

मुनीशभाइ एस. वखारिया
सी/५३, सर्वोदयनगर, पांजरापोळ
रोड, मुंबइ-४००००४.
मो. ९३२२२ २२९८०

तनील ए. वोरा
४/७४, कृष्णकुंज, जुना पुलगेट पासे, २३९२/९३, जनरल थीमैया रोड, पुना-४११००१.
मो. ९८२३० २९८८०


॥ २ ॥

# सुकृतना सहभागी

न्यायविशारद पूज्यपाद आचार्यदेव श्रीमद् विजय चन्द्रगुप्तसूरीश्वरजी महाराजाना सदुपदेशथी
लींचनिवासी कपूरभाइ रतिलाल शाह परिवार तरफथी श्री धर्मबिन्दु प्रकरण ग्रन्थरत्नना
प्रकाशननो लाभ लेवामां आव्यो छे | जेनी खूब खूब अनुमोदना करीए छीए |
भविष्यमां पण आ परिवार श्रुतभक्ति आदि सुकृतनो लाभ लेतो रहे तेवी हार्दिक शुभकामना |

-श्री जिनाज्ञा प्रकाशन

# धर्मबिन्दुप्रकरणस्य सवृत्तिकस्य विषयानुक्रम :


| धर्मबिन्दुप्रकरणम् | पृष्ठांक |
|---|---|
| **प्रथमोऽध्याय :** | |
| मङ्गलाचरणम् | २ |
| धर्मस्य फलं स्वरूपं भेदौ च | ४ |
| सामान्यतो गृहस्थधर्मः | ८ |
| न्यायसम्पन्नविभवनिरूपणम् | ९ |
| योग्यविवाहनिरूपणम् | १६ |
| अष्टौ विवाहभेदाः | १८ |
| दृष्टादृष्टबाधाभीतता शिष्टचरितप्रशंसा इन्द्रियजयः | १९ |
| उपप्लुतस्थानत्याग-स्वयोग्याश्रयण-साधुपरिग्रहाः | २२ |
| योग्यगृहवर्णनम् | २४ |
| उचितवेष - व्ययनिरूपणम् | २७ |
| देशाचारपालनम् अनुचितप्रवृत्ति - अवर्णवाद- अनुचित-संसर्गत्यागाः | २८ |
| मातापितृपूजा, उद्वेगकारकप्रवृत्तित्यागः | ३१ |
| पोष्यपोषणम् | ३४ |
| देवातिथिदीनप्रतिपत्तिः | ३७ |
| भोजनविधिः | ३९ |
| अदेशकालचर्यापरिहारः, लोकयात्रा | ४२ |
| अतिसङ्गत्यागः, वृत्तस्थज्ञानवृद्धसेवा, त्रिवर्गप्रतिपत्तिः | ४३ |
| प्रत्यहं धर्मश्रवणम्, अभिनिवेशत्यागः | ४९ |
| गुणपक्षपातः, अष्टौ धीगुणाः | ५० |

धर्मस्यैव करणीयत्वम् ५२

## द्वितीयोऽध्याय : ( विशेषतो गृहस्थधर्मविधि : )

धर्मदेशनार्ह : ५५
धर्मदेशना विधिः ५७
आक्षेपणीकथास्वरूपम् ६१
ज्ञानाद्याचाराः ६२
आचारपालनफलम् ७०
असदाचारनिन्दा - तत्स्वरूप - फलादि ७२
सज्ज्ञान - पुरुषकारप्रशंसादि ७८
श्रुतधर्मपरीक्षायां कष-च्छेद-तापप्ररूपणम् ८२
वरबोधिलाभप्ररूपणा, उपसंहारः १०२

## तृतीयोऽध्याय :

विशेषतो गृहस्थधर्मनिरूपणे सद्धर्मग्रहणार्हः, १११
धर्मप्रदानविधिः-आदौ सम्यग्दर्शनमनन्तरमणुव्रतादिदानं ११७
गृहपतिपुत्रमोक्षज्ञातम् १२०
विधिस्वरूपम् १२६
अणुव्रतादिस्वरूपम् १२७
अतिचारस्वरूपं तद्भेदाश्च १३१
अतिचारजयोपायः १६५
अत्यन्तमुपयोगिनी हितशिक्षा (कर्तव्योपदेशः) १६६
गृहस्थधर्मोपसंहारः १९१

## चतुर्थोऽध्याय :

यतिः कथं भवतीत्यस्य वर्णनम् १९३

| | |
|---|---|
| यतिवर्णनाधिकारे प्रव्रज्यार्हस्य गुणाः | १९६ |
| गुरुपदार्हस्य गुणाः | १९७ |
| गुणसङ्ख्याविषये वायुप्रभृतिप्रवादिनां मतानि | २०० |
| प्रव्रज्यादानविधिः | २०८ |
| प्रव्रज्याग्रहणविधिः | २१० |
| प्रव्राजकगतो विधिः | २१६ |
| उपसंहारः | २२१ |

**पञ्चमोऽध्याय :**

| | |
|---|---|
| यतित्वस्य फलमुपायश्च | २२३ |
| सापेक्ष-निरपेक्षयतिभेदेन यतिधर्मद्वैविध्यम् | २२४ |
| सापेक्षयतिधर्मस्वरूपम् | २२५ |
| त्रिविधा भिक्षा | २२८ |
| अप्रव्राज्याः | २३८ |
| ब्रह्मचर्यस्य नव गुप्तयः | २४३ |
| निरपेक्षयतिधर्मस्वरूपम् | २६२ |
| यतिधर्माराधनफलम् | २६५ |

**षष्ठोऽध्याय :**

| | |
|---|---|
| सापेक्ष-निरपेक्षयतिधर्मयोर्विषयविभागः | २६८ |
| उचितानुष्ठानस्य श्रेयस्करत्वम् | २७२ |
| त्रिविधे ज्ञाने भावनामयज्ञानस्य तात्त्विकत्वम् | २८५ |
| भगवत्स्मरणस्य फलम् | २८८ |
| अकालौत्सुक्यं त्यक्तव्यम् | २९० |
| क्वचित् प्रवृत्तिमात्रमपि गोविन्दवाचकादीनामिव सफलम् | २९२ |
| उपदेशसाफल्यम् | २९६ |

मासादिपर्यायवृद्ध्या सुखाभिवृद्धिः ३०२

**सप्तमोऽध्याय :**

विस्तरेण यतिधर्मफलवर्णनम् ३०४
अनन्तरफलम् ३०५
परम्पराफलम् ३०६
परिणामस्यैव बन्धकारणत्वं मोक्षकारणत्वं च ३१८
सर्वं शुभं धर्मस्य फलम् ३२२

**अष्टमोऽध्याय :**

शेषमुदग्रं धर्मफलम् ३२६
सामान्यचरमजन्मनि धर्मफलम् ३२७
क्षपकश्रेणिनिरूपणम् ३२८
तीर्थकरातीर्थकरयोः साधारणं धर्मफलम् ३३३
तीर्थकृत्त्वलक्षणधर्मफलवर्णनम् ३३५
मोक्षसुखस्य निरुपमत्वम् ३३९
मूलग्रन्थसमाप्तिः ३५३

J, J1 = जेसलमेर ग्रंथभंडार
K, K1 = खंभात श्री शांतिनाथ ज्ञानभंडार
L = लालभाई दलपतभाई भारतीय संस्कृति विद्यामंदिर
D = मुक्ताबाई ज्ञानमंदिर - डभोई



सूरिपुरन्दर-याकिनीमहत्तराधर्मसूनु-श्रीहरिभद्रसूरिविरचितं
श्रीमुनिचन्द्रसूरिविरचितवृत्तिसमलङ्कृतं

# धर्मबिन्दुप्रकरणम् ।

## ॐ नमः सर्वज्ञाय । प्रथमोऽध्यायः ।

शुद्धन्यायवशायत्तीभूतसद्भूतसम्पदे। पदे परे स्थितायाऽस्तु श्रीजिनप्रभवे नमः ॥१॥

जयन्तु ते पूर्वमुनीशमेघा यैर्विश्वमाश्वेव हतोपतापम्। चक्रे बृहद्वाङ्मयसिन्धुपानप्रपन्नतुङ्गातिगम्भीररूपैः ॥२॥

यन्नामानुस्मृतिमयमयं सज्जनश्चित्तचक्षुः-क्षेपाद्दिव्याञ्जनमनुसरँल्लब्धशुद्धावलोकः।

सद्यः पश्यत्यमलम[1]तिहृन्मेदिनीमध्यमग्नं, गम्भीरार्थं प्रवचननिधिं भारतीं तां स्तवीमि ॥३॥

विदधामि धर्मबिन्दोरतिविरलीभूतगर्भपदबिन्दोः। भव्यजनोपकृतिकृते यथावबोधं विवृ[2]तिमेताम् ॥४॥

१. अमलमतिहृदयमेदिनीमध्यमग्नम् इत्यर्थः ॥ २. तिमेनां K ॥

प्रणम्य परमात्मानं समुद्धृत्य श्रुतार्णवात्। धर्मबिन्दुं प्रवक्ष्यामि तोयबिन्दुमिवोदधेः ॥१॥

इति।

प्रणम्य प्रकर्षेण नत्वा, वन्दन-स्तवना-ऽनुचिन्तनादि-प्रशस्तकाय-वाङ्-मनोव्यापारगोचरभावमुपनीय। कमित्याह-परमात्मानम्, अ[१]तति सततमेव अपरापरपर्यायान् गच्छतीति आत्मा जीवः, स च द्विधा परमोऽपरमश्च, तत्र परमो यः खलु निखिलमलविलयवशोपलब्धविशुद्धज्ञानबलविलोकितलोकालोको जगज्जन्तुचित्तसन्तोष-कारणपुरन्दरादिसुन्दरसुरसमूहाह्नियमाण-प्रातिहार्यपूजोपचारस्तदनु सर्वसत्त्वस्वभाषापरिणामिवाणीविशेषापादितैक-कालानेकसत्त्वसंशयसन्दोहापोहः स्वविहार-पवन-प्रसरसमुत्सारितसमस्तमहीमण्डलातिविततदुरितरजोराशिः सदाशिवादिशब्दाभिधेयो भगवानर्हन्निति स परमः, तदन्यस्तु अपरमः, ततोऽपरमात्मव्यवच्छेदेन परमात्मानं प्रणम्य, किमित्याह - समुद्धृत्य, सम्यगुद्धारस्थानाविसंवादिरूपतया उद्धृत्य - पृथक्कृत्य श्रुतार्णवाद् अनेकभङ्गभङ्ग-

१ ''अत सातत्यगमने'' - पा.धा. ३८, हैमधा. २७९॥

रावर्त्तगर्त्तगहनादतिविपुलनयजालमणिमालाकुलाद् मन्दमतिपोतजन्तुजातात्यन्तदुस्तरादागमसमुद्राद् धर्मबिन्दुं वक्ष्यमाणलक्षणं धर्मावयवप्रतिपादनपरतया लब्धयथार्थाभिधानं धर्मबिन्दुनामकं प्रकरणं प्रवक्ष्यामि भणिष्यामि, कमिव कस्मात् समुद्धृत्येत्याह - तोयबिन्दुमिव जलावयववद् उदधेर्दुग्धोदधिप्रभृतेर्जलराशेरिति, अत्र च तोयबिन्दुमिवोदधेरिति बिन्दूपमेयतास्य प्रकरणस्य सूत्रसङ्क्षेपापेक्षया भणिता, अन्यथाऽर्थापेक्षया कर्पूरजलबिन्दोरिव कुम्भादिजलव्यापनन्यायेन समस्तधर्मशास्त्रव्यापकताऽस्येति । इह प्रणम्य परमात्मानमित्यनेन विघ्नापोहहेतुः शास्त्रमूलमङ्गलमुक्तम्, परमात्मप्रणामस्य सकलाकुशलकलापसमूलोन्मूलकत्वेन भावमङ्गलत्वात्। धर्मबिन्दुं प्रवक्ष्यामीत्यनेन तु अभिधेयम्, धर्मलेशस्यात्राभिधास्यमानत्वाद्, अभिधानाभिधेयलक्षणश्च सामर्थ्यात् सम्बन्धः, यतो धर्मबिन्दुरिहाभिधेयः, इदं च प्रकरणं वचनरूपापन्नमभिधानमिति। प्रयोजनं च प्रकरणकर्तुरनन्तरं सत्त्वानुग्रहः, श्रोतुश्च प्रकरणार्थाधिगमः,परम्परं तु द्वयोरपि मुक्तिः, कुशलानुष्ठानस्य निर्वाणैकफलत्वादिति ॥१॥धर्मबिन्दुं प्रवक्ष्यामीत्युक्तम्, अथ धर्मस्यैव हेतुं स्वरूपं फलं च बिभणिषुः 'फलप्रधानाः प्रारम्भा मतिमतां

भवन्ति' इति फलमेवादौ, तदनु हेतुशुद्धिभणनद्वारेण धर्मस्वरूपं चोपदर्शयन्निदं श्लोकद्वयमाह --

**धनदो धनार्थिनां प्रोक्तः कामिनां सर्वकामदः । धर्म एवापवर्गस्य पारम्पर्येण साधकः ॥२॥**

**वचनाद्यदनुष्ठानमविरुद्धाद्यथोदितम् । मैत्र्यादिभावसंयुक्तं, तद्धर्म इति कीर्त्यते ॥३॥** इति ।

धनं धान्य-क्षेत्र-वास्तु-द्विपद-चतुष्पदभेदभिन्नं हिरण्य-सुवर्ण-मणि-मौक्तिक-शङ्खशिला-प्रवालादिभेदं च धनपतिधनर्द्धि-प्रतिस्पर्धि तीर्थोपयोगफलं ददाति प्रयच्छति यः स तथा, धनार्थिनां धनमन्तरेण गृहिणो न किञ्चिदिति बुद्ध्या धनविषयातिरेकस्पृहावतां प्रोक्तः शास्त्रेषु निरूपितः, धर्म एवेत्युत्तरेण योगः, तथा कामिनां कामाभिलाषवतां प्राणिनाम्, काम्यन्ते इति कामा मनोहरा अक्लिष्टप्रकृतयः परमाह्लाददायिनः परिणाम-सुन्दराः शब्द-रूप-रस-गन्ध-स्पर्शलक्षणा इन्द्रियार्थाः, ततः सर्वे च ते कामाश्च सर्वकामाः, तान् ददातीति सर्वकामदः । इत्थमभ्युदयफलतया धर्ममभिधाय निःश्रेयसफलत्वेनाह - धर्म एव नापरं किञ्चित्, अपवृज्यन्ते-उच्छिद्यन्ते जातिजरामरणादयो दोषा अस्मिन्नित्यपवर्गो मोक्षः, तस्य, पारम्पर्येण अविरतसम्यग्दृष्टिगुणस्थानाद्यारोहणलक्षणेन सुदेवत्व-मनुष्यत्वादिस्वरूपेण

वा साधकः सूत्रपिण्ड इव पटस्य स्वयं परिणामिकारणभावमुपगम्य निर्वर्त्तक इति ॥२॥

उच्यते इति वचनमागमः, तस्मात्, वचनमनुसृत्येत्यर्थः, यदित्यद्याप्यनिरूपितविशेषमनुष्ठानम् इहलोकपरलोकावपेक्ष्य हेयोपादेययोरर्थयोरिहैव शास्त्रे वक्ष्यमाणलक्षणयोर्हानोपादानलक्षणा प्रवृत्तिस्तद् धर्म इति कीर्त्यते इत्युत्तरेण योगः, कीदृशाद्वचनादित्याह - अविरुद्धाद् निर्देक्ष्यमाणलक्षणेषु कष-च्छेदतापेषु अविघटमानात्, तच्चाविरुद्धं वचनं जिनप्रणीतमेव, निमित्तशुद्धेः। वचनस्य हि वक्ता निमित्तमन्तरङ्गम्, तस्य च राग-द्वेषमोहपारतन्त्र्यमशुद्धिः, तेभ्यो वितथवचनप्रवृत्तेः, न चैषा अशुद्धिर्जिने भगवति, जिनत्वविरोधात् । जयति राग-द्वेष-मोहस्वरूपानन्तरङ्गान् रिपूनिति जिन इति शब्दार्थानुपपत्तेः, तपनदहनादिशब्दवदन्वर्थतया चास्याभ्युपगमात् । निमित्त-शुद्ध्यभावान्नाजिनप्रणीतमविरुद्धं वचनम्, यतः कारणस्वरूपानुविधायि कार्यम्, तन्न दुष्टकारणारब्धं कार्यमदुष्टं भवि-तुमर्हति, निम्बबीजादिवेक्षुयष्टिरिति, अन्यथा कारणव्यवस्थोपरमप्रसङ्गात् । यच्च यदृच्छाप्रणयनप्रवृत्तेषु तीर्थान्तरीयेषु रागादिमत्स्वपि घुणाक्षरोत्किरणव्यवहारेण क्वचित् किञ्चिदविरुद्धमपि वचनमुपलभ्यते मार्गानुसारिबुद्धौ वा प्राणिनि

क्वचित् तदपि जिनप्रणीतमेव, तन्मूलत्वात् तस्य। न च वक्तव्यं 'तर्हि अपौरुषेयं वचनमविरुद्धं भविष्यति', कुतः? यतस्तस्यापौरुषेयत्वे स्वरूपलाभस्याप्यभावः, तथाहि-उक्तिर्वचनम्, पुरुषव्यापारानुगतं रूपमस्य, पुरुषक्रियायास्ताल्वोष्ठादिव्यापाररूपाया अभावे कथं वचनं भवितुमर्हति? किञ्च एतदपौरुषेयं न क्वचिद् ध्वनदुपलभ्यते, उप[1]लम्भेऽप्यदृश्यपिशाचादेर्वक्तुराशङ्काऽनिवृत्तेः- मा[2] न तेन तद् भाषितं स्यात्। ततः कथं तस्मादपि मनस्विनां सुनिश्चिता प्रवृत्तिः प्रसूयत इति? कीदृशमनुष्ठानं धर्म इत्याह-यथोदितं यथा येन प्रकारेण कालाद्याराधनानुसाररूपेणोदितं प्रतिपादितं तत्रैवाविरुद्धे वचने, अन्यथा प्रवृत्तौ तु तद्द्वेषित्वमेवापद्यते, न तु धर्मः, यथोक्तम्-

त[3]त्कारी स्यात् स नियमात् तद्द्वेषी चेति यो जडः। आगमार्थे तमुल्लङ्घ्य तत एव प्रवर्त्तते ॥१॥[4]

---

१. उपलम्भे अदृस्यपिशाचादे J॥ २ मा तेन K ॥ ३. तत्कारी च स J. ॥

४ धर्मबिन्दुवृत्तावुद्धृतानां पद्यानां पद्यार्धादीनां वा क्रमेण सङ्ख्यासूचकोऽयमङ्क इति सर्वत्रावसेयम् ॥

[योगबिन्दौ २४०] इति।

पुनरपि कीदृशमित्याह-मैत्र्यादिभावसंयुक्तम्, मैत्र्यादयो मैत्री-प्रमोद-करुणा-माध्यस्थ्यलक्षणा ये भावा अन्तःकरणपरिणामाः, तत्पूर्वकाश्च बाह्यचेष्टाविशेषाः सत्त्व-गुणाधिक-क्लिश्यमाना-ऽविनेयेषु, तैः संयुक्तं सम्मि[१]लितं मैत्र्यादिभावानां निःश्रेयसाऽभ्युदयफलधर्मकल्पद्रुममूलत्वेन शास्त्रान्तरेषु प्रतिपादनात्। तदेवंविधमनुष्ठानं धर्म इति दुर्गतिपतज्जन्तुजातधरणात् स्वर्गादिसुगतौ आधानाच्च धर्म इत्येवंरूपत्वेन कीर्त्यते शब्द्यते सकलाकल्पितभावकलापाऽऽकलनकुशलैः सुधीभिरिति। इदं चाविरुद्धवचनादनुष्ठानमिह धर्म उच्यते उपचारात्, यथा नड्वलोदकं पादरोगः, अन्यथा शुद्धानुष्ठानजन्या कर्ममलापगमलक्षणा सम्यग्दर्शनादिनिर्वाणबीजलाभफला जीवशुद्धिरेव धर्मः ॥३॥

अथामुमेव धर्मं भेदतः प्रभेदतश्च बिभणिषुराह-

**सोऽयमनुष्ठातृभेदाद् द्विविधः - गृहस्थधर्मो यतिधर्मश्च ॥१॥ इति।**

१ संमीलितं J. ॥

स यः पूर्वं प्रवक्तुमिष्टः, अयं साक्षादेव हृदि विवर्त्तमानतया प्रत्यक्षः, अनुष्ठातृभेदाद् धर्मानुष्ठायकपुरुषविशेषाद् द्विविधो द्विप्रकारो धर्मः, प्रकारावेव दर्शयति - गृहस्थधर्मो यतिधर्मश्चेति । गृहे तिष्ठतीति गृहस्थः, तस्य धर्मो नित्य-नैमित्तिकानुष्ठानरूपः। यः खलु देहमात्रारामः सम्यग्विद्यानौलाभेन तृष्णासरित्तरणाय योगाय सततमेव यतते स यतिः, तस्य धर्मो गुर्वन्तेवासिता तद्भक्तिबहुमानावित्यादिर्वक्ष्य[१]माणलक्षणः ॥१॥ तत्र च-

**गृहस्थधर्मोऽपि द्विविधः- सामान्यतो विशेषतश्च ॥२॥ इति ।**

गृहस्थधर्मोऽपि उक्तलक्षणः, किं पुनः सामान्यतो धर्म इत्यपिशब्दार्थः, द्विविधो द्विभेदः, द्वैविध्यमेव दर्शयति-सामान्यतो नाम सर्वशिष्टसाधारणानुष्ठानरूपः, विशेषतो विशेषेण सम्यग्दर्शनाऽणुव्रतादिप्रतिपत्तिरूपः, चकार उक्तसमुच्चये इति ॥२॥

तत्राद्यं भेदं शास्त्रकृत् स्वयमेवाध्यायपरिसमाप्तिं यावद् भावयन्नाह-**तत्र सामान्यतो गृहस्थधर्मः-**

---

१ पञ्चमेऽध्याये ५। ३,४॥

**(१) कुलक्रमागतमनिन्द्यं विभवाद्यपेक्षया न्यायतोऽनुष्ठानम्॥३॥ इति ।**

तत्र तयोः सामान्य-विशेषरूपयोर्गृहस्थधर्मयोर्वक्तुमुपक्रान्तयोर्मध्ये सामान्यतो गृहस्थधर्मोऽयम् - यथा कुलक्रमागतं पितृ-पितामहादिपूर्वपुरुषपरम्परासेवनाद्वारेण स्वकालं यावदायातम्, अनुष्ठानमित्युत्तरेण योगः, पुनः कीदृशं तदित्याह - अनिन्द्यम्, निन्द्यं तथाविधपरलोकप्रधानसाधुजनानामत्यन्तमनादरणीयतया गर्हणीयं यथा सुरासन्धानादि, तन्निषेधादनिन्द्यम्, तथा विभवाद्यपेक्षया विभवं स्वकीयमूलधनरूपमादिशब्दात् सहाय-काल-क्षेत्रादिबलं चापेक्ष्य न्यायतो न्यायेन शुद्धमानतुलोचितकलाव्यवहारादिरूपेण आसेवनीयावसरोचिताराधनादिरूपेण च अनुष्ठानं वाणिज्य-राजसेवादिरूपम्, इदमुक्तं भवति-सर्वसाधुसम्मतन्यायप्रधानस्य स्वविभवतृतीयभागादिना व्यवहारमारभमाणस्य राजसेवादौ च तदुचितक्रमानुवर्त्तिनः कुलक्रमायातानिन्द्यानुष्ठानस्य अत्यन्तनिपुणबुद्धेरत एव सर्वापायस्थानपरिहारवतो गृहस्थस्य धर्म एव स्यात्, दीनानाथाद्युपयोगयोग्यतया धर्मसाधनस्य विभवस्योपार्जनं प्रति प्रतिबद्धचित्तत्वादिति। यच्चाऽऽदावेवानिन्द्यानुष्ठानस्य गृहस्थसम्बन्धिनो धर्मतया शास्त्रकारेण निदर्शनमकारि तद् ज्ञापयति निरनुष्ठानस्य

निर्वाहविच्छेदेन गृहस्थस्य सर्वशुभक्रियोपरमप्रसङ्गादधर्म एव स्यादिति, पठ्यते च-

*वित्तीवोच्छेयंमि गिहिणो सीयंति सव्वकिरियाओ। निरवेक्खस्स उ जुत्तो संपुण्णो संजमो चेव ॥२॥ [ पञ्चा. ४/७]* ॥३॥ अथ कस्मादू न्यायत इत्युक्तमिति, उच्यते-

**न्यायोपात्तं हि वित्तमुभयलोकहिताय ॥४॥ इति ।**

न्यायोपात्तं शुद्धव्यवहारोपार्जितं हिर्यस्माद् वित्तं द्रव्यं निर्वाहहेतुः, किमित्याह-उभयलोकहिताय, उभयोः इहलोक-परलोकरूपयोर्लोकयोर्हिताय कल्याणाय सम्पद्यते ॥४॥

एतदपि कुतः? इत्याह --

**अनभिशङ्कनीयतया परिभोगाद् विधिना तीर्थगमनाच्च ॥५॥ इति ।**

इहान्यायप्रवृत्तौ पुरुषस्य द्विविधा अभिशङ्कनीयता-भोक्तुर्भोग्यस्य च विभवस्य, तत्र भोक्तुः 'परद्रव्यद्रोहकार्ययम्' इत्येवं दोषसम्भावनलक्षणा, भोग्यस्य पुनः 'परद्रव्यमिदमित्थमनेन भुज्यते' इत्येवंरूपा,

ततस्तत्प्रतिषेधेन या अनभिशङ्कनीयता, तया उपलक्षितेन भोक्त्रा परिभोगात् स्नान-पाना-ऽऽच्छादना-ऽनुलेपनादिभिः भोगप्रकारैरात्मना मित्र-स्वजनादिभिश्च सह विभवस्योपजीवनात्, अयमत्र भावः - न्यायेनोपार्जितं विभवं भुञ्जानो न केनापि कदाचित् किञ्चिदभिशङ्क्यते, एवं चाव्याकुलचेतसः प्रशस्तपरिणतेरिहलोकेऽपि महान् सुखलाभ इति, परलोकहितत्वं च विधिना सत्कारादिरूपेण, तीर्यते व्यसनसलिलनिधिरस्मादिति तीर्थं पवित्रगुणपात्रपुरुषवर्गो दीनानाथादिवर्गश्च, तत्र गमनं प्रवेश उपष्टम्भकतया प्रवृत्तिर्वित्तस्य तीर्थगमनम्, तस्मात्, चकारः समुच्चये, पठ्यते च धार्मिकजनस्य शास्त्रान्तरे दानस्थानं यथा --

*पात्रे दीनादिवर्गे च, दानं विधिवदिष्यते। पोष्यवर्गाविरोधेन, न विरुद्धं स्वतश्च यत् ॥३॥ [ योगबिन्दौ १२१] /* ॥५॥ अत्रैव विपक्षे बाधामाह -

**अहितायैवान्यत् ॥६॥ इति ।**

अहितायैव अहितनिमित्तमेव उभयोरपि लोकयोः, न पुनः काकतालीयन्यायेनापि हितहेतुरिति एवकारार्थः,

अन्यद् न्यायोपात्तवित्ताद् विभिन्नम्, अन्यायोपात्तवित्तमित्यर्थः ॥६॥ कुत एतदित्याह -

**तदनपायित्वेऽपि मत्स्यादिगलादिवद्विपाकदारुणत्वात् ॥७॥ इति ।**

तस्य अन्यायोपात्तवित्तस्य अनपायित्वम् अविनाशित्वमिति योऽर्थस्तस्मिन्नपि, अन्यायोपार्जितो हि विभवो ऽस्थ्यादिशल्योपहतगृहमिवाचिराद् विनाशमनासाद्य नास्ते, अथ कदाचिद् बलवतः पापानुबन्धिनः पुण्यस्यानुभावात् स विभवो यावज्जीवमपि न विनश्येत् तथापि मत्स्यादीनां मत्स्य-कुरङ्ग-पतङ्गादीनां ये गलादयो गल-गौरीगान-प्रदीपालोकादयो रसनादीन्द्रियलौल्यातिरेककारिणो विषयविशेषास्तद्वद् विपाके परिणामे दा[१]रुणमत्यन्तव्यसनहेतुः, तस्य भावस्तत्त्वं तस्मात्, अन्यत्राप्यवाचि-

*पापेनैवार्थरागान्धः फलमाप्नोति यत् क्वचित् । बडिशामिषवत् तत् तमविनाश्य न जीर्यति ॥४॥* [ ]

*इति* । ॥७॥ नन्वेवमन्यायेन व्यवहारप्रतिषेधे गृहस्थस्य वित्तप्राप्तिरेव न भविष्यति, तत् कथं निर्वाहव्यवच्छेदे

१. प्रतिषु पाठा :- दारुणमत्यन्तव्यसनहेतुः नन्वेव J.। दारुणं तस्य भावस्तत्त्वं तस्मात् अन्यत्राप्यवाचि - पापेनैवार्थरागान्धः फलमाप्नोति यत् क्वचित्। बडिशामिषवत् तत् तमविनाश्य न जीर्यति ॥ इति । नन्वेव K.L.

धर्महेतुश्चित्तसमाधिलाभः स्यादित्याशङ्क्याह-

**न्याय एव ह्यर्थाप्त्युपनिषत् परेति समयविदः ।।८।। इति ।**

न्याय एव न पुनरन्यायोऽपि, अर्थस्य विभवस्य आप्तिर्लाभोऽर्थाप्तिः, तस्या उपनिषद् अत्यन्तरहस्यभूत उपायः, युक्तायुक्तार्थसार्थविभागकलनकौशलविकलैः स्थूलमतिभिः स्वप्नायमानावस्थायामप्यनुपलब्ध इति योऽर्थः, परा प्रकृष्टा, इत्येवं समयविदः सदाचाराभिधायिशास्त्रज्ञा ब्रुवते, तथा हि ते पठन्ति --

*निपानमिव मण्डूकाः सरःपूर्णमिवाण्डजाः। शुभकर्माणमायान्ति विवशाः सर्वसम्पदः ।।५।।* तथा-

*नोदन्वानर्थितामेति, न चाम्भोभिर्न पूर्यते। आत्मा तु पात्रतां नेयः, पात्रमायान्ति सम्पदः ।।६।।* [ ]

।।८।। कुत एतदेवमित्याह-

**ततो हि नियमतः प्रतिबन्धककर्मविगमः ।।९।। इति ।**

ततो न्यायात् सकाशाद् हिर्यस्माद् नियमतोऽवश्यम्भावेन प्रतिबन्धकस्य परलाभोपघातजननद्वारेण भवान्तरे

उपात्तस्य लाभविघ्नहेतोः कर्मणो लाभान्तरायलक्षणस्य विगमो विनाशः सम्पद्यते, यथा सम्यक्प्रयुक्तायाः लङ्घनादिक्रियायाः सकाशाद् रोगस्य ज्वराऽतिसारादेरिति ॥९॥ ततोऽपि किं सिद्धमित्याह --

**सत्यस्मिन्नायत्यामर्थसिद्धिः ॥१०॥ इति ।**

सति विद्यमाने अस्मिन् आन्तरे प्रतिबन्धककर्मविगमे आयत्याम् आगामिनि काले अर्थसिद्धिः अभिलषितविभवनिष्पत्तिराविर्भवतीति ॥१०॥ एतद्विपर्यये दोषमाह -

**अतोऽन्यथाऽपि प्रवृत्तौ पाक्षिकोऽर्थलाभो निःसंशयस्त्वनर्थ इति ॥११॥**

अत उक्तलक्षणाद् न्यायाद् अन्यथाऽपि अन्यायलक्षणेन प्रकारेण प्रवृत्तौ व्यवहारलक्षणायां पाक्षिको वैकल्पिकोऽर्थलाभः, कदाचित् स्यात् कदाचिन्नेत्यर्थः, निःसंशयो निःसन्देहः, तुः पुनरर्थः, अनर्थ उपघात आयत्यामेव । इदमुक्तं भवति-अन्यायप्रवृत्तिरेव तावदसम्भविनी, राजदण्डभयादिभिर्हेतुभिः प्रतिहतत्वात्, पठ्यते च -

*राजदण्डभयात् पापं, नाचरत्यधमो जनः। परलोकभयान्मध्यः, स्वभावादेव चोत्तमः ॥७॥*

अथ कश्चिदधमाधमतामवलम्ब्य अन्यायेन प्रवर्तते तथाप्यर्थसिद्धिरनैकान्तिकी, तथाविधाशुद्धसामग्री-सव्यपेक्ष-पाकस्य कस्यचिदशुभानुबन्धिनः पुण्यविशेषस्य उदयवशात् स्यादन्यथा पुनर्नेति, यश्चानर्थः सोऽवश्यंभावी, अन्यायप्रवृत्तिवशोपात्तस्य अशुद्धकर्मणो नियमेन स्वफलमसम्पाद्योपरमाभावात्। पठ्यते च-

*अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्। नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ॥८॥* [ ]

॥११॥ तथा -

**[२] समानकुल -शीलादिभिरगोत्रजैर्वैवाह्यमन्यत्र बहुविरुद्धेभ्यः ॥१२॥ इति ।**

समानं तुल्यं कुलं पितृपितामहादिपूर्वपुरुषवंशः शीलं मद्यमांस-निशाभोजनादिपरिहाररूपो व्यवहारः, आदिशब्दाद् विभव-वेष-भाषादि च येषां ते तथा, तैः कुटुम्बिभिर्लोकैः सह, अगोत्रजैः, गोत्रं नाम तथाविधैकपुरुषप्रभवो वंशः, ततो गोत्रे जाताः गोत्रजाः, तत्प्रतिषेधाद् अगोत्रजाः, तैर[१]तिचिर-कालव्यवधा[२]नवशेन

१. प्रतिषु पाठाः तैरिति चिर J । तैरति ॥ चिर K । तैरति चिर L॥ २. धानत्रुटित K. ॥

त्रुटितगोत्रसम्बन्धैश्चेति, किमित्याह-वैवाह्यं विवाह एव तत्कर्म वा वैवाह्यम्, सामान्यतो गृहस्थधर्म इति प्रकृतम्, किमविशेषेण?, नेत्याह- अन्यत्र विना बहुविरुद्धेभ्यः कुतोऽपि महतोऽनौचित्याद् बहुभिस्तज्जातिवर्त्तिभिस्तत्स्थान-तद्देशवासिभिर्वा जनैः सह विरुद्धा घटनामनागता बहुविरुद्धाः, तै[१]:, बहुविरुद्धान् लोकान् वर्जयित्वेत्यर्थः। असमान-कुलशीलादित्वे हि परस्परं वैसदृश्यात् तथाविधनिर्व्रण-सम्बन्धाभावेन असन्तोषादिसम्भवः।

किञ्च, विभववैषम्ये सति कन्या महतः स्वपितुरैश्वर्यादल्पविभवं भर्त्तारमवगणयति, इतरोऽपि प्रचुरस्वपितृविभव-वशोत्पन्नाहङ्कारः तत्पितुर्विभवविकलत्वेन दुर्बलपृष्ठोपष्टम्भां कन्यामवजानाति। तथा गोत्रजैर्वैवाह्ये स्वगोत्राचरितज्येष्ठ-कनिष्ठता-व्यवहारविलोपः स्यात्, तथाहि-ज्येष्ठोऽपि वयोविभवादिभिः कन्यापिता कनिष्ठस्यापि जामातृकपितुनीचैर्वृत्तिर्भवति, न च गोत्रजानां रूढं ज्येष्ठकनिष्ठव्यवहारमतिलङ्घ्य अन्यो वैवाह्यव्यवहारो गुणं लभते, अपि तु तद्व्यवहारस्य प्रवृत्तौ गोत्रजेषु पूर्वप्रवृत्तविनयभङ्गाद् महाननर्थ एव सम्पद्यते। तथा बहुविरुद्धैः सह

१. 'तैः विना' इति योगः॥

सम्बन्धघटनायां स्वयमनपराद्धानामपि तत्सम्बन्धद्वारा आयातस्य महतो विरोधस्य भाजनभवनेन इहलोकपरलोकार्थयोः क्षतिः प्रसजति, जनानुरागप्रभवत्वात् सम्पत्तीनामिति पर्यालोच्य उक्तं 'समानकुल-शीलादिभिरगोत्रजैवैवाह्यमन्यत्र बहुविरुद्धेभ्य इति ।

अत्र च लौकिकनीतिशास्त्रमिदम्- द्वादशवर्षा स्त्री, षोडशवर्षः पुमान्, तौ विवाहयोग्यौ, विवाहपूर्वो व्यवहारः कुटुम्बोत्पादनपरिपालनारूपश्चतुरो वर्णान् कुलीनान् करोति, युक्तितो वरणविधानम्, अग्निदेवादिसाक्षिकं च पाणिग्रहणं विवाहः, स च ब्राह्मादिभेदादष्टधा। तथाहि-ब्राह्मो विवाहो यत्र वरायालङ्कृत्य कन्या प्रदीयते १, त्वं भवास्य महाभागस्य सधर्मचारिणीति विनियोगेन विभवस्य कन्याप्रदानात् प्राजापत्यः २, गोमिथुनपुरस्सरं कन्याप्रदानादार्षः ३, स दैवो विवाहो यत्र यज्ञार्थमृत्विजः कन्याप्रदानमेव दक्षिणा ४, एते धर्म्या विवाहाश्चत्वारोऽपि, गृहस्थोचितदेवपूजनादिव्यवहाराणामेतदन्तरङ्गकारणत्वान्मातुः पितुर्बन्धूनां च प्रामाण्यात्। परस्परानुरागेण मिथः

समवायाद् गान्धर्वः ५, पणबन्धेन कन्याप्रदानमासुरः ६, प्रसह्य कन्याऽऽदानाद् राक्षसः ७, सुप्त-प्रमत्तक[१]न्याऽऽदानात् पैशाचः ८, एते चत्वारोऽधर्म्या अपि नाधर्म्याः, यद्यस्ति वधूवरयोरनपवादं परस्पररुचितत्वमिति। शुद्धकलत्रलाभफलो विवाहः। तत्फलं च सुजातसुतसन्ततिः, अनुपहता चित्त[२]निर्वृत्तिः, गृहकृत्यसुविहितत्वम्, आभिजात्याचारविशुद्धत्वम्, देवातिथिबान्धवसत्कारानवद्यत्वं चेति॥ कुलवधूरक्षणोपायाश्चैते-गृहकर्मविनियोगः, परिमितोऽर्थ-संयोगः, अस्वातन्त्र्यम्, सदा च मातृतुल्यस्त्रीलोकावरोधनमिति॥ रजकशिला-कुर्कुरकर्परसमा हि वेश्याः, कस्तासु कुलीनो रज्येत?, य[३]तो दाने दौर्भाग्यम्, सत्कृतौ परोपभोग्यत्वम्, आसक्तौ परिभवो मरणं वा, महोपकारेऽप्यनात्मीयत्वम्, बहुकालसम्बन्धेऽपि त्यक्तानां तदैव पुरुषान्तरगमनमिति वेश्यानां कुलाऽऽगतो धर्म इति ॥१२॥ तथा-

**[३] दृष्टादृष्टबाधाभीतता ॥१३॥ इति ।**

दृष्टाश्च प्रत्यक्षत एव अवलोकिताः, अदृष्टाश्च अनुमानागमगम्याः, ताश्च ता बाधाश्च उपद्रवाः, दृष्टादृष्ट-

---

१. प्रतिषु पाठा :- ''कन्या आदानात् J। कन्यादानात् K.L. ॥ २ निर्वृत्तिः K.J. ३. यतोऽदाने इति J सं मध्ये सूक्ष्माक्षरेण अवग्रहे लिखितो भाति ।

बाधास्ताभ्यो भीतता भयं सामान्यतो गृहस्थधर्म इति, तदा च तद् भयं चेतसि व्यवस्थापितं भवति यदि यथाशक्ति दूरत एव तत्कारणपरिहारः कृतो भवति, न पुनरन्यथा, तत्र दृष्टबाधाकारणानि अन्यायव्यवहरण-द्यूतरमण-परामाभि-गमनादीनि इहलोकेऽपि सकललोकसमुपलभ्यमाननानाविधविडम्बनास्थानानि, अदृष्टबाधाकारणानि पुनर्मद्य-मांस-सेवनादीनि शास्त्रनिरूपितनरकादियातनाफलानि भवन्ति, किं भणितं भवति? दृष्टादृष्टबाधाहेतुभ्यो दूरमात्मा व्यावर्त्तनीय इति ॥१३॥ तथा --

**[४] शिष्टचरितप्रशंसनम् ॥१४॥ इति ।**

शिष्यन्ते स्म शिष्टाः - वृत्तस्थ-ज्ञानवृद्धपुरुषविशेषसन्निधानोपलब्धविशुद्धशिक्षा मनुजविशेषाः, तेषां चरितम् आचरणं शिष्टचरितम्, यथा --

*लोकापवादभीरुत्वं, दीनाभ्युद्धरणादरः। कृतज्ञता सुदाक्षिण्यं, सदाचारः प्रकीर्त्तितः ॥९॥*

*सर्वत्र निन्दासन्त्यागो, वर्णवादश्च साधुषु। आपद्यदैन्यमत्यन्तं, तद्वत् सम्पदि नम्रता ॥१०॥*

*प्रस्तावे मितभाषित्वमविसंवादनं तथा । प्रतिपन्नक्रिया चेति, कुलधर्मानुपालनम् ॥११॥*

*असद्व्ययपरित्यागः, स्थाने चैव क्रिया सदा । प्रधानकार्ये निर्बन्धः, प्रमादस्य विवर्जनम् ॥१२॥*

*लोकाचारानुवृत्तिश्च, सर्वत्रौचित्यपालनम् । प्रवृत्तिर्गर्हिते नेति, प्राणैः कण्ठगतैरपि ॥१३॥ [योगबिन्दौ १२६-१३०]* इत्यादि । तस्य प्रशंसनं प्रशंसा, पुरस्कार इत्यर्थः, यथा-

*गुणेषु यत्नः क्रियतां, किमाटोपैः प्रयोजनम्? । विक्रीयन्ते न घण्टाभिर्गावः क्षीरविवर्जिताः ॥१४॥* तथा -

*शुद्धाः प्रसिद्धिमायान्ति, लघवोऽपीह नेतरे । तमस्यपि विलोक्यन्ते दन्तिदन्ता न दन्तिनः ॥१५॥* [ ] इ[1]त्यादि ॥१५॥ तथा --

**[५] अरिषड्वर्गत्यागेनाविरुद्धार्थप्रतिपत्त्येन्द्रियजयः॥१५॥ इति ।**

अयुक्तितः प्रयुक्ताः काम-क्रोध-लोभ-मान-मद-हर्षाः शिष्टगृहस्थानामन्तरङ्गोऽरिषड्वर्गः, तत्र

१. इति L । इति ॥ दि K ।

परपरिगृहीतास्वनूढासु वा स्त्रीषु दुरभिसन्धिः कामः, अविचार्य परस्यात्मनो वाऽपायहेतुः क्रोधः, दानार्हेषु स्वधनाप्रदानमकारणपरधनग्रहणं वा लोभः, दुरभिनिवेशामोक्षो युक्तोक्ताग्रहणं वा मानः, कुल-बलैश्वर्य-रूप-विद्याभिरात्माहङ्कारकरणं परप्रधर्षनिबन्धनं वा मदः, निर्निमित्तमन्यस्य दुःखोत्पादनेन स्वस्य द्यूत-पापर्द्ध्या-द्यनर्थसंश्रयेण वा मनःप्रीतिजननो हर्षः, ततोऽस्य अरिषड्वर्गस्य त्यागः प्रोज्झनम्, तेन, अविरुद्धानां गृहस्थावस्थोचित-धर्मार्थाभ्यां विरोधमनागतानामर्थानां शब्दादीनां श्रोत्रादीन्द्रियविषयभावापन्नानां प्रतिपत्तिरङ्गीकरणम् अविरुद्धार्थप्रतिपत्तिः, तया, इन्द्रियजयोऽत्यन्तासक्तिपरिहारेण श्रोत्रादीन्द्रियविकारनिरोधः, सर्वेन्द्रियार्थनिरोधेन पुनर्यो धर्मः स यतीनामेवाधि-करिष्यते, इह तु सामान्यरूपगृहस्थधर्म एवाधिकृतस्तेनैवमुक्तमिति ॥१५॥ तथा --

**[६] उपप्लुतस्थानत्यागः ॥१६॥ इति ।**

उपप्लुतं स्वचक्र-परचक्रविक्षोभाद् दुर्भिक्ष-मारीति-जन-विरोधादेश्चास्वस्थीभूतं यत् स्थानं निवासभूमिलक्षणं ग्राम-नगरादि तस्य त्यागः, अत्यज्यमाने हि तस्मिन् धर्मार्थकामानां तत्र प्रवृत्तोपप्लववशेन पूर्वलब्धानां विनाशसम्भवेन

नवानां चानुपार्जनेनोभयोरपि लोकयोरनर्थ एवोपपद्यते इति ॥१६॥ तथा --

**[७] स्वयोग्यस्याऽऽश्रयणम् ॥१७॥ इति ।**

स्वस्य आत्मनो योग्यस्य उचितस्य र[१]क्षाकरस्य राजादेरपूर्वलाभसम्पादन-लब्धरक्षणक्षमस्य आश्रयणं 'रक्षणीयोऽहं भवताम्' इत्यात्मसमर्पणम्, यत उक्तम्-*स्वामिमूलाः सर्वाः प्रकृतयः, अमूलेषु तरुषु किं कुर्यात् पुरुषप्रयत्नः* [नीतिवाक्या[२]०] इति। स्वामी च धार्मिकः कुलाचाराभिजनविशुद्धः प्रतापवान् न्यायानुगतश्च कार्य इति ॥१७॥ तथा --

**[८] प्रधानसाधुपरिग्रहः ॥१८॥ इति ।**

प्रधानानाम् अन्वयगुणेन सौजन्य-दाक्षिण्य-कृतज्ञतादिभिश्च गुणैरुत्तमानां साधूनां सदाचाराभिनिवेशवतां परिग्रहः स्वीकरणम्, क्षुद्रपरिवारो हि पुरुषः सर्पवानाश्रय इव न कस्यापि सेव्यः स्यात्, तथा उत्तमपरिग्रहेणैव 'गुणवान्'

---

१. रक्षाकारणस्य L ॥ २. दिगम्बर जैनाचार्यसोमदेवसूरिविरचिते नीतिवाक्यामृते सप्तदशे स्वामिसमुद्देशे।

इति पुरुषस्य प्रसिद्धिरुत्पद्यते, यथोक्तम् --

*गुणवानिति प्रसिद्धिः सन्निहितैरेव भवति गुणवद्भिः ।*

*ख्यातो मधुर्जगत्यपि सुमनोभिः सुरभिभिः सुरभिः* ॥१६॥ [ ] इति ॥१८॥ तथा --

**[९] स्थाने गृहकरणम् ॥१९॥ इति ।**

स्थाने वक्ष्यमाणलक्षणास्थानविलक्षणे ग्राम-नगरादिभागे गृहस्य स्वनिवासस्य करणं विधानमिति ॥१९॥

अस्थानमेव व्यनक्ति --

**अतिप्रकटातिगुप्तमस्थानमनुचितप्रातिवेश्यं च ॥२०॥ इति ।**

तत्राऽतिप्रकटम् असन्निहितगृहान्तरतयाऽतिप्रकाशम्, अतिगुप्तं गृहान्तरैरेव सर्वतोऽतिसन्निहितैरनुपलक्ष्यमाणद्वारादिविभागतयाऽतीव प्रच्छन्नम्, ततोऽतिप्रकटं चातिगुप्तं चेत्यतिप्रकटातिगुप्तम्, किमित्याह-अस्थानम् अनुचितं गृहकरणस्य, तथा अनुचितप्रातिवेश्यं च, प्रतिवेशिनः सन्निहितद्वितीयादिगृहवासिनः कर्म

भावो वा प्रातिवेश्यम्, अनुचितं द्यूतादिव्यसनोपहततया धार्मिकाणामयोग्यं प्रातिवेश्यं यत्र तदनुचितप्रातिवेश्यम्, चः समुच्चये, किं पुनः कारणमतिप्रकटादि अस्थानमिति?, उच्यते-अतिप्रकटे प्रदेशे गृहं क्रियमाणं परिपार्श्वतो निरावरणतया चौरादयो निःशङ्कमनसोऽभिभवितुमुत्सहन्ते, अतिगुप्तं पुनः सर्वतो गृहान्तरैरतिनिरुद्धत्वान्न स्वशोभां लभते, प्रदीपनकाद्युपद्रवेषु च दुःखनिर्गमप्रवेशं भवति, अनुचितप्रातिवेश्यत्वे पुनः संसर्गजा दोष-गुणा भवन्ति [ ] इति व[१]चनात् कुशील-प्रातिवेशिकलोकालाप-दर्शन-सहवासदोषवशात् स्वतः सगुणस्यापि जीवस्य निश्चितं गुणहानिरुत्पद्यते इति तन्निषेधः॥२०॥ स्थानेऽपि गृहकरणे विशेषविधिमाह -

**लक्षणोपेतगृहवासः ॥२१॥ इति ।**

लक्षणैः प्रशस्तवास्तुस्वरूपसूचकैर्बहलदूर्वा - प्रवाल - कुशस्तम्ब-प्रशस्तवर्णगन्धमृत्तिका-सुस्वादजलोद्गम-निधानादियुक्तक्षितिप्रतिष्ठितत्व-वेधविरहादिभिरुपेतं समन्वितम्, तच्च तद् गृहं च, तत्र वासोऽवस्थानम्, निर्लक्षणे हि

१ वचनादकुलीनप्राति J ॥

गृहे वसतां सतां विभवविनाशादयो नानाविधा जनप्रसिद्धा एव दोषाः सम्पद्यन्ते, गृहलक्षणानामेव समीहितसिद्धौ प्रधानसाधनत्वात् ॥२१॥ ननु कथं गृहलक्षणानामेव निःसंशयोऽवगमः? इत्याह -

**निमित्तपरीक्षा ॥२२॥ इति ।**

निमित्तैः शकुन-स्वप्नोपश्रुतिप्रभृतिभिरतीन्द्रियार्थपरिज्ञानहेतुभिः परीक्षा, परीति सर्वतः सन्देह-विपर्यया-ऽनध्यवसायविज्ञानदोषपरिहारेण ईक्षणम् अवलोकनं गृहलक्षणानां कार्यमिति ॥२२॥ तथा --

**अनेकनिर्गमादिवर्जनम् ॥२३॥ इति ।**

अनेके बहवो ये निर्गमा निर्गमद्वाराणि, आदिशब्दात् प्रवेशद्वाराणि च, तेषां वर्जनम् अकरणम्, अनेकेषु हि निर्गमादिषु अनुपलक्ष्यमाणनिर्गम-प्रवेशानां तथाविधलोकानामापाते सम्यग्गृहरक्षाऽभावेन स्त्र्यादिजनस्य विभवस्य च विप्लव एव स्यात्, निबिडतरगृहद्वाररक्षयैव तेऽनवकाशा भवन्ति, परिमित-प्रवेश-निर्गमं च गृहं सुखरक्षं भवतीति ॥२३॥ तथा --

**[१०] विभवाद्यनुरूपो वेषो विरुद्धत्यागेन ॥२४॥ इति ।**

विभवादीनां वित्त-वयो-ऽवस्था-निवासस्थानादीनामनुरूपो लोकपरिहासाद्यनास्पदतया योग्यो वेषो वस्त्रादिनेपथ्यलक्षणो विरुद्धस्य जङ्घार्द्धोद्घाटन-शिरोवेष्टनाञ्चलदेशोर्ध्वमुखन्यसना-ऽत्यन्तगाढाङ्गिकालक्षणस्य विटचेष्टा-स्पष्टता-निमित्तस्य वेषस्यैव त्यागेन अनासेवनेन, प्रसन्ननेपथ्यो हि पुमान् मङ्गलमूर्त्तिर्भवति, मङ्गलाच्च श्रीसमुत्पत्तिः, यथोक्तम् -

*श्रीर्मङ्गलात् प्रभवति प्रा[१]गल्भ्याच्च प्रवर्द्धते । दाक्ष्यात् तु कुरुते मूलं संयमात् प्रतितिष्ठति ॥१७॥* [महाभारते उद्योगपर्वणि ५।३५।४४] मूलमित्यनुबन्धम्, प्रतितिष्ठतीति प्रतिष्ठां लभते ॥२४॥ तथा-

**[११] आयोचितो व्ययः ॥२५॥ इति ।**

आयस्य वृद्ध्यादिप्रयुक्तधनधान्याद्युपचयरूपस्य उचितः चतुर्भागादितया योग्यो वित्तस्य व्ययो भर्तव्यभरण-

१ 'प्रागल्भ्यात् सम्प्रवर्धते' इति महाभारते पाठः ॥

स्वभोग-देवा[१]ऽतिथिपूजनादिप्रयोजनेषु विनियोजनम्, तथा च नीतिशास्त्रम्-

*पादमायान्निधिं कुर्यात् पादं वित्ताय ख[२]ट्टयेत् । धर्मोपभोगयोः पादं, पादं भर्तव्यपोषणे ॥१८॥* तथा --

*आयादर्द्धं नियुञ्जीत धर्मे समधिकं ततः। शेषेण शेषं कुर्वीत यत्नतस्तुच्छमैहिकम् ॥१९॥* [ ]

आयानुचितो हि व्ययो, रोग इव शरीरं कृशीकृत्य विभवसारमखिलव्यवहारासमर्थं पुरुषं करोति, पठ्यते च-

*आयव्ययमनालोच्य यस्तु वैश्र[३]वणायते। अचिरेणैव कालेन सोऽत्र वै श्रवणायते ॥२०॥२५॥* तथा-

**[१२] प्रसिद्धदेशाचारपालनम् ॥२६॥ इति ।**

प्रसिद्धस्य तथाविधापरशिष्टसम्मततया दूरं रू[४]ढिमागतस्य देशाचारस्य सकलमण्डलव्यवहाररूपस्य भोजनाऽऽच्छादना[५]दि-विचित्रक्रियात्मकस्य पालनम् अनुवर्त्तनम्, अन्यथा तदाचारातिलङ्घने तद्देशवासिजनतया सह विरोधसम्भवेनाकल्याणलाभः स्यादिति । पठन्ति चात्र लौकि[६]का :-

१. देवतातिथि० J ॥ २. घट्टयेत् J । कल्पयेत् L सं । ३. श्रमणायते K ॥ ४. रूढिसमागतस्य J ॥ ५. 'दिचित्र J. विना ॥ ६. श्लोकाः J. ॥

*यद्यपि सकलां योगी, छिद्रां पश्यति मेदिनीम्। तथाऽपि लौकिकाचारं, मनसाऽपि न लङ्घयेत् ॥२१॥*

[ ] इति। ॥२६॥ तथा -

**[१३] गर्हितेषु गाढमप्रवृत्तिः ॥२७॥ इति।**

गर्हितेषु लोक-लोकोत्तरयोरनादरणीयतया निन्दनीयेषु मद्य-मांससेवन-परामाभिगमनादिषु पापस्थानेषु गाढम् अत्यर्थम् अप्रवृत्तिर्मनोवाक्कायानामनवतारः। आचारशुद्धौ हि सामान्यायामपि कुलाद्युत्पत्तौ पुरुषस्य महन्माहात्म्यमुत्पद्यते, यथोक्तम् -

*न कुलं वृत्तहीनस्य, प्रमाणमिति मे मतिः। अन्त्येष्वपि हि जातानां, वृत्तमेव विशिष्यते ॥२२॥* [महाभारते उद्योगपर्वणि ५।३४।३९], यतः-

*निपानमिव मण्डूकाः, सरःपूर्णमिवाण्डजाः। शुभकर्माण-मायान्ति, विवशाः सर्वसम्पदः ॥२३॥॥२७॥*तथा-

**[१४] सर्वेष्ववर्णवादत्यागो विशेषतो राजादिषु ॥२८॥ इति।** ॥ २८ ॥

सर्वेषु जघन्योत्तममध्यमभेदभिन्नेषु प्राणिषु अवर्णवादस्य अप्रसिद्धिप्रख्यापनरूपस्य त्यागः परिहारः कार्यः, विशेषतोऽतिशयेन राजादिषु राजा-ऽमात्य-पुरोहितादिषु बहुजनमान्येषु, सामान्यजनापवादे हि स्वस्य द्वेष्यभावो भूयानाविर्भावितो भवति, यत उच्यते- *न परपरिवादाद[1]न्यविद्वेषणे परं भैषजमस्ति* [नीतिवाक्या० १६।१२]। राजादिषु तु वित्त-प्रा[2]णनाशादिरपि दोषः स्यादिति ॥२८॥ तथा -

**[१५] असदाचारैरसंसर्गः ॥२९॥ इति ।**

असदाचारैरिहलोक-परलोकयोरहितत्वेन असन् असुन्दर आचारः प्रवृत्तिर्येषां ते तथा, ते च द्यूतकारादयः, तैरसंसर्गो असम्बन्धः, प्रदीपनका-ऽशिव-दुर्भिक्षोपहतदेशादीनामिव तेषां दूरतो वर्जनमित्यर्थः ॥२९॥ एतदेव व्यतिरेकत आह -

**संसर्गः सदाचारैः ॥३०॥ इति ।**

---

१. दन्यद् वि मु० ॥ २. प्राणादिनाशादि K ॥

प्रतीतार्थमेव, असदाचारसंसर्गवर्जनेऽपि यदि सदाचारसंसर्गो न स्यात् तदा न तथाविधा गुणवृद्धिः सम्पद्यते इत्येतत् सूत्रमुपन्यस्तम्, उक्तं चैतदर्थानुवादि -

*यदि सत्सङ्गनिरतो भविष्यसि भविष्यसि । अथासज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ॥२४॥* इति ॥३०॥ तथा -

**[१६] मातापितृपूजा ॥३१॥ इति ।**

मातापित्रोजननी-जनकयोः पूजा त्रिसन्ध्यं प्रणामकरणादि, य[१]थोक्तम्-

*पूजनं चास्य विज्ञेयं, त्रिसन्ध्यं नमनक्रिया । तस्यानवसरेऽप्युच्चैश्चेतस्यारोपितस्य तु ॥२५॥* [योगबि०१११]

अस्येति

*माता पिता कलाचार्य एतेषां ज्ञातयस्तथा । वृद्धा धर्मोपदेष्टारो गुरुवर्गः सतां मतः ॥२६॥ [योगबि०११०]*

---

१. तथाचोक्तम् J ॥

*इति श्लोकोक्तस्य गुरुवर्गस्य ।*

*अभ्युत्थानादियोगश्च, तदन्ते निभृतासनम् । नामग्रहश्च नास्थाने, नावर्णश्रवणं क्वचित् ॥२७॥* [योगबि०११२] ॥३१॥ अथ मातापितृविषयमेवान्यं विनयविशेषमाह-

**आमुष्मिकयोगकारणम्, तदनुज्ञया प्रवृत्तिः, प्रधानाभिनवोपनयनम्, तद्भोगे भोगोऽन्यत्र तदनुचितात् ॥३२॥ इति ।**

आमुष्मिकाः परलोकप्रयोजना योगा देवतापूजनादयो धर्मव्यापारा आमुष्मिकयोगास्तेषां कारणं स्वयमेवामुष्मिकयोगान् मातापित्रोः कुर्वतोर्हेतु[१]कर्तृभावेन नियोजनम्, यथा नातः परं भवद्भ्यां कुटुम्बकार्येषु किञ्चिदुत्सहनीयम्, केवलं धर्म-कर्मप्रतिबद्धमानसाभ्यामनवरतं भाव्यमिति । तथा तदनुज्ञया माता-पितृजनानुमत्या प्रवृत्तिः सकलैहिकाऽऽमुष्मिकव्यापारकरणम् । तथा प्रधानस्य वर्ण-गन्धादिभिः सारस्य अभिनवस्य च तत्कालसम्पन्नस्य

१. ''तत्प्रयोजको हेतुश्च (१/४/५५) कर्तुः प्रयोजको हेतुसञ्ज्ञः कर्तृसञ्ज्ञश्च स्यात्'' इति पाणिनीयव्याकरणस्य सिद्धान्तकौमुद्याम् ।

पुष्प-फल-वस्त्रादेर्वस्तुनः उपनयनं ढौकनं माता-पित्रोरेव । तथा तद्भोगे मातापितृभोगे अन्नादीनां भोगः स्वयमासेवनम्, अत्रापवादमाह-अन्यत्र अन्तरेण तदनुचितात् तयोः प्रकृतयोरेव मातापित्रोरनुचितात् कुतोऽपि व्रतादिविशेषादिति ॥३२॥ तथा -

**[१७] अनुद्वेज[१]नीया प्रवृत्तिः॥३३॥ इति ।**

स्वपक्ष-परपक्षयोरनुद्वेजनीया अनुद्वेगहेतुः प्रवृत्तिः काय-वाङ्-मनश्चेष्टारूपा, परोद्वेगहेतोर्हि पुरुषस्य न क्वापि समाधि-लाभोऽस्ति, अनुरूपफलप्रदत्वात् सर्वप्रवृत्तीनामिति ॥३३॥ तथा -

**[१८] भर्तव्यभरणम् ॥३४॥ इति ।**

भर्तव्यानां भर्तुं शक्यानां मातापितृ-समाश्रितस्वजनलोक-तथाविधभृत्यप्रभृतीनां भरणं पोषणं भर्तव्यभरणम् । तत्र त्रीणि अवश्यं भर्तव्यानि-मातापितरौ सती भार्या अलब्धबलानि चापत्यानि, यत उक्तम्-

१. जनी प्रवृत्तिः J १. K १ मू० ।।

*वृद्धौ च मातापितरौ, सतीं भार्यां सुतान् शिशून् । अप्यकर्मशतं कृत्वा, भर्तव्या[२]न् मनुरब्रवीत् ॥२८॥* [मनुस्मृतौ ११।११] विभवसम्पत्तौ चान्यान्यपि, अत्राप्युक्तम्-

*चत्वारि ते तात! गृहे वसन्तु श्रियाभिजुष्टस्य गृहस्थधर्मे । सखा दरिद्रो भगिनी व्यपत्या ज्ञातिश्च वृद्धो विधनः कुलीनः ॥२९॥* [म[१]हाभारते उद्योगपर्वणि ५।३३।५९] इति ॥३४॥ तथा -

**यथोचितं विनियोगः ॥३५॥ इति ।**

तस्य भर्तव्यस्य भृतस्य सतो तस्य यथोचितं यो यत्र धर्मे कर्मणि वा समुचितस्तस्य तत्र विनियोगो व्यापारणम् । अव्यापारितो हि परिवारः समुचितानुष्ठानेषु निर्विनोदतया द्यूतादिव्यसनमप्यभ्यस्येत् निष्फ[२]लशक्तिक्षयाच्चाकिञ्चित्करत्वेनावस्त्वपि स्यात्, एवं चासौ नानुगृहीतः स्यादपि तु विनाशित इति ॥३५॥ तथा

२. व्या मनु J.K. ॥ वृद्धौ च माता-पितरौ साध्वी भार्या शिशुः सुतः । अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत् ॥ ११ ।। इति मुद्रितायां मनुस्मृतौ एकादशेऽध्याये ॥ १. "चत्वारि ते तात गृहे वसन्तु श्रियाभिजुष्टस्य गृहस्थधर्मे । वृद्धो ज्ञातिरवसन्नः कुलिनः सखा दरिद्रो भगिनी चानपत्या" ॥ इति महाभारते पाठः ॥ २. निष्फलं K. ॥

**तत्प्रयोजनेषु बद्ध[1]लक्ष्यता ॥३६॥ इति ।**

तस्य भर्तव्यस्य प्रयोजनेषु धर्मार्थकामगोचरेषु चित्ररूपेषु बद्धलक्ष्यता नित्योपयुक्तचित्तता, ते हि तस्मिंश्चिन्ताकरे नित्यं निक्षिप्तात्मानः ते[2]नाचिन्त्यमानप्रयोजनाः सीदन्तः सन्तोऽप्रसन्नमनस्कतया न स्वनिरूपितकार्यकरणक्षमाः सम्पद्यन्ते इति ॥३६॥ तथा -

**अपायपरिरक्षोद्योगः ॥३७॥ इति ।**

तस्यैव भर्तव्यस्य अपायेभ्योऽनर्थेभ्य ऐहिकामुष्मिकेभ्यः परिरक्षा सर्वतस्त्राणम्, तत्र उद्योगो महानुद्यमः, एवं हि भर्तव्यान् प्रति तस्य नाथत्वं स्याद् यदि सोऽलब्धलाभलक्ष[3]णं योगं लब्धरक्षारूपं च क्षेमं कर्तुं क्षमः स्यात्, योग-क्षेमकरस्यैव नाथत्वादिति ॥३७॥ तथा -

**[१९] गर्ह्ये ज्ञान-स्वगौरवरक्षे॥३८॥ इति ।**

---

१. लक्षता J.१. K.१. D ॥ २. तेन चिन्त्य इति J. मू. K.L. मू.प्रतिषु पाठः । J. सं. L.सं. मध्ये तु तेनाचिन्त्य इति पाठः ॥३. लक्षणं भरणं लब्धरक्षारुपं L.K. लीं. ॥

गर्ह्ये गर्हणीये कुतोऽपि लोकविरुद्धाद्यनाचारासेवनान्निन्दनीयतां प्राप्ते भर्तव्ये सामान्यतो वा सर्वस्मिन् जने किं विधेयमित्याह - ज्ञानं संशय-विपर्यया-ऽनध्यवसायपरिहारेण यथावत् स्वरूपनिश्चयः, स्वगौरवरक्षा, स्वेन आत्मना गौरवं पुरस्करणं स्वगौरवं तस्य रक्षा निवारणम्, ततो ज्ञानं च स्वगौरवरक्षा च ज्ञान-स्वगौरवरक्षे कर्त्तव्ये, गर्ह्यो ह्यर्थः सम्यग् ज्ञातव्यः प्रथमतः, ततोऽनुमतिदोषपरिहाराय सर्वप्रकारैर्न पुरस्कारस्तस्य कर्त्तव्य इति ॥३८॥ तथा-

**[२०] देवा-ऽतिथि-दीनप्रतिपत्तिः ॥३९॥ इति ।**

दीव्यते स्तूयते भक्तिभरनिर्भरामरप्रभुप्रभृतिभिर्भव्यैरनवरतमिति देवः, स च क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः, त[१]स्यैवैतानि नामानि-अर्हन्नजोऽनन्तः शम्भुर्बुद्धस्तमोऽन्तक इति। न विद्यते सततप्रवृत्तातिविशदैकाकारानुष्ठानतया तिथ्यादिदिनविभागो येषां ते अतिथयः, यथोक्तम् -

---

१. क्लेश-कर्म-विपाकाशयैरपरामृष्टः पुरुषविशेषो देवः ॥६६॥ तस्यैवैतानि खलु विशेषनामानि-अर्हन्नजोऽनन्तः शम्भुर्बुद्धस्तमोऽन्तक इति ॥६७॥ इति नीतिवाक्यामृते पञ्चविंशे दिवसानुष्ठानसमुद्देशे ॥

*तिथिपर्वोत्सवाः सर्वे त्यक्ता येन महात्मना। अतिथिं तं विजानीयाच्छेषमभ्यागतं विदुः ॥३०॥* [ ]

दीनाः पुनः दीङ् क्षये [पा.धा.११५९] इति वचनात् क्षीणसकलधर्मा-ऽर्थ-कामाराधनशक्तयः, ततः देवातिथि-दीनानां प्रतिपत्तिरुपचारः पूजा-ऽन्नपानदानादिरूपो देवा-ऽतिथि-दीनप्रतिपत्तिः ॥३९॥ तत्र च-

**तदौचित्याबाधनमुत्तमनिदर्शनेन ॥४०॥ इति ।**

तेषां देवादीनामौचित्यं योग्यत्वं यस्य देवादेरुत्तम-मध्यम-जघन्यरूपा या प्रतिपत्तिरित्यर्थस्तस्य अबाधनम् अनुल्लङ्घनम्, तदुल्लङ्घने शेषाः सन्तोऽपि गुणा असन्त इव भवन्ति, यत उक्तम्-

*औचित्यमेकमेकत्र गुणानां राशिरेकतः। विषायते गुणग्राम औचित्यपरिवर्जितः ॥३१॥ इति ।*

कथं तदौचित्याबाधनमित्याह-उत्तमनिदर्शनेन, अतिशयेन शेषलोकादूर्ध्वं वर्त्तन्त इत्युत्तमाः, ते च प्रकृत्यैव परोपकरण-प्रियभाषणादिगुणमणिमकराकरोपमाना मानवाः, तेषां निदर्शनम्-उदाहरणं तेन, उत्तमनिदर्शनानुसारिणो हि

पुरुषा उदात्तात्मतया न स्वप्नेऽपि विकृतप्रकृतयः सम्भवन्ति। इयं च देवादिप्रतिपत्ति-र्नित्यमेवोचिता, विशेषतश्च भोजनावसर इति ॥४०॥ तथा -

**[२१] सात्म्यतः कालभोजनम् ॥४१॥ इति ।**

*पानाहारादयो यस्य, विरुद्धाः प्रकृतेरपि। सुखित्वाय[१]यावकल्पन्ते, तत् सात्म्यमिति गीयते ॥३२॥* [ ]

इति[२] । एवंलक्षणात् सात्म्यात् काले बुभुक्षोदयावसरलक्षणे भोजनम् अन्नोपजीवनं कालभोजनम्, अयमभिप्रायः-आजन्म सात्म्येन भुक्तं विषमपि पथ्यं भवति, परमसात्म्यमपि पथ्यं सेवेत न पुनः सात्म्यप्राप्तमप्यपथ्यम्, सर्वं बलवतः पथ्यमिति मत्वा न काल-कूटं खादेत्, सुशिक्षितो हि विषतन्त्रज्ञो म्रियते एव कदाचिद्विषात्, तथा अक्षुधितेनामृतमप्युपभुक्तं भवति विषम्, तथा क्षुत्कालातिक्रमादन्नद्वेषो देहसादश्च भवति, विध्यातेऽग्नौ किं नामेन्धनं कुर्यादिति ॥४१॥ तथा -

१. 'त्वायैव कल्पन्ते K सं ॥ २. इति नास्ति J ॥

**[२२] लौल्यत्यागः ॥४२॥ इति ।**

सात्म्यतः कालभोजनेऽपि लौल्यस्य आकाङ्क्षातिरेकादधिकभोजनलक्षणस्य त्यागः, यतो यो मितं भुङ्क्ते स बहु भुङ्क्ते, अतिरिक्तभुक्तं हि उद्वामन-हादन-मारणानामन्यत[1]मदसम्पाद्य नोपरमं प्रतिपद्यते, तथा भुञ्जीत यथा सायमन्येद्युश्च न विपद्यते वह्निः, न भुक्तेः परिमाणे सिद्धान्तोऽस्ति, वह्न्यभिलाषायत्तं हि भोजनम्, अतिमात्रभोजी देहमग्निं च विधुरयति, तथा दीप्तोऽग्निर्लघुभोजनाद् देहबलं क्षपयति, अत्यशितुर्दुःखेन परिणामः, श्रमार्त्तस्य पानं भोजनं वा नियमाद् ज्वराय छर्दिषे वा स्यात् ॥४२॥ तथा -

**[२३] अजीर्णे अभोजनम् ॥४३॥ इति ।**

प्रागुपभुक्तस्य आहारस्य अजीर्णे अ[2]जरणेऽजीर्णे वा तत्र परिपाकमनागते अभोजनं सर्वथा भोजनपरिहारः, [3]अजीर्णे भोजने हि अजीर्णस्य सर्वरोगमूलस्य वृद्धिरेव कृता भवति, पठ्यते च-

---

१. तमद्वासंपाद्य K । तमत् संपाद्य L र्ली ०॥ २. अजरे जीर्णे K । अजरणे जीर्णे L. ॥ ३. अजीर्णभोजने K.L. ।

*अजीर्णप्रभवा रोगास्तत्राजीर्णं चतुर्विधम् । आमं विदग्धं विष्टब्धं रसशेषं तथापरम् ॥३३॥*
*आमे तु द्रवगन्धित्वं विदग्धे धूमगन्धिता । विष्टब्धे गात्रभङ्गोऽत्र रसशेषे तु जाड्यता ॥३४॥* [ ]
द्रवगन्धित्वमिति द्रवस्य श्लथस्य कुथित[१]तक्रादेरिव गन्धो यस्यास्ति तत् तथा, तद्भावस्तत्त्वमिति ।
*मलवातयोर्विगन्धो विड्भेदो गात्रगौरवमरुच्यम् । अविशुद्धश्चोद्गारः षडजीर्णव्य[२]क्तिलिङ्गानि ॥३५॥*
*मूर्च्छा प्रलापो वमथुः प्रसेकः सदनं भ्रमः। उपद्रवा भवन्त्येते मरणं चाऽप्यजीर्णतः ॥३६॥* [सुश्रुतसंहिता १।४६।५०४] प्रसेक इति अधिकनिष्ठीवनप्रवृत्तिः, सदनमिति अङ्गग्लानिः इति ॥४३॥ तथा -

**बलापाये प्रतिक्रिया ॥४४॥ इति ।**

बलस्य शरीरसामर्थ्यलक्षणस्य अपाये कथञ्चिद् ह्रासे सति प्रतिक्रिया तथाविधात्यन्तपरिश्रमपरिहारेण स्निग्धाल्पभोजनादिना च प्रकारेण प्रतिविधानं बलापायस्यैव, बलमूलं हि *जीवितम्* [ ] इति वचनात्,

१. तक्रादेरिति J. ॥ २. व्यक्तलि मु. ॥

बलमुचितमपातयता सता सर्वकार्येषु यतितव्यम्, अथ कथञ्चित् कदाचिद्बलपातोऽपि कश्चिद् भवेत् तदा *विषं व्याधिरुपेक्षितः* [ ] इति वचनात् सद्य एवासौ प्रतिविधेयो न पुनरुपेक्षितव्य इति ॥४४॥ तथा -

**[२४] अदेशकालचर्यापरिहारः ॥४५॥ इति ।**

देशकालः प्रस्तावः, तत्र चर्या देशकालचर्या, तत्प्रतिषेधाद् अदेशकालचर्या, तस्याः परिहारः, अदेशकालचर्यापरो हि नरस्तथाविधचौराद्युपद्रवव्रातविषयतया इहलोक-परलोकानर्थयोर्नियमादास्पदीभवति ॥४५॥ तथा -

**[२५] य[१]थोचितं लोकयात्रा ॥४६॥ इति ।**

यथोचितं या यस्योचिता लोकयात्रा लोकचित्तानुवृत्तिरूपो व्यवहारः सा विधेया, यथोचितलोकयात्रातिक्रमे हि लोकचित्तविराधनेन तेषामात्मन्यनादेयतापरिणामापादनेन स्वलाघवमेवोत्पादितं भवति, एवं चान्यस्यापि सम्यगाचारस्य स्वगतस्य लघुत्वमेवोपनीतं स्यादिति, उक्तं च-

१. J. १. K. १. विना-यथोचितलो J.K.L. लीं ॥

*लोकः खल्वाधारः सर्वेषां धर्मचारिणां यस्मात्। तस्माल्लोकविरुद्धं धर्मविरुद्धं च सन्त्याज्यम् ॥३७॥* [प्रशम.१३१] ।४६॥ तथा -

**हीनेषु हीनक्रमः ॥४७॥ इति ।**

हीनेषु जाति-विद्यादिभिर्गुणैः स्वकर्मदोषान्नीचतां गतेषु लोकेषु हीनक्रमो लोकयात्राया ए[1]व तुच्छताकरणरूपः, हीना अपि लोकाः किञ्चिदनुवर्तनीया इत्यर्थः, ते हि हीनगुणतयाऽऽत्मानं तथाविधप्रतिपत्तेरयोग्यं सम्भावयन्तो यया कयाचिदपि उत्तमलोकानुवृत्त्या कृतार्थं मन्यमानाः प्रमुदितचेतसो भवन्तीति ॥४७॥ तथा -

**[२६] अतिसङ्गवर्जनम् ॥४८॥ इति**

अतिसङ्गस्य अतिपरिचयलक्षणस्य सर्वैरेव सार्द्धं वर्जनं परिहरणम्, यतोऽतिपरिचयाद् भवति गुणवत्यप्यनादरः । पठ्यते च-

१. एव । तुच्छ K.J. । एव ॥ तुच्छ L. र्लीं॥

*अतिपरिचयादवज्ञा, भवति विशिष्टेऽपि वस्तुनि प्रायः । लोकः प्रयागवासी, कूपे स्नानं सदा कुरुते ॥३८॥* [ ] ॥४८॥ तथा -

**[२७] वृत्तस्थज्ञानवृद्धसेवा ॥४९॥ इति ।**

वृत्तम् असदाचारनिवृत्तिः सदाचारप्रवृत्तिश्च, ज्ञानं पुनः हेयोपादेयवस्तुवि[१]भागविनिश्चयः, ततः वृत्ते तिष्ठन्तीति वृत्तस्थाः, ज्ञानेन वृद्धा महान्तो ज्ञानवृद्धाः, वृत्तस्थाश्च ते ज्ञानवृद्धाश्च वृत्तस्थज्ञानवृद्धाः, तेषां सेवा दरिद्रेश्वरसेवाज्ञात-सिद्धाऽऽराधना, सम्यग्ज्ञान-क्रियागुणभाजो हि पुरुषाः सम्यक् सेव्यमाना नियमात् सदुपदेशादिफलैः फलन्ति, यथोक्तम् -

*उपदेशः शुभो नित्यं दर्शनं धर्मचारिणाम् । स्थाने विनय इत्येतत् साधुसेवाफलं महत् ॥३९॥* [शास्त्रवार्त्ता० ७] ॥४९॥ तथा-

१. विभागनिश्चयः J. विना ॥

[२८] परस्परानुपघातेनान्योन्यानुबद्धत्रिवर्गप्रतिपत्तिः॥५०॥ इति।

इह धर्मार्थकामास्त्रिवर्गः, तत्र यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः, यतः सर्वप्रयोजनसिद्धिः सोऽर्थः, आभिमानिकरसानुविद्धा यतः सर्वेन्द्रियप्रीतिः स कामः, ततः परस्परस्य अन्योन्यस्य अनुपघातेन अपीडनेन, अत एव अन्योन्यानुबद्धस्य परस्परानुबन्धप्रधानस्य त्रिवर्गस्य प्रतिपत्तिरासेवनम्, तत्र धर्मार्थयोरुपघातेन तादात्विकविषयसुखलुब्धो वनगज इव को नाम न भवत्यास्पदमापदाम्?, धर्मातिक्रमाद्धनमुपार्जितं परेऽनुभवन्ति, स्वयं तु परं पापस्य भाजनं सिंह इव सिन्धुरवधात्, बीजभोजिनः कुटुम्बिन इव, नास्त्यधार्मिकस्यायत्यां किमपि कल्याणम्, स खलु सुखी योऽमुत्रसुखाविरोधेनेहलोकसुखमनुभवति, तस्माद्धर्माबाधनेन कामा-ऽर्थयोर्मतिमता यतितव्यम्, यस्त्वर्थकामावुपहत्य धर्ममेवोपास्ते तस्य यतित्वमेव श्रेयो न तु गृहवासः, इति तस्यार्थकामयोरप्याराधनं श्रेय इति। तथा तादात्विक-मूलहर-कदर्याणां नासुलभः प्रत्यवायः, तत्र यः किमप्यसञ्चिन्त्यो [त्यो]- त्पन्नमर्थमपव्येति स तादात्विकः, यः पितृपैतामहमर्थमन्यायेन भक्षयति स मूलहरः, यो भृत्यात्मपीडाभ्यामर्थं सञ्चिनोति न तु क्वचिदपि व्ययते स कदर्यः,

तादात्विक-मूलहरयोरायत्यां नास्ति कल्याणम्, किन्त्वर्थभ्रंशेन धर्म-कामयोर्विनाश एव, कदर्यस्य त्वर्थसङ्ग्रहो राज-दायाद-तस्कराणामन्यतमस्य निधिः, न तु धर्म-कामयोर्हेतुः, अत एतत्पुरुषत्रयप्रकृतिपरिहारेण मतिमता अर्थोऽनुशीलनीयः, तथा नाजितेन्द्रियस्य कापि कार्यसिद्धिरस्ति, न कामासक्तस्य समस्ति चिकित्सितम्, न तस्य धनं धर्मः श[1]रीरं वा यस्य स्त्रीष्वत्यन्तासक्तिः, विरुद्धकामवृत्तिर्न चिरं नन्दति, अतो धर्मार्थाबाधनेन कामे प्रवर्त्तितव्यमिति पर्यालोच्य परस्पराविरोधेन धर्मार्थकामासेवनमुपदिष्टमिति ॥५०॥ तथा -

**अन्यतरबाधासम्भवे मूलाबाधा ॥५१॥ इति ।**

अमीषां धर्मार्थकामानां मध्ये अन्यतरस्य उत्तरोत्तरलक्षणस्य पुरुषार्थस्य बाधासम्भवे कुतोऽपि विषमप्रघट्टकव[2]शाद् विरोधे सम्पद्यमाने सति, किं कर्त्तव्यमित्याह- मूलाबाधा, यो यस्य पुरुषार्थस्य 'धर्मार्थकामाः त्रिवर्गः' इति क्रममपेक्ष्य मूलमादिमस्तस्य अबाधा अपीडनम्, तत्र कामलक्षणपुरुषार्थबाधायां धर्मार्थयोर्बाधा रक्षणीया,

१. शरीरं L. सं. लीं० ॥ २. वशात् निरोधे L.J. ॥

तयोः सतोः कामस्य सुकरोत्पादत्वात्, कामार्थयोस्तु बाधायां धर्म एव रक्षणीयः, धर्ममूलत्वादर्थकामयोः, अत एवोक्तम्-

*धर्मश्चेन्नावसीदेत, कपालेनापि जीवतः। आढ्योऽस्मीत्यवगन्तव्यं, धर्मवित्ता हि साधवः॥४०॥* [ ] ॥५१॥ इति । तथा-

**[२९] बलाबलापेक्षणम् ॥५२॥ इति ।**

इह बुद्धिमता मनुजेन सर्वेष्वपि कार्येषु प्रवृत्तिमादधता सता बलस्य द्रव्य-क्षेत्र-काल-भावकृतस्य आत्मसामर्थ्यस्य अबलस्य च तद्विलक्षणस्य अपेक्षणम् आलोचनम् अङ्गीकर्तव्यम्, अयथाबलमारम्भस्य क्षयसम्पदेकनिमित्तत्वात्, अत एव पठ्यते च-

*कः कालः कानि मित्राणि, को देशः कौ व्ययागमौ?। कश्चाहं का च मे शक्तिरिति चिन्त्यं मुहुर्मुहुः ॥४१॥* [ ] ॥५२॥ तथा-

[३०] अनुबन्धे प्रयत्नः ॥५३॥ इति ।

अनुबन्धे उत्तरोत्तरवृद्धिरूपे धर्मार्थकामानां प्रयत्नः यत्नातिरेकः कार्यः, अनुबन्धशून्यानि हि प्रयोजनानि वन्ध्याः स्त्रिय इव न किञ्चिद् गौरवं लभन्ते, अपि तु हीलामेवेति ॥५३॥ तथा -

[३१] कालोचितापेक्षा ॥५४॥ इति ।

यद्यत्र काले वस्तु हातुमुपादातुं वोचितं भवति तस्यात्यन्तनिपुणबुद्ध्या पर्यालोच्य अपेक्षा अङ्गीकारः कर्त्तव्या, दक्षलक्षणत्वेनास्याः सकलश्रीसमधिगमहेतुत्वात्, अत एव पठ्यते- *यः काकिणीमप्यपथप्रपन्नामन्वेषते निष्कसहस्रतुल्याम् । कालेन कोटीष्वपि मुक्तहस्तस्तस्यानुबन्धं न जहाति लक्ष्मीः ॥४२॥* [ ] मुक्तहस्त इति मुत्कलहस्तः ॥५४॥ तथा-

[३२] प्रत्यहं धर्मश्रवणम् ॥५५॥ इति ।

प्रत्यहं प्रतिदिवसं धर्मस्य इहैव शास्त्रे वक्तुं प्रस्तावितस्य कान्तकान्तासमेतयुवजन-

किन्नरारब्धगीताकर्णनोदाहरणेन श्रवणम् आकर्णनम्, धर्मशास्त्रश्रवणस्यात्यन्तगुणहेतुत्वात्, पठ्यते च-

*क्लान्तमपोज्झति खेदं तप्तं निर्वाति बुध्यते मूढम्। स्थिरतामेति व्याकुलमुपयुक्तसुभाषितं चेतः ॥४३॥*

[ ] इति ॥५५॥ तथा -

**[३३] सर्वत्रानभिनिवेशः ॥५६॥ इति।**

सर्वत्र कार्ये प्रवर्त्तमानेन बुद्धिमता अनभिनिवेशोऽभिनिवेशपरिहारः कार्यः, नीतिमार्गमनागतस्यापि पराभिभवपरिणामेन कार्यस्यारम्भोऽभिनिवेशः, नीचलक्षणं चेदं, यन्नीतिमतीतस्यापि कार्यस्य चिकीर्षणम्, पठन्ति च-

*दर्पः श्रमयति नीचान्निष्फलनयविगुणदुष्करारम्भैः। स्रोतोविलोमतरणैर्व्यसनिभिरा[१]यस्यते मत्स्यैः ॥४४॥*

[ ] ॥५६॥ तथा-

**[३४] गुणपक्षपातिता ॥५७॥ इति।**

१. प्रतिषु पाठाः - रायस्यते J मू.। रायास्यते J सं० K.L.॥

गुणेषु दाक्षिण्य-सौजन्यौदार्य-स्थैर्य-प्रियपूर्वभाषणादिषु स्वपरयोरुपकारकारणेष्वात्मधर्मेषु पक्षपातिता बहुमान-तत्प्रशंसा-साहाय्यकरणादिनाऽनुकूला प्रवृत्तिः, गुणपक्षपातिनो हि जीवा बहुमानद्वारोपजा-तावन्ध्यपुण्यप्रबन्धसामर्थ्यान्नियमादिहामुत्र च शरच्छशधरकरनिकरगौरं गुणग्राममवश्यमवाप्नुवन्ति, तद्बहुमानाशयस्य चिन्तारत्नादप्यधिकशक्तियुक्तत्वात् ॥५७॥ तथा -

**[३५] ऊहापोहादियोग इति ॥५८॥ इति ।**

ऊहश्चापोहश्च, आदिशब्दात् तत्त्वाभिनिवेशलक्षणो बुद्धिगुणः शुश्रूषा-श्रवण-ग्रहण-धारणा-विज्ञानानि च गृह्यन्ते, इत्यष्टौ बुद्धिगुणाः, तत ऊहापोहादिभिर्योगः समागमोऽनुष्ठेय इति, तत्र प्रथमतस्तावच्छ्रोतुमिच्छा शुश्रूषा, श्रवणमाकर्णनम्, ग्रहणं शास्त्रार्थोपादानम्, धारणा अविस्मरणम्, मोह-सन्देह-विपर्यासव्युदासेन ज्ञानं विज्ञानम्, विज्ञातमर्थमवलम्ब्यान्येषु व्याप्त्या तथाविधेषु वितर्कणमूहः, उक्ति-युक्तिभ्यां विरुद्धादर्थाद् हिंसादिकात् प्रत्यपायसम्भावनया व्यावर्तनमपोहः, अथवा सामान्यज्ञानमूहः विशेषज्ञानमपोहः, 'विज्ञानोहापोहविशुद्धम् इदमित्थमेव'

इति निश्चयस्तत्त्वाभिनिवेशः, एवं हि शुश्रूषादिभिर्बुद्धिगुणैरुपहितप्रज्ञाप्रकर्षः पुमान्न कदाचिदकल्याण-माप्नोति, यदुच्यते-

*जीवन्ति शतशः प्राज्ञाः, प्रज्ञया वित्तसङ्क्षये। न हि प्रज्ञाक्षये कश्चिद्, वित्ते सत्यपि जीवति ॥४५॥* इति ॥

इतिशब्दः प्रस्तुतस्य सामान्यतो गृहस्थधर्मस्य परिसमाप्त्यर्थ इति ॥५८॥ इत्थं सामान्यतो गृहस्थधर्म उक्तः, अथास्यैव फलमाह -

**एवं स्व[1]धर्मसंयुक्तं, सद् गार्हस्थ्यं करोति यः। लोकद्वयेऽप्यसौ धीमान्,सुखमाप्नोत्यनिन्दितम् ॥४॥ इति ।**

एवम् उक्तन्यायेन यः स्वधर्मो गृहस्थानां सम्बन्धी धर्मः तेन संयुक्तं समन्वितम् अत एव सत् सुन्दरं गार्हस्थ्यं गृहस्थभावं करोति विदधाति यः कश्चित् पुण्यसम्पन्नो जीवो लोकद्वयेऽपि इहलोक-परलोकरूपे, किं पुनरिहलोक एवेत्यपिशब्दार्थः, असौ सद्गार्हस्थ्यकर्त्ता धीमान् प्रशस्तबुद्धिः सुखं शर्म आप्नोति लभते अनिन्दितं शुभानुबन्धितया

१. धर्मार्थसंयुक्तं J ॥

सुधियामगर्हणीयमिति ॥४॥ यत एवं ततोऽत्रैव यत्नो विधेय इति श्लोकद्वयेन दर्शयन्नाह-

**दुर्लभं प्राप्य मानुष्यं, विधेयं हितमात्मनः। करोत्यकाण्ड एवेह, मृत्युः सर्वं न किञ्चन ॥५॥सत्येतस्मिन्नसारासु, सम्पत्स्वविहिताग्रहः । पर्यन्तदारुणासूच्चैर्धर्मः कार्यो महात्मभिः ॥६॥इति ।**

दुर्लभं दुरापं प्राप्य समासाद्य मानुष्यं मनुष्यजन्म, किमित्याह-विधेयमनुष्ठेयं सर्वावस्थासु हितमनुकूलं कल्याणमित्रयोगादि आत्मनः स्वस्य, यतः करोति अकाण्डे एव मरणानवसरे एव बाल्य-यौवन-मध्यमवयोऽवस्थारूपे इह मर्त्यलोके मृत्युः यमः सर्वं पुत्र-कलत्र-विभवादि , न किञ्चन मरणत्राणाकारणत्वेनावस्तुरूपमिति ॥५॥

सति विद्यमाने जगत्त्रितयवर्तिजन्तुजनितोपरमे एतस्मिन् मृत्यावेव असारासु मृत्युनिवारणं प्रति अक्षमासु सम्पत्सु धन-धान्यादिसम्पत्तिलक्षणासु अविहिताग्रहोऽकृतमूर्च्छः, कीदृशीषु सम्पत्स्वित्याह-पर्यन्तदारुणासु विरामसमयसमर्पितानेकव्यसनशतासु, उच्चैरत्यर्थं धर्म उक्तलक्षणः कार्यो विधेयः, कैरित्याह-महात्मभिः, महान्

प्रशस्य आत्मा येषां ते तथा तैरिति ॥६॥

इति श्रीमुनिचन्द्रसूरिविरचितायां धर्मबिन्दुप्रकरण[१]विवृतौ
सामान्यतो गृहस्थधर्मविधिः प्रथमोऽध्यायः समाप्त : ॥१॥

१. विवृत्तो J.L. ॥

## अथ द्वितीयोऽध्यायः ।

व्याख्यातः प्रथमोऽध्यायः, साम्प्रतं द्वितीयो व्याख्यायते, विशेषसम्बन्धश्चास्य स्वयमेव शास्त्रकृता भणिष्यत इति नेह दर्श्यते, एवमन्येष्वप्यध्यायेष्विति, तस्य चेदमादिसूत्रम्-

**प्रायः सद्धर्मबीजानि, गृहिष्वेवंविधेष्वलम् । रोहन्ति विधिनोप्तानि, यथा बीजानि सत्क्षितौ ।।७।। इति ।**

प्रायो बाहुल्येन सद्धर्मबीजानि सद्धर्मस्य सम्यग्ज्ञान-दर्शन-चारित्ररूपस्य बीजानि कारणानि, तानि चामूनि -

दुःखितेषु दयाऽत्यन्तमद्वेषो गुणवत्सु च। औचित्यासेवनं चैव सर्वत्रैवाविशेषतः ।।४६।। [योगदृष्टि ३२] इति ।। गृहिषु गृहस्थेषु एवंविधेषु कुलक्रमागतानिन्द्यन्यायानुष्ठानादिगुणभाजनेषु अलं स्वफलावन्ध्यकारणत्वेन अत्यर्थं रोहन्ति धर्मचिन्तादिलक्षणाङ्कुरादिमन्ति जायन्ते, उक्तं च-

*वपनं धर्मबीजस्य, सत्प्रशंसादि तद्गतम् । तच्चिन्ताद्यङ्कुरादि स्यात् फलसिद्धिस्तु निर्वृतिः ॥४७॥*

*चिन्ता-सच्छ्रुत्यनुष्ठान-देवमानुषसम्पदः । क्रमेणाङ्कुर-सत्काण्ड-नाल-पुष्पसमा मताः ॥४८॥* [ललित.]

कीदृशानि सन्ति रोहन्तीत्याह-विधिना देशनार्हबालादि-पुरुषौचित्यलक्षणेन उप्तानि निक्षिप्तानि यथेति दृष्टान्तार्थः बीजानि शालि-गोधूमादीनि सत्क्षितौ अनुपहतभूमौ विधिनोप्तानि सन्ति, प्रायोग्रहणादकस्मादेव पक्वतथाभव्यत्वे क्वचिन्मरुदेव्यादौ अन्यथाभावेऽपि न विरोध इति ॥७॥ अमुमेवार्थं व्यतिरेकत आह-

**बीजनाशो यथाऽभूमौ, प्ररोहो वेह निष्फलः। तथा सद्धर्मबीजानामपात्रेषु विदुर्बुधाः ॥८॥ इति ।**

बीजनाशो बीजोच्छेदो यथा अभूमौ ऊषरादिरूपायाम्, प्ररोहः अङ्कुराद्युद्भेदः बीजस्यैव, वा इति पक्षान्तरसूचकः, इह जगति निष्फलो धान्यादिनिष्पत्तिलक्षणफलविकलः, तथा सद्धर्मबीजानामुक्तलक्षणानां गुरुणा अनाभोगादिभिर्निक्षिप्यमाणानामपात्रेषु अनीतिकारिषु लोकेषु विदुर्जानते बुधाः नाशं निष्फलं वा प्ररोहमिति ॥८॥ आह-किमित्यपात्रेषु धर्मबीजनाशो निष्फलो वा प्ररोहः सम्पद्यते इत्याह -

**न साधयति यः सम्यगज्ञः स्वल्पं चिकीर्षितम् । अयोग्यत्वात् कथं मूढः स महत् साधयिष्यति? ॥९॥ इति ।**

न नैव साधयति निर्वर्त्तयति यो जीवः सम्यग् यथावद् अज्ञो हिताहितविभागाकुशलः स्वल्पं तुच्छं चिकीर्षितं कर्तुमिष्टं निर्वाहाद्यनुष्ठानाद्यपि, कस्मान्न साधयतीत्याह-अयोग्यत्वाद् अज्ञत्वेनानधिकारित्वात्, यथोक्तम्-*मूर्खस्य क्वचिदर्थे नाधिकारः* [ ] इति, कथं केन प्रकारेण मूढो वैचिन्त्य[१]मागतः स पूर्वोक्तो जीवो महत् परमपुरुषार्थहेतुतया बृहद् धर्मबीजारोहणादि साधयिष्यति?, सर्षपमात्रधरणासमर्थस्य मेरुगिरिधरणासमर्थत्वादिति ॥९॥

**इति सद्धर्मदेशनार्ह उक्तः, इदानीं तद्विधिमनुव[२]र्णयिष्यामः ॥१॥५९॥ इति ।**

इति एवं पूर्वोक्तगृहस्थधर्मनिरूपणेन सद्धर्मदेशनार्हो लोकोत्तरधर्मप्रज्ञापनायोग्यः उक्तो भणितः, इदानीं सम्प्रति तद्विधिं सद्धर्मदेशनाक्रमं वर्णयिष्यामो निरूपयिष्यामो वयमिति ॥१॥ तद्यथा -

१. वैचित्य J.L. । वैचित्त्य मु. ॥ २. वर्त्तयि J.L. ॥ + प्रथमोऽङ्क सर्वत्र प्रस्तुताध्यायसूत्रक्रमाङ्कः। द्वित्तीयोङ्क आदित आरभ्य सूत्रक्रमाङ्क :। एवं सर्वत्रापि अग्रेऽवसेयम् ॥

**तत्प्रकृति-देवताधिमुक्तिज्ञानम् ॥२॥६०॥ इति ।**

तस्य सद्धर्मदेशनार्हस्य जन्तोः प्रकृतिः स्वरूपं गुणवल्लोकसङ्गप्रियत्वादिका, देवताधिमुक्तिश्च बुद्ध-कपिलादिदेवताविशेषभक्तिः, तयोर्ज्ञानं प्रथमतो देशकेन कार्यम्, ज्ञातप्रकृतिको हि पुमान् रक्तो द्विष्टो मूढः पूर्वव्युद्ग्राहितश्च चेन्न भवति तदा कुशलैस्तथा तथाऽनुवर्त्य लोकोत्तरगुणपात्रतामानीयते, विदितदेवताविशेषाधिमुक्तिश्च तत्तद्देवताप्रणीतमार्गानुसारिवचनोपदर्शनेन तद्दूषणेन च सुखमेव मार्गेऽवतारयितुं शक्यते इति ॥२॥ तथा -

**साधारणगुणप्रशंसा ॥३॥६१॥ इति ।**

साधारणानां लोक-लोकोत्तरयोः सामान्यानां गुणानां प्रशंसा पुरस्कारः देशनार्हस्य अग्रतो विधेयां, यथा-

*प्रदानं प्रच्छन्नं गृहमुपगते सम्भ्रमविधिः, प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः।*
*अनुत्सेको लक्ष्म्या निरभिभवसाराः परकथाः, श्रु[१]ते चासन्तोषः कथमनभिजाते निवसति ?॥४९॥* [नीतिश०

१. श्लोकोऽयं भर्तृहरिविरचिते नीतिशतके वर्तते, किन्तु तत्र 'सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम्' इति चतुर्थः पादो वर्तते।

५७?] ॥३॥ तथा-

**सम्यक् तदधिकाख्यानम् ॥४॥६२॥ इति ।**

सम्यग् अविपरीतरूपतया तेभ्यः साधारणगुणेभ्योऽधिका विशेषवन्तः ये गुणास्तेषामाख्यानं कथनम्, यथा- *पञ्चैतानि पवित्राणि, सर्वेषां धर्मचारिणाम् । अहिंसा सत्यमस्तेयं, त्यागो मैथुनवर्जनम्* ॥५०॥ [हा०अष्टके १३।२] इति ॥४॥ तथा -

**अबोधेऽप्यनिन्दा ॥५॥६३॥ इति ।**

अबोधेऽपि अनवगमेऽपि सामान्यगुणानां विशेषगुणानां वा व्याख्यातानामप्यनिन्दा 'अहो मन्दबुद्धिर्भवान् य इत्थमाचक्षाणेष्वपि अस्मासु न बुध्यते वस्तुतत्त्वम्' इत्येवं श्रोतुस्तिरस्कारपरिहाररूपा, निन्दितो हि श्रोता किञ्चिद् बुभुत्सुरपि सन् दूरं विरज्यत इति ॥५॥ तर्हि किं कर्तव्यमित्याह-

**शुश्रूषाभावकरणम् ॥६॥६४॥ इति ।**

धर्मशास्त्रं प्रति श्रोतुमिच्छा शुश्रूषा तल्लक्षणो भावः परिणामः तस्य करणं निर्वर्तनं श्रोतुस्तैस्तैर्वचनैरिति, शुश्रूषामनुत्पाद्य धर्मकथने प्रत्युत अनर्थसम्भवः, पठ्यते च - *स खलु पिशाचकी वातकी वा यः परेऽनर्थिनि वाचमुदीरयति* [नीतिवाक्या० १०।१५९] ॥६॥ तथा -

**भूयो भूय उपदेशः ॥७॥६५॥ इति ।**

भूयो भूयः पुनः पुन उपदिश्यते इति उपदेश उपदेष्टुमिष्टवस्तुविषयः कथञ्चिदनवगमे सति कार्यः, किं न क्रियन्ते दृढसन्निपातरोगिणां पुनः पुनः क्रियाः तिक्तादिक्काथपानोपचारा इति ॥७॥ तथा -

**बोधे प्रज्ञोपवर्णनम् ॥८॥६६॥ इति ।**

बोधे सकृदुपदेशेन भूयो भूय उपदेशेन वा उपदिष्टवस्तुनः परिज्ञाने तस्य श्रोतुः प्रज्ञोपवर्णनं बुद्धिप्रशंसनम्, यथा नालघुकर्माणः प्राणिन एवंविधसूक्ष्मार्थबोद्धारो भवन्तीति ॥८॥ तथा -

**तन्त्रावतारः ॥९॥६७॥ इति ।**

तन्त्रे आगमे अवतारः प्रवेश आगमबहुमानोत्पादनद्वारेण तस्य विधेयः, आगमबहुमानश्चैवमुत्पादनीय :-

*परलोकविधौ शास्त्रात् प्रायो नान्यदपेक्षते। आसन्नभव्यो मतिमान् श्रद्धाधनसमन्वितः ॥५१॥*

*उपदेशं विनाऽप्यर्थकामौ प्रति पटुर्जनः। धर्मस्तु न विना शास्त्रादिति तत्रादरो हितः ॥५२॥*

*अर्थादावविधानेऽपि तदभावः परं नृणाम्। धर्मेऽविधानतोऽनर्थः, क्रियोदाहरणात्परः ॥५३॥*

*तस्मात् सदैव धर्मार्थी शास्त्रयत्नः प्रशस्यते। लोके मोहान्धकारेऽस्मिन्, शास्त्रालोकः प्रवर्तकः ॥५४॥*

शास्त्रयत्न इति शास्त्रे यत्नो यस्येति समासः,

*पापामयौषधं शास्त्रं, शास्त्रं पुण्यनिबन्धनम्। चक्षुः सर्वत्रगं शास्त्रं, शास्त्रं सर्वार्थसाधनम् ॥५५॥*

*न यस्य भक्तिरेतस्मिंस्तस्य धर्मक्रियाऽपि हि। अन्धप्रेक्षाक्रियातुल्या कर्मदोषादसत्फला ॥५६॥*

*यः श्राद्धो मन्यते मान्यान् अहङ्कारविवर्जितः। गुणरागी महाभागस्तस्य धर्मक्रिया परा ॥५७॥*

*यस्य त्वनादरः शास्त्रे तस्य श्रद्धादयो गुणाः। उन्मत्तगुणतुल्यत्वान्न प्रशंसास्पदं सताम् ॥५८॥*

*मलिनस्य यथाऽत्यन्तं जलं वस्त्रस्य शोधनम् । अन्तःकरणरत्नस्य तथा शास्त्रं विदुर्बुधाः ॥५९॥*

*शास्त्रे भक्तिर्जगद्वन्द्यैर्मुक्तिदूती परोदिता । अत्रैवेयमतो न्याय्या तत्प्राप्त्यासन्नभावतः ॥६०॥* [योगबिन्दौ २२१-३०] अत्रैव इति मुक्तौ एव, इयमिति शास्त्रभक्तिः, तत्प्राप्त्यासन्नभावत इति मुक्तिप्राप्तिसमीपभावात् इति ॥९॥ तथा -

**प्रयोग आक्षेपण्याः ॥१० ॥६८॥ इति ।**

प्रयोगो व्यापारणं धर्मकथाकाले आक्षिप्यन्ते आकृष्यन्ते मोहात् तत्त्वं प्रति भव्यप्राणिनोऽनयेत्याक्षेपणी, तस्याः कथायाः, सा च आचार-व्यवहार-प्रज्ञप्ति-दृष्टिवादभेदाच्चतुर्धा, तत्राचारो लोचाऽस्नानादिसाधुक्रियारूपः, व्यवहारः कथञ्चिदापन्नदोषव्यपोहाय प्रायश्चित्तलक्षणः, प्रज्ञप्तिः संशयापन्नस्य मधुरवचनैः प्रज्ञापनम्, दृष्टिवादश्च श्रोत्रपेक्षया सूक्ष्म-जीवादिभावकथनमिति ॥१०॥ तथा-

**ज्ञानाद्याचारकथनम् ॥११ ॥६९॥ इति ।**

ज्ञानस्य श्रुतलक्षणस्य आचारः ज्ञानाचारः, आदिशब्दाद् दर्शनाचारश्चारित्राचारस्तपाचारो वीर्याचारश्चेति । ततो ज्ञानाद्याचाराणां कथनं प्रज्ञापनमिति समासः । तत्र ज्ञानाचारोऽष्टधा काल-विनय-बहुमानोपधाना-ऽनिह्नव-व्यञ्जना-ऽर्थ-तदुभय-भेदलक्षणः, तत्र काल इति यो यस्य अङ्गप्रविष्टादेः श्रुतस्य काल उक्तस्तस्मिन्नेव तस्य स्वाध्यायः कर्त्तव्यो नान्यदा तीर्थकरवचनात्, दृष्टं च कृष्यादेः कालकरणे फलम्, विपर्यये तु विपर्यय इति १। तथा श्रुतग्रहणं कुर्वता गुरोर्विनयः कार्यः, विनयो ह्यभ्युत्थान-पादधावनादिः,अविनयगृहीतं हि तदफलं भवति २। तथा श्रुतग्रहणोद्यतेन गुरोर्बहुमानः कार्यः, बहुमानो नामाऽऽन्तरो भावप्रतिबन्धः ३, एतस्मिन् सति अक्षेपेणाविकलं श्रुतं भवति, अत्र च विनयबहुमानयोश्चतुर्भङ्गी भवति-एकस्य विनयो न बहुमानः १, अपरस्य बहुमानो न विनयः २, अन्यस्य विनयोऽपि बहुमानोऽपि ३, अन्यतरस्य न विनयो नापि बहुमान ४ इति ३। तथा श्रुतग्रहणमभीप्सतोपधानं कार्यम्, उपदधाति पुष्णाति श्रुतमित्युपधानं तपः, तद्धि यद्यत्राध्ययने आगाढादियोगलक्षणमुक्तं तत् तत्र कार्यम्, तत्पूर्वकश्रुतग्रहणस्यैव सफलत्वात् ४। 'अनिह्नवः' इति गृहीतश्रुतेनानिह्नवः कार्यः, यद् यत्सकाशेऽधीतं तत्र स एव कथनीयो नान्यः,

चित्तकालुष्यापत्तेरिति ५। तथा श्रुतग्रहणप्रवृत्तेन तत्फलमभीप्सता व्यञ्जनभेदोऽर्थभेद उभयभेदश्च न कार्यः, तत्र व्यञ्जनभेदो यथा - 'धम्मो मंगलमुक्किट्ठं [दशवै.१।१] इति[1] वक्तव्ये 'पुन्नो कल्लाणमुक्कोसं' इत्याह, अर्थभेद[2]स्तु यथा - 'आवंती केयावंती लोगंसि विप्परामुसंति[3]' [आचा.१।५।१४७] इत्यत्राऽऽचारसूत्रे 'यावन्तः केच[4]न लोके अस्मिन्

१. इत्यादि L. ॥ २. ''वंजणमभिंदमाणो अवंतिमादण्ण अत्थे गुरुगो उ..... ॥१९॥ वंजणं सुत्तं, अण्णहाकरणं भेदो, ण भिंदमाणो अभिंदमाणो, अविणासंतो त्ति भणितं होति, तेसु चेव वंजणेसु अण्णं अत्थं विकप्पयति, कहं? जहा अवंतिमादण्णे ति, अवंती केयावंती लोगंसि समणा य माहणा य विप्परामुसंति (आचा. १।५।१४७)। ति अवंति णाम जणवओ, केया रज्जु, वंती णाम पडिया कूवे, लोयंसि णाया जहा कूवे केया पडिता, ततो धावंति समणा भिक्खुगाइ, माहणा धिज्जाइया, ते समणमाहणा कूवे ओयरिउं पाणियमज्झे विविहं परामुसंति'' इति निशीथचूर्णौ पीठिकायाम् पृ. १३॥

''श्रुतप्रवृत्तेन तत्फलमभीप्सता व्यञ्जनभेदोऽर्थभेद उभयभेदश्च न कार्य इति। तत्र व्यञ्जनभेदो यथा 'धम्मो मंगलमुक्किट्ठं' इति वक्तव्ये 'पुण्णं कल्लाणमुक्कोसं' इति। ३. अर्थभेदस्तु यथा - ''आवंती केयावंती लोगंसि विप्परामुसंति'' (आचा. १।५।१४७) इत्यत्राचारसूत्रे 'यावन्तः केचन लोके अस्मिन् पाखण्डिलोके विपरामृशन्ति' इत्येवंविधार्थाभिधाने 'अवन्तिजनपदे केया रज्जुर्वान्ता पतिता लोकः परामृशति कूपे' इत्याह। उभयभेदस्तु द्वयोरपि याथात्म्योपमर्देन यथा ''धर्मो मङ्गलमुत्कृष्टः अहिंसा पर्वतमस्तके'' इत्यादि। दोषश्चात्र व्यञ्जनभेदेऽर्थभेदः, तद्भेदे क्रियायाः भेदः, तद्भेदे मोक्षाभावः, तदभावे च निरर्थिका दीक्षेति'' इति दशवैकालिकसूत्रस्य हरिभद्रसूरिविरचितायां वृत्तौ तृतीयाध्ययने । ४. केचनो इति सर्वेषु हस्तलिखितादर्शेषु पाठः ॥

पाषण्डिलोके विपरामृशन्ति' इत्यर्थाभिधाने 'आवन्तीजनपदे केया रज्जूः वन्ता लोकः परामृशति कूपे' इत्याह, उभयभेदस्तु द्वयोरपि याथात्म्योपमर्दे यथा- 'धर्मो मङ्गलमुत्कृष्टः अहिंसा पर्वतमस्तके' इत्यादि, दोषश्चात्र व्यञ्जनभेदेऽर्थभेदः, तद्भेदे क्रियायाः, क्रियाभेदे च मोक्षाभावः, तदभावे च नि[1]रर्थिका दीक्षेति ।

दर्श[2]नाचारोऽपि निःशङ्कित-निःकाङ्क्षित-निर्विचिकित्सा-ऽमूढदृष्टि-उपबृंहा-स्थिरीकरण-वात्सल्य-

---

१. निरर्थका J.K. ॥ २. निस्संकिय निक्कंखिय निव्वितिगिच्छा अमूढदिट्ठी य। उववूह थिरीकरणे वच्छल्ल पभावणे अट्ठ ॥ निस्संकीत्यादि । निःशङ्कित, इत्यत्र शङ्का शङ्कितम्, निर्गतं शङ्कितं यतोऽसौ निःशङ्कितः देश- सर्वशङ्कारहित इत्यर्थः। तत्र देशशङ्का समाने जीवत्वे कथमेको भव्योऽपरस्त्वभव्य इति शङ्कते। सर्वशङ्का तु 'प्राकृतनिबद्धत्वात् सकलमेवेदं परिकल्पितं भविष्यति' इति। न पुनरालोचयति यथा-भावा हेतुग्राह्या, अहेतुग्राह्याश्च तत्र हेतुग्राह्या जीवास्तित्वादय, अहेतुग्राह्या भव्यत्वादयः, अस्मदाद्यपेक्षया प्रकृष्टज्ञानगोचरत्वात् तद्धेतूनामिति प्राकृतनिबन्धोऽपि बालादिसाधारण इति। उक्तं च-

*"बाल-स्त्री-मूढ-मूर्खाणां नृणां चारित्रकाङ्क्षिणाम्। अनुग्रहार्थं तत्त्वज्ञैः सिद्धान्तः प्राकृतः स्मृतः"* [ ] *दृष्टेष्टाविरुद्धाच्चेति उदाहरणं* चात्र पेयापेयकौ यथावश्यके। ततश्च निःशङ्कितो जीव एवार्हच्छासन-प्रतिपन्नो दर्शनाचरणात् तत्प्रधानविवक्षया दर्शनाचार उच्यते। अनेन दर्शन-दर्शनिनोरभेदमाह, तदेकान्तभेदे त्वदर्शनिन इव तत्फलाभावात् मोक्षाभाव इति । एवं शेषपदेष्वपि भावना कार्येति ।

तीर्थप्रभावना-भेदादष्टधैव, तत्र निःशङ्कित इति शङ्कनं शङ्कितम्, निर्गतं शङ्कितं यतोऽसौ निःशङ्कितः, देश-सर्वशङ्कारहित इत्यर्थः, तत्र देशे शङ्का 'समाने जीवत्वे कथमेको भव्यः, अपरस्तु अभव्यः इति शङ्कते, सर्वशङ्का तु 'प्राकृतनिबद्धत्वात् सकलमेवेदं परिकल्पितं भविष्यति' इति, न पुनरालोचयति यथा- भावा हेतु[१]ग्राह्या

---

तथा निष्काङ्क्षितो देश-सर्वकाङ्क्षारहितः। तत्र देशकाङ्क्षा एकं दर्शनं काङ्क्षति दिगम्बरदर्शनादि, सर्वकाङ्क्षा तु सर्वाण्येवेति। नालोचयति षड्जीवनिकायपीडामसत्परूपणां च। उदाहरणं चात्र राजामात्यौ यथावश्यक इति।

विचिकित्सा मतिविभ्रमः, निर्गता विचिकित्सा मतिविभ्रमो यतोऽसौ निर्विचिकित्सः, 'साध्वेव जिनदर्शनम्, किन्तु प्रवृत्तस्यापि सतो ममास्मात् फलं भविष्यति, न भविष्यति इति, क्रियायाः कृषिवलादिषूभयोपलब्धेः' इति विकल्परहितः, न ह्यविकल उपाय उपायवस्तुपरिप्रापको न भवतीति स जातनिश्चयो निर्विचिकित्स उच्यते....यद्वा निर्विज्जुगुप्सः साधुजुगुप्सा-रहितः....। तथा अमूढदृष्टिश्च बालतपस्वितपोविद्यातिशयदर्शनैर्न मूढा स्वरूपान्न चलिता दृष्टिः सम्यग्दर्शनरूपा यस्यासावमूढदृष्टिः...। एतावान् गुणिप्रधानो दर्शनाचारनिर्देशः, अधुना गुणप्रधान उपबृंहण-स्थिरीकरणे इति।...उपबृहणं नाम समानधार्मिकाणां सद्गुणप्रशंसनेन तद्वृद्धि-करणम्, स्थिरीकरणं तु धर्माद् विषीदतां सतां तत्रैव स्थापनम् ....। ....वात्सल्यं समानधार्मिकप्रीत्युपकारकरणम् प्रभावना धर्मकथादि-भिस्तीर्थख्यापनेति....। गुणप्रधानश्चायं निर्देशो गुणगुणिनोः कथञ्चिद्-भेदख्यापनार्थः, एकान्ताभेदे तन्निवृत्तौ गुणिनोऽपि निवृत्तेः शून्यतापत्तिरिति गाथार्थः। इति दशवैकालिकसूत्रस्य हरिभद्रसूरिविरचितायां वृत्तौ तृतीयाध्ययने।

१. हेतुग्राह्या अहेतुग्राह्याश्च तत्र L.K. मू. मध्ये नास्ति ॥

अहेतुग्राह्याश्च, तत्र हेतुग्राह्या जीवास्तित्वादयः, अहेतुग्राह्या भव्यत्वादयः, अस्मदाद्यपेक्षया प्रकृष्टज्ञानगोचरत्वात् तद्धेतूनामिति प्राकृतनिबन्धोऽपि बालादिसाधारण इति, उक्तं च -

*बाल-स्त्री-मूढ-मूर्खाणां नृणां चारित्रकाङ्क्षिणाम् । अनुग्रहार्थं तत्त्वज्ञैः, सिद्धान्तः प्राकृतः स्मृतः ॥६१॥*

दृष्टेष्टाविरुद्धत्वाच्च नायं परिकल्पनागोचरः, ततश्च निःशङ्कितो जीव एवार्हच्छासनप्रतिपन्नो दर्शनाचार इत्युच्यते, अनेन दर्शनदर्शनिनोरभेदोपचारमाह, तदेकान्तभेदे त्वदर्शनिन इव फलाभावान्मोक्षाभाव इति, एवं शेषपदेष्वपि भावना कार्या १। तथा निष्काङ्क्षितो देशसर्वकाङ्क्षारहितः, तत्र देशकाङ्क्षा एकं दर्शनं काङ्क्षते दिगम्बरदर्शनादि, सर्वकाङ्क्षा तु सर्वाण्येवेति, नालोकयति षड्जीवनिकायपीडामसत्प्ररूपणां चेति २। विचिकित्सा मतिविभ्रमः, निर्गता विचिकित्सा यस्मादसौ निर्विचिकित्सः, साध्वेव जिनदर्शनम्, किन्तु प्रवृत्तस्यापि सतो ममास्मात् फलं भविष्यति वा न वा, कृषीवलादिक्रियासूभयथाऽप्युपलब्धेः इति कुविकल्परहितः, न ह्यविकल उपाय उपेयवस्तुपरिप्रापको न भवतीति

सञ्जातनिश्चय इत्यर्थः, यद्वा निर्विज्जु[1]गुप्सः साधुजुगुप्सारहितः ३, तथा अमूढदृष्टिः, बाल-तपस्वितपोविद्याद्यतिशयैर्न मूढा स्वभावान्न चलिता दृष्टिः सम्यग्दर्शनरूपा यस्यासौ अमूढदृष्टिः ४, एतावान् गुणिप्रधानो दर्शनाचारनिर्देशः। अधुना गुणप्रधानः- उपबृंहणं नाम समानधार्मिकाणां सद्गुणप्रशंसनेन तद्वृद्धिकरणम् ५, स्थिरीकरणं धर्माद्विषीदतां तत्रैव स्थापनम् ६, वात्सल्यं समानधार्मिकजनोपकारकरणम् ७, प्रभावना धर्मकथादिभिस्तीर्थख्यापनेति ८, गुणप्रधानश्चायं निर्देशो गुणगुणिनोः कथञ्चिद्भेदख्यापनार्थम्, एकान्ताभेदे गुणनिवृत्तौ गुणिनोऽपि निवृत्तेः शून्यातापत्तिरिति ।

चारित्राचारोऽप्यष्टधा पञ्चसमिति-त्रिगुप्तिभेदात्, समिति-गुप्तिस्वरूपं च प्रतीतमेव। तपआचारस्तु द्वादशविधः बाह्याभ्यन्तरतपःषट्कद्वयभेदात्, तत्र

---

१. निर्विजुगुप्सः L.J. । ''विदुकुच्छत्ति व भणति सा पुण....॥२५॥ विदु साहू कुच्छति गरहति निन्दतीत्यर्थः, व इति बितियकप्पदरिसणे, भण्णइ त्ति भणियं होति। सा इति सा विदुगुंच्छा, पुण सद्दो विसेसणत्थे दट्ठव्वो'' इति निशीथचूर्णौ पीठिकायाम् पृ. १६। ''आगमे तु विचिकित्सा विद्वज्जुगुप्सा वेत्यभिहितं तदिहापि सम्भवत्येव । विद्वांसः साधवो विदितसंसारस्वभावाः परित्यक्तसमस्तसङ्गाः, तेषां जुगुप्सा निन्दा'' इति सिद्धसेनगणिविरचितायां तत्त्वार्थवृत्तौ ७।१८।पृ.९९॥ ''अथवा विद्वज्जुगुप्सा, विद्वांसः साधवो विदितसंसारस्वभावाः परित्यक्तसमस्तसङ्गाः, तेषां जुगुप्सा निन्दा'' इति आवश्यकसूत्रस्य षष्ठेऽध्ययने'' हरिभद्रसूरिविरचितायां वृत्तौ ॥

*अनशनमूनोदरता वृत्तेः संक्षेपणं रसत्यागः । कायक्लेशः संलीनतेति बाह्यं तपः प्रोक्तम् ॥६२॥*

*प्रायश्चित्तध्याने वैयावृ[१]त्यविनयावथोत्सर्गः। स्वाध्याय इति तपः षट्प्रकारमाभ्यन्तरं भवति ॥६३॥* [प्रशम. १७५-१७६]

वीर्याचारः पुनः अनिह्नुतबाह्याभ्यन्तरसामर्थ्यस्य सतोऽनन्तरोक्तषट्त्रिंशद्वि[२]धे ज्ञान-दर्शनाद्याचारे यथाशक्ति प्रतिपत्तिलक्षणं पराक्रमणं प्रतिपत्तौ च यथाबलं पालनेति ॥११॥ तथा -

**निरीहशक्यपालना ॥१२॥७०॥ इति ।**

निरीहेण ऐहिक-पारलौकिकफलेषु राज्य-देवत्वादिलक्षणेषु व्यावृत्ताभिलाषेण शक्यस्य ज्ञानाचारादेः 'विहितमिदम्' इति बुद्ध्या पालना कार्येति च कथ्यते इति ॥१२॥ तथा-

**अशक्ये भावप्रतिपत्तिः ॥१३॥७१॥ इति ।**

१. वृत्य L. ॥ २. 'द्विधज्ञान' J सं. L ॥

अशक्ये ज्ञानाचारादिविशेष एव कर्तुमपार्यमाणे कुतोऽपि धृति-संहनन-काल-बलादिवैकल्याद् भावप्रतिपत्तिः, भावेन अ[१]न्तःकरणेन प्रतिपत्तिरनुबन्धः, न पुनस्तत्र प्रवृत्तिरपि, अकालौत्सुक्यस्य तत्त्वत आर्त्तध्यानत्वादिति ॥१३॥ तथा-

**पालनोपायोपदेशः ॥१४॥७२॥ इति ।**

एतस्मिन् ज्ञानाद्याचारे प्रतिपन्ने सति पालनाय उपायस्य अधिकगुण-तुल्यगुणलोकमध्यसंवासलक्षणस्य निजगुणस्थानकोचितक्रियापरिपालनानुस्मरणस्वभावस्य चोपदेशो दातव्य इति ॥१४॥

**फलप्ररूपणा ॥१५॥७३॥ इति ।**

अस्याचारस्य सम्यक्परिपालितस्य सतः फलम् इहैव तावदुपप्लवह्रासो भावैश्वर्यवृद्धिर्जनप्रियत्वं च परत्र च सुगतिजन्मोत्तमस्थानलाभः परम्परया निर्वाणावाप्तिश्चेति यत् कार्यं तस्य प्ररूपणा प्रज्ञापना विधेयेति ॥१५॥

१. अन्तःकरणप्रतिपत्तिः K मू० J. ॥

अत्रैव विशेषमाह -

**देवर्द्धिवर्णनम् ॥१६ ॥७४॥ इति ।**

देवानां वैमानिकानाम् ऋद्धेः विभूतेः रूपादिलक्षणाया वर्णनं प्रकाशनम्, यथा तत्रोत्तमा रूपसम्पत् सत्स्थिति-प्रभाव-सुख-द्युति-लेश्यायोगः विशुद्धेन्द्रियावधित्वं प्रकृष्टानि भोगसाधनानि दिव्यो विमाननिवह इत्यादि व[1]क्ष्यमाणमेव ॥१६॥ तथा-

**सुकुलागमनोक्तिः ॥१७॥७५॥ इति ।**

देवस्थानाच्च्युतावपि विशिष्टे देशे विशिष्टे काले निष्कलङ्के अन्वये उदग्रे सदाचारेणाख्यायिकापुरुषयुक्ते अनेकमनोरथापूरकम् अत्यन्तनिरवद्यं जन्म इत्यादिर्वक्ष्य[2]माणलक्षणैवउक्तिः ॥१७॥ तथा -

**कल्याणपरम्पराख्यानम् ॥१८॥७६॥ इति ।**

१. २. दृश्यतां सप्तमेऽध्याये ॥

ततः सुकुलागमनादुत्तरं कल्याणपरम्परायाः 'तत्र सुन्दरं रूपम्, आलयो लक्षणानाम्, रहितम् आमयेन' इत्यादिरूपाया अत्रैव धर्मफलाध्याये व[१]क्ष्यमाणाया आख्यानं निवेदनं कार्यमिति ॥१८॥ तथा -

**असदाचारगर्हा ॥१९ ॥७७॥ इति ।**

असदाचारः सदाचारविलक्षणो हिंसानृतादिर्दशविधः पाप-हेतुभेदरूपः, यथोक्तम्-

*हिंसानृतादयः पञ्च, तत्त्वाश्रद्धानमेव च । क्रोधादयश्च चत्वार, इति पापस्य हेतवः ॥६४॥* [शास्त्रवार्ता. ४]

तस्य गर्हा असदाचारगर्हा, यथा-

*न मिथ्यात्वसमः शत्रुर्न मिथ्यात्वसमं विषम् । न मिथ्यात्वसमो रोगो न मिथ्यात्वसमं तमः ॥६५॥*

*द्विषद्-विष-तमो-रोगैर्दुःखमेकत्र[२] दीयते । मिथ्यात्वेन दुरन्तेन जन्तोर्जन्मनि जन्मनि ॥६६॥*

*वरं ज्वालाऽऽकुले क्षिप्तो देहिनाऽऽत्मा हुताशने । न तु मिथ्यात्वसंयुक्तं जीवितव्यं कदाचन ॥६७॥* [ ]

१. सप्तमेऽध्याये ॥ १. एकत्र एकस्मिन् जन्मनीत्यर्थः ॥

इति तत्त्वाश्रद्धानगर्हा । एवं हिंसादिष्वपि गर्हायोजना कार्या ॥१९॥ तथा -

**तत्स्वरूपकथनम् ॥२०॥७८॥ इति ।**

तस्य असदाचारस्य हिंसादेः स्वरूपकथनम्, *यथा प्रमत्तयोगात् प्रा[1]णव्यपरोपणं हिंसा, असदभिधानं मृषा, अदत्तादानं स्तेयम्, मैथुनमब्रह्म, मूर्च्छा परिग्रहः* [तत्त्वार्थसू .७./८-९-१०-११-१२] इत्यादि ॥२३॥ तथा-

**स्वयं परिहारः ॥२१ ॥७९॥ इति ॥**

स्वयम् आचारकथकेन परिहारोऽसदाचारस्य सम्पादनीयः, यतः स्वयमसदाचारमपरिहरतो धर्मकथनं नटवैराग्यकथनमिवानादेयमेव स्यात्, न तु साध्यसिद्धिकर[2]मिति ॥२१॥ तथा-

**ऋजुभावाऽऽसेवनम् ॥२२ ॥८०॥ इति ।**

ऋजुभावस्य कौटिल्यत्यागरूपस्य आसेवनम् अनुष्ठानं देशकेनैव कार्यम्, एवं हि तस्मिन्नविप्रतारणकारिणि

१. 'प्राणव्यपरोपणं हिंसा, असदभिधानमनृतम्' इति तत्त्वार्थसूत्रे सप्तमेऽध्याये पाठः ॥ २. 'करणमिति L.K. ॥

सम्भाविते सति शिष्यस्तदुपदेशान्न कुतोऽपि दूरवर्ती स्यादिति ॥२२॥ तथा-

**अपायहेतुत्वदेशना ॥२३ ॥८१॥ इति ।**

अपायानाम् अनर्थानाम् इहलोक-परलोकगोचराणां हेतुत्वं प्रस्तावादसदाचारस्य यो हेतुभावः तस्य देशना विधेया, यथा-

*यन्न प्रयान्ति पुरुषाः स्वर्गं यच्च प्रयान्ति विनिपातम् । तत्र निमित्तमनार्यः प्रमाद इति निश्चितमिदं मे ॥६८॥*

प्रमादश्चासदाचार इति ॥२३॥ अपायानेव व्यक्तीकुर्वन्नाह-

**नारकदुःखोपवर्णनम् ॥२४ ॥८२॥ इति ।**

नरके भवा नारकाः, तेषामुपलक्षणत्वात् तिर्यगादीनां च दुःखानि अशर्माणि, तेषामुपवर्णनं विधेयम्, यथा-

*तीक्ष्णैरसिभिर्दीप्तैः कुन्तैर्विषमैः परश्वधैश्चक्रैः। परशु-त्रिशूल-मुद्गर-तोमर-वासी-मुषण्ढीभि ः ॥६९॥*

*सम्भिन्नतालुशिरसश्छिन्नभुजाश्छिन्नकर्णनासौष्ठाः। भिन्न-हृदयोदरान्त्रा भिन्नाक्षिपुटाः सुदुःखार्त्ताः ॥७०॥*

*निपतन्त उत्पतन्तो विचेष्टमाना महीतले दीनाः। नेक्षन्ते त्रातारं नैरयिकाः कर्मपटलान्धाः ॥७१॥*

*क्षुत्-तृड्-हिमात्युष्ण-भयार्दितानां पराभियोगव्यसनातुराणाम् ।*

*अहो तिरश्चामतिदुःखितानां सुखानुषङ्गः किल वार्त्तमेतत् ॥७२॥*

*मानुष्यकेऽपि दारिद्र्य-रोग-दौर्भाग्य-शोक-मौर्ख्याणि। जाति-कुला-ऽवयवादिन्यूनत्वं चाश्नुते प्राणी ॥७३॥*

*देवेषु च्यवन-वियोगदुःखितेषु क्रोधेर्ष्या-मद-मदनातितापितेषु ।*

*आर्या! नस्तदिह विचार्य सङ्गिरन्तु यत् सौख्यं किमपि निवेदनीयमस्ति ॥७४॥* [ ] इति ॥२४॥ तथा-

**दुष्कुलजन्मप्रशास्तिः ॥२५ ॥८३॥ इति ।**

दुष्कुलेषु शक-यवन-शबर-बर्बरादिसम्बन्धिषु यज्जन्म असदाचाराणां प्राणिनां प्रादुर्भावः तस्य प्रशास्तिः प्रज्ञापना कार्या ॥२५॥ तत्र चोत्पन्नानां किमित्याह-

**दुःखपरम्परानिवेदनम् ॥२६॥८४॥ इति ।**

दुःखानां शारीर-मानसाशर्मलक्षणानां या परम्परा प्रवाहः तस्या निवेदनं प्ररूपणम्, यथा असदाचारपारवश्याज्जीवा दुष्कुलेषूत्पद्यन्ते, तत्र चासुन्दरवर्ण-रस-गन्ध-स्पर्श-शरीरभाजां तेषां दुःखनिराकरणनिबन्धनस्य धर्मस्य स्वप्नेऽप्यनुपलम्भाद् हिंसा-ऽनृत-स्ते[1]याद्यशुद्धकर्मकरणप्रवणानां नरकादिफलः पाप-कर्मोपचय एव सम्पद्यते, तदभिभूतानामिह परत्र चाव्यवच्छिन्नानुबन्धा दुःखपरम्परा प्रसूयते, य[2]दौच्यत-

*तैः कर्मभिः स जीवो विवशः संसारचक्रमुपयाति । द्रव्य-क्षेत्रा-ऽद्धा-भावभिन्नमावर्तते बहुशः ॥७५॥* [ ]

॥२६॥ तथा-

**उपायतो मोहनिन्दा ॥२७॥८५॥ इति ।**

उपायत उपायेन अनर्थप्रधानानां मूढपुरुषलक्षणानां प्रपञ्चनरूपेण मोहस्य मूढताया निन्दा अनादरणीयताख्यापनेति, यथा-

१. 'स्तेयाद्विशुद्ध J मू. । स्तेयाद्यशुद्ध J सं. । स्तेयाशुद्ध L.K. ॥. २. यदुच्यते J सं. ॥

*अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च। कर्म चारभते दुष्टं तमाहुर्मूढचेतसम् ॥७६॥* [महाभारते उद्योगपर्वणि ५/३३/३३]

*अर्थवन्त्युपपन्नानि वाक्यानि गुणवन्ति च। नैव मूढो विजानाति मुमूर्षुरिव भैषजम् ॥७७॥* [म[१]हाभारते उद्योगपर्वणि ५/१३२/३]

*सम्प्राप्तः पण्डितः कृच्छ्रं प्रज्ञया प्रतिबुध्यते। मूढस्तु कृच्छ्रमासाद्य शिलेवाम्भसि मज्जति ॥७८॥* [ ]

अथवोपायतो मोहफलोपदर्शनद्वारलक्षणाद् मोहनिन्दा कार्येति,

*जन्म-मृत्यु-जरा-व्याधि-रोग-शोकाद्युपद्रुतम्। वीक्षमाणा अपि भवं नोद्विजन्त्यतिमोहतः ॥७९॥* [योगदृष्टि० ७९]

*धर्मबीजं परं प्राप्य मानुष्यं कर्मभूमिषु । न सत्कर्मकृषावस्य प्रयतन्तेऽल्पमेधसः ॥८०॥* [योगदृष्टि० ८३]

१. अर्थवन्त्युपपन्नानि वाक्यानि गुणवन्ति च। नैव सम्प्राप्नुवन्ति त्वां मुमूर्षमिव भेषजम्॥ इति महाभारते पाठः॥

अस्येति धर्मबीजस्य ।

*बडिशामिषवत् तुच्छे कुसुखे दारुणोदये। सक्तास्त्यजन्ति सच्चेष्टां धिगहो दारुणं तमः ॥८१॥* [योगदृष्टि० ८४] ॥२७॥ इति ॥ तथा-

**सज्ज्ञानप्रशंसनम् ॥२८ ॥८६॥ इति ।**

सद् अविपर्यस्तं ज्ञानं यस्य स सज्ज्ञानः पण्डितो जनः तस्य, सतो वा ज्ञानस्य विवेचनलक्षणस्य प्रशंसनं पुरस्कार इति, यथा-

*तन्नेत्रैस्त्रिभिरीक्षते न गिरीशो नो पद्मजन्माऽष्टभिः, स्कन्दो द्वादशभिर्न वा न मघं[1] वांश्चक्षुःसहस्रेण चं ।*

---

१. ''मघवा बहुलम् ६।४।१२८॥ मघवन् शब्दस्य वा तृ इत्यन्तादेशः स्यात्। ऋ इत्। उगिदचां सर्वनामस्थानेऽधातोः ७।१। ७०॥ अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्यात् सर्वनामस्थाने परे। उपधादीर्घः। मघवान्। इह दीर्घे। तथा च। ''हविर्जक्षिति निःशङ्को मघवानसौ इति भट्टिः। मघवन्तौ। मघवन्तः। मघवन्तम्। मघवन्तौ। मघवतः। मघवता। मघवद्भ्यामित्यादि। तृत्वाभावे मघवा। छन्दसीवनिपौ...। अन्तोदात्तं...। मघवानौ। मघवानः सुटि राजवत्।'' इति पाणिनीयव्याकरणस्य सिद्धान्तकौमुद्याम्।

''इन्द्रो हरिर्दुश्च्यवनोऽच्युताग्रजो वज्री बिडौजा मघवान् पुरन्दरः। प्राचीनबर्हिः पुरुहूतवासवौ सङ्क्रन्दनाऽऽखण्डलमेघवाहनः।२।१७१॥

*सम्भूयापि जगत्त्रयस्य नयनैस्तद्वस्तु नो वीक्ष्यते प्रत्याहृत्य दृशः समाहितधियः पश्यन्ति यत् पण्डिताः ॥८२॥* [ ] इति । तथा-

*नाप्राप्यमभिवाञ्छन्ति, नष्टं नेच्छन्ति शोचितुम् । आपत्सु च न मुह्यन्ति, नराः पण्डितबुद्धयः ॥८३॥* [महाभारते उद्योगपर्वणि ५/३३/२३]

*न हृष्यत्यात्मनो माने, नापमाने च रुष्यति । गाङ्गो ह्रद इवाक्षोभ्यो, यः स पण्डित उच्यते ॥८४॥* [म[१]हाभारते उद्योगपर्वणि ५/३३/२६] ॥२८॥ तथा-

**पुरुषकारसत्कथा ॥२९॥८७॥ इति ।**

पुरुषकारस्य उच्छा[त्सा]हलक्षणस्य सत्कथा माहात्म्य-प्रशंसनम्, यथा-

---

पृतनाषाडुग्रधन्वा मरुत्वान् मघवाऽस्य तु । ''द्विषः पाकोऽद्रयो वृत्रः पुलोमा नमुचिर्बलः २।१७८॥'' इति हेमचन्द्राचार्यविरचितायाम् अभिधानचिन्तामणिनाममालायाम् ॥

१ ''न हृष्यत्यात्मसम्माने नावमानेन (नापमाने च K1 प्रत्यन्तरे) तप्यते । गाङ्गो ह्रद इवाक्षोभ्यो यः स पण्डित उच्यते'' ॥ इति महाभारते पाठः ॥

*दुर्गा तावदियं समुद्रपरिखा तावन्निरालम्बनं व्योमैतन्ननु तावदेव विषमः पातालयात्रागमः।*
*दत्त्वा मूर्द्धनि पादमुद्यमभिदो दैवस्य कीर्तिप्रियैः वीरैर्यावदहो न साहसतुलामारोप्यते जीवितम् ॥८५॥* [ ]

तथा-

*विहाय पौरुषं कर्म, यो दैवमनुवर्त्तते । तद्धि शाम्यति तं प्राप्य, क्लीबं पतिमिवाङ्गना ॥८६॥* इति । तथा-

**वीर्यर्द्धिवर्णनम् ॥३०॥८८॥ इति ।**

वीर्यर्द्धेः वीर्यप्रकर्षरूपायाः शुद्धाचारबललभ्यायाः तीर्थकरवीर्यपर्यवसानाया वर्णनमिति, यथा-
*मेरुं दण्डं धरां छत्रं, यत् केचित् कर्तुमीशते । तत् सदाचारकल्पद्रुफलमाहुर्महर्षयः ॥८७॥* ॥३०॥ तथा-

**परिणते गम्भीरदेशनायोगः ॥३१॥८९॥ इति ।**

अस्मिन् पूर्वमुद्दिष्टे उपदेशजाले श्रद्धान-ज्ञाना-ऽनुष्ठानवत्तया परिणते सा[१]त्मीभावमुपगते सति उपदेशार्हस्य

१. सात्मीयभाव K ॥

जन्तोर्गम्भीरायाः पूर्वदेशनापेक्षया अत्यन्तसूक्ष्माया आत्मास्तित्व-तद्बन्ध-मोक्षादिकाया देशनाया योगो व्यापारः कार्यः, इदमुक्तं भवति, यः पूर्वं साधारणगुणप्रशंसादिरनेकधोपदेशः प्रोक्त आस्ते स यदा तदावारककर्महासातिशयादङ्गाङ्गीभावलक्षणं परिणाममुपगतो भवति तदा जीर्णे भोजनमिव गम्भीरदेशनायामसौ देशनार्होऽवता[१]र्यते इति ॥३१॥ अयं च गम्भीरदेशनायोगो न श्रुत[२]धर्मकथनमन्तरेणोपपद्यते इत्याह-

**श्रुतधर्मकथनम् ॥३२॥९०॥ इति ।**

श्रुतधर्मस्य वाचना-प्रच्छना-परावर्तना-ऽनुप्रेक्षा-धर्मकथन-लक्षणस्य सकलकुशलकलापकल्प-द्रुमविपुलालवालक[३]ल्पस्य कथनं कार्यम्, यथा-

*चक्षुष्मन्तस्त एवेह, ये श्रुतज्ञानचक्षुषा । सम्यक् सदैव पश्यन्ति, भावान् हेयेतरान्नराः ॥८८॥* ॥३२॥

अयं च श्रुतधर्मः प्रतिदर्शनमन्यथाऽन्यथा प्रवृत्त इति नासावद्यापि तत्सम्यग्भावं विवेचयितुमलमित्याह -

१. तार्य इति L ॥ २. श्रुतकथन K । ३. प्रतिषु पाठाः- 'कल्पस्य कथनं यथा चक्षु' K.L. । कल्पस्य कथनं कार्यं चक्षु' J सं. । कल्पस्य चक्षु J मू. ॥

**बहुत्वात् परीक्षावतारः ॥३३॥९१॥ इति ।**

तस्य हि बहुत्वाच्छ्रुतधर्माणां 'श्रुतधर्मः' इति शब्दसमानतया विप्रलब्धबुद्धेः परीक्षायां त्रिकोटिपरिशुद्धिलक्षणायां श्रुतधर्मसम्बन्धिन्यामवतारः कार्यः, अन्यत्राप्यवाचि-

*तं शब्दमात्रेण वदन्ति धर्मं विश्वेऽपि लोका न विचारयन्ते । स शब्दसाम्येऽपि विचित्रभेदैर्विभिद्यते क्षीरमिवा[1]र्चनीयः ॥८९॥*

*लक्ष्मीं विधातुं सकलां समर्थं सुदुर्लभं विश्वजनीनमेनम्[2]। परीक्ष्य गृह्णन्ति विचारदक्षाः सुवर्णवद् वञ्चनभीतचित्ताः ॥९०॥* [ ] इति ॥३३॥ परीक्षोपायमेवाह-

**कषादिप्ररूपणा ॥३४॥९२॥ इति ।**

यथा सुवर्णमात्रसाम्येन तथाविधलोकेष्वविचारेणैव शुद्धाशुद्धरूपस्य सुवर्णस्य प्रवृत्तौ कष-च्छेद-तापाः

१. र्चनीयं L। २. मेतम् J।

परीक्षणाय विचक्षणैराद्रियन्ते तथाऽत्रापि श्रुतधर्मे परीक्षणीये कषादीनां प्ररूपणेति ॥३४॥ कषादीनेवाह-

**विधि-प्रतिषेधौ कषः ॥३५॥९३॥ इति ।**

विधिरविरुद्धकर्तव्यार्थोपदेशकं वाक्यम्, यथा 'स्वर्ग-केवलार्थिना तपो-ध्यानादि कर्तव्यम्, समितिगुप्तिशुद्धा क्रिया' इत्यादि, प्रतिषेधः पुनः 'न हिंस्यात् सर्वभूतानि, नानृतं वदेत्' इत्या[1]दिः, ततो विधिश्च प्रतिषेधश्च विधि-प्रतिषेधौ, किमित्याह-कषः सुवर्णपरीक्षायामिव कषपट्टके रेखा, इदमुक्तं भवति-यत्र धर्मे उक्तलक्षणो विधिः प्रतिषेधश्च पदे पदे सुपुष्कल उपलभ्यते स धर्मः कषशुद्धः, न पुनः

*अन्यधर्मस्थिताः सत्त्वा, असुरा इव विष्णुना । उच्छेदनीयास्तेषां हि, वधे दोषो न विद्यते ॥११॥*

इत्यादिवाक्यगर्भ इति ॥३५॥ छेदमाह-

**तत्सम्भव-पालनाचेष्टोक्तिश्छेदः॥३६॥९४॥ इति ।**

१. इत्यादि J.L. ॥

तयोर्विधि-प्रतिषेधयोरनाविर्भूतयोः सम्भवः प्रादुर्भावः, प्रादुर्भूतयोश्च पालना च रक्षारूपा, ततः तत्सम्भव-पालनार्थं या चेष्टा भिक्षाटनादिबाह्यक्रियारूपा तस्या उक्तिश्छेदः, यथा कषशुद्धावप्यान्तरामशुद्धिमाशङ्कमानाः सौवर्णिकाः सुवर्ण-गोलिकादेश्छेदमाद्रियन्ते, तथा कषशुद्धावपि धर्मस्य छेदमपेक्षन्ते, स च छेदो विशुद्धबाह्यचेष्टारूपः, विशुद्धा च चेष्टा सा यत्रासन्तावपि विधिप्रतिषेधावबाधितरूपौ स्वात्मानं लभेते, लब्धात्मानौ चातीचारलक्षणापचारविरहितौ उ[१]त्तरोत्तरां वृद्धिमनुभवतः, सा यत्र धर्मे चेष्टा सप्रपञ्चा प्रोच्यते स धर्मश्छेदशुद्ध इति ॥३६॥ यथा कष-च्छेदशुद्धमपि सुवर्णं तापमसहमानं कालिकोन्मीलनदोषान्न सुवर्णभावमश्नुते, एवं धर्मोऽपि सत्यामपि कष-च्छेदशुद्धौ तापपरीक्षामनिर्वहमाणो न स्वभावमासादयत्यतस्तापं प्रज्ञापयन्नाह-

**उभयनिबन्धनभाववादस्तापः ॥३७॥९५॥ इति ।**

उभयोः कषच्छेदयोरनन्तरमेवोक्तरूपयोर्निबन्धनं परिणामिरूपं कारणं यो भावो जीवादिलक्षणस्तस्य वादः

१. उत्तरोत्तरं L. ॥

प्ररूपणा, किमित्याह-तापोऽत्र श्रुतधर्मपरीक्षाधिकारे, इदमुक्तं भवति-यत्र शास्त्रे द्रव्यरूपतया अप्रच्युतानुत्पन्नः पर्यायात्मकतया च प्रतिक्षणमपरापरस्वभावास्कन्दनेन अनित्यस्वभावो जीवादिरवस्थाप्यते स्यात् तत्र तापशुद्धिः, यतः परिणामिन्येवात्मादौ तथाविधाशुद्धपर्यायनिरोधेन ध्यानाध्ययनाद्यपरशुद्धपर्यायप्रादुर्भावादुक्तलक्षणः कषो बाह्यचेष्टाशुद्धिलक्षणश्च छेद उपपद्यते, न पुनरन्यथेति ॥३७॥

एतेषां मध्यात् को बलीयान् इतरो वा इति प्रश्ने यत् कर्तव्यं तदाह-

**अमीषामन्तरदर्शनम् ॥३८॥९६॥ इति ।**

अमीषां त्रयाणां परीक्षाप्रकाराणां परस्परमन्तरस्य विशेषस्य समर्थासमर्थत्वरूपस्य दर्शनं कार्यमुपदेशकेन ॥३८॥ तदेव दर्शयति-

**कष-च्छेदयोरयत्नः ॥३९॥९७॥ इति ।**

कष-च्छेदयोः प[1]रीक्षाऽक्षमत्वेन आदरणीयतायाम् अयत्नोऽतात्पर्यं मतिमतामिति ॥३९॥ कुत इत्याह-

**तद्भावेऽपि तापाभावेऽभावः ॥४०॥९८॥ इति ।**

तयोः कषच्छेदयोर्भावः सत्ता तद्भावः, तस्मिन्, किं पुनरतद्भाव इत्यपिशब्दार्थः, किमित्याह-तापाभावे उक्तलक्षणतापविरहे अभावः परमार्थतोऽसत्तैव परीक्षणीयस्य, न हि तापे विघटमानं हेम कष-च्छेदयोः सतोरपि स्वं स्वरूपं प्रतिपत्तुमलम्, जातिसु[2]वर्णत्वात् तस्य ॥४०॥ एतदपि कथमित्याह-

**तच्छुद्धौ हि तत्साफल्यम् ॥४१॥९९॥ इति ।**

तच्छुद्धौ तापशुद्धौ हिर्यस्मात् तत्साफल्यं तयोः कषच्छेदयोः सफलभावः, तथाहि-ध्यानाध्ययनादिकोऽर्थो विधीयमानः प्रागुपात्तकर्मनिर्जरणफलः, हिंसादिकश्च प्रतिषिध्यमानो नवकर्मोपादाननिरोधफलः, बाह्यचेष्टाशुद्धिश्चानयोरेवानाविर्भूतयोराविर्भवनेनाविर्भूतयोश्च परिपालनेन फलवती स्यात्, न

१. परीक्षाक्षमत्वेनादरणीयतायाम् इति प्रतिषु पाठः ॥ २. कूटसुवर्णत्वादित्यर्थः ।।

चापरिणामिन्यात्मन्युक्तलक्षणौ कषच्छेदौ स्वकार्यं कर्तुं प्रभविष्णू स्यातामिति तयोस्तापशुद्धावेव सफलत्वमुपपद्यते न पुनरन्यथेति ॥४१॥ ननु फलविकलावपि तौ भविष्यत इत्याह-

**फलवन्तौ च तौ तौ ॥४२॥१००॥ इति ।**

उक्तलक्षणभाजौ सन्तौ पुनः तौ कषच्छेदौ तौ वास्तवौ कषच्छेदौ भवतः, स्वसाध्यक्रियाकारिणो हि वस्तुनो वस्तुत्वमु[1]शन्ति सन्तः ॥४२॥ विपक्षे बाधामाह-

**अन्यथा याचितकमण्डनम् ॥४३॥१०१॥ इति ।**

अन्यथा फलविकलौ सन्तौ वस्तुपरीक्षाधिकारे समवतारितावपि तौ याचितकमण्डनं वर्तेते इति, परकीयत्व-सम्भावनोपहतत्वात् कुत्सितं याचितं याचितकम्, तच्च तन्मण्डनं च कटक-कुण्डलादिराभरणविशेषो याचितकमण्डनम्, द्विविधं ह्यलङ्कारफलम्-निर्वाहे सति परिशुद्धाभिमानिकसुखजनिका स्वशरीरशोभा, कथञ्चिन्निर्वहणाभावे च तेनैव

१. इच्छन्तीत्यर्थः॥

निर्वाहः। न च याचितकमण्डने एतद् द्वितयमप्यस्ति परकीयत्वात् तस्य, ततो याचितकमण्डनमिव याचितकमण्डनम्, इदमुक्तं भवति-द्रव्यपर्यायोभयस्वभावे जीवे कषच्छेदौ निरुपचरिततया स्थाप्यमानौ स्वफलं प्रत्यवन्ध्यसामर्थ्याविव स्याताम्, नित्याद्येकान्तवादे तु स्ववादशोभार्थं तद्वादिभिः कल्प्यमानावप्येतौ याचितकमण्डनाकारौ प्रतिभासेते न पुनः स्वकार्यकराविति ॥४३॥ आह-अवगतं यथा कषच्छेदतापशुद्धः श्रुतधर्मो ग्राह्यः, परं किम्प्रणेतृकोऽसौ प्रमाणमिति व्यतिरेकतः साधयन्नाह-

**नातत्त्ववेदिवादः सम्यग्वादः ॥४४॥१०२। इति ।**

न नैव अतत्त्ववेदिनः साक्षादेव वस्तुतत्त्वमज्ञातुं शीलस्य पुरुषविशेषस्य अर्वाग्दर्शिन इत्यर्थो वादो वस्तुप्रणयनम् अतत्त्ववेदिवादः, किमित्याह-सम्यग्वादो यथावस्थितार्थवादः, साक्षादवीक्षमाणेन हि प्रमात्रा प्रोक्तं जात्यन्धचित्रकरनरालिखितचित्रकर्मवद्यथावस्थितरूपविसंवादेन असमञ्जसमेव शास्त्रं स्यादिति कथं तद्भाषितं वस्तु अविपरीतरूपतां प्रतिपत्तुमुत्सहते? इति ॥४४॥ सम्यग्वादताया एवोपायमाह-

**बन्धमोक्षोपपत्तितस्तच्छुद्धिः ।।४५।।१०३।। इति ।**

बन्धो मिथ्यात्वादिहेतुभ्यो जीवस्य कर्मपुद्गलानां च वह्न्यःपिण्डयोरिव क्षीर-नीरयोरिव वा परस्परमविभाग-परिणा[१]मेनावस्थानम्, मोक्षः पुनः सम्यग्दर्शन-ज्ञान-चारित्रेभ्यः कर्मणामत्यन्तोच्छेदः, ततो बन्धश्च मोक्षश्च बन्धमोक्षौ, तयोरुपपत्तिर्घटना, तस्याः सकाशात् तच्छुद्धि र्वस्तुवादनिर्मलता चिन्तनीया, इदमुक्तं भवति-यस्मिन् सिद्धान्ते बन्धमोक्षयोग्य आत्मा तैस्तैर्विशेषैर्निरूप्यते स सर्ववेदिपुरुषप्रतिपादित इति कोविदैर्निश्चीयते इति ।।४५।।

इयमपि बन्धमोक्षोपपत्तिर्यथा युज्यते तथाऽऽह-

**इयं बध्यमान-बन्धनभावे।।४६।।१०४।। इति ।**

इयं बन्धमोक्षोपपत्तिः बध्यमानस्य बन्धनस्य च वक्ष्यमाणस्य भावे सद्भावे सति भवति ।।४६।। कुत इत्याह-

---

१. 'तस्मान्न बध्यते इति सांख्यकारिकायां पाठः।।

**कल्पनामात्रमन्यथा ।।४७।।१०५।। इति ।**

यस्मात् कारणादियं कल्पनैव केवला वितथार्थप्रतिभासरूपा, न पुनस्तत्र प्रतिभासमानोऽर्थोपीति कल्पनामात्रम् अन्यथा मुख्यबध्यमान-बन्धनयोरभावे वर्त्तते इति ।।४७।। बध्यमान-बन्धने एव व्याचष्टे -

**बध्यमान आत्मा, बन्धनं वस्तुसत् कर्म ।।४८।।१०६।। इति ।**

तत्र बध्यमानः स्वसामर्थ्यतिरोधानेन पारवश्यमानीयमानः, क इत्याह-आत्मा चतुर्दशभूतग्रामभेदभिन्नो जीवः प्रतिपाद्यते, तथा बध्यते मिथ्यात्वादिभिर्हेतुभिरात्मा अनेनेति बन्धनम्, किमित्याह-वस्तुसत् परमार्थतो विद्यमानं कर्म ज्ञानावरणादि अनन्तानन्तपरमाणुप्रचयस्वभावमत एव मूर्त्तप्रकृतीति। अत्राऽऽत्मग्रहणेन सांख्यमतनिरासमाह, यतस्तत्रोच्यते -

*आत्मा[१] न बध्यते नापि मुच्यते नापि संसरति कश्चित् । संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥*

---

१. 'तस्मान्न बध्यते इति सांख्यकारिकायां पाठः।।

॥९२॥ [सांख्यकारिका ६२]

वस्तुसद्ग्रहणेन तु सौगतमतस्य, यतस्तत्रापि पठ्यते -

*चित्तमेव हि संसारो, रागादिक्लेशवासितम् । तदेव तैर्विनिर्मुक्तं, भवान्त इति कथ्यते ॥९३॥* [शास्त्रवार्त्ता० ४०४] रागादिक्लेशवासितमिति रागादिक्लेशैः सर्वथा चित्तादव्यतिरिक्तैर्वासितं संस्कृतम् । एवं हि बध्यमानान्न भिन्नं वस्तुसत्कर्मेत्यभ्युपगतं भवति । तत्र प्रकृतेरेव बन्ध-मोक्षाभ्युपगमे आत्मनः संसारा-ऽपवर्गावस्थयोरभिन्नैकस्वभावत्वेन योगिनां यम-नियमाद्यनुष्ठानं मुक्तिफलतयोक्तं यद् योगशास्त्रेषु तद् व्यर्थमेव स्यात् । बौद्धस्यापि चित्तादव्यतिरिक्तकर्मवादिनोऽवस्तुसत्त्वमेव कर्मणः स्यात्, यतो यद्यतोऽव्यतिरिक्तस्वरूपं तत् तदेव भवति, न च लोके तदेव तेनैव बध्यते इति प्रतीतिरस्ति, बध्यमान-बन्धनयोः पुरुष-निगडादिरूपयोः भिन्नस्वभावयोरेव लोके व्यवह्रियमाणत्वात् । किंच, चित्तमात्रत्वे कर्मणोऽभ्युपगम्यमाने संसारा-ऽपवर्गयोर्भेदो न प्राप्नोति, चित्तमात्रस्योभयत्राप्यविशेषात् ॥४८॥ बन्ध-मोक्षहेतूनेवाह-

**हिंसादयस्तद्योगहेतवः, तदितरे तदितरस्य ॥४९॥१०७॥ इति ।**

हिंसादय इति हिंसानृतादयो जीवपरिणामविशेषाः, किमित्याह-तद्योगहेतवः, तस्य बन्धस्य संसारफलत्वेन परमार्थचिन्तायां पापात्मकस्यैव हेतव आत्मना सह सम्बन्धकारणभावमापन्ना वर्तन्ते, यदवाचि-

*हिंसानृतादयः पञ्च, तत्त्वाश्रद्धानमेव च । क्रोधादयश्च चत्वार, इति पापस्य हेतवः॥९४॥* [शास्त्रवार्त्ता० ४]

तथा तदितरे तेभ्यो हिंसादिभ्य इतरेऽहिंसादय एव तदितरस्य तस्मात् बन्धादितरो मोक्षः तस्य, अनुरूपकारणप्रभवत्वात् सर्वकार्याणामिति ॥४९॥ बन्धस्यैव स्वरूपमाह-

**प्रवाहतोऽनादिमान् ॥५०॥१०८॥ इति ।**

प्रवाहतः परम्परातोऽनादिमान् आदिभूतबन्धकालविकलः ॥५०॥ अत्रैवार्थे उपचयार्थमाह-

**कृतकत्वेऽप्यतीतकालवदुपपत्तिः ॥५१॥१०९॥ इति ।**

कृतकत्वेऽपि स्वहेतुभिर्निष्पादितत्वेऽपि बन्धस्यातीतकालस्येवोपपत्तिर्घटना अनादिमत्त्वस्य वक्तव्या, किमुक्तं

भवति? प्रतिक्षणं क्रियमाणोऽपि बन्धः प्रवाहापेक्षयाऽतीतकालवदनादिमानेव ॥५१॥ अथ यतोंऽशादनयोर्दृष्टान्त-दार्ष्टान्तिकभावोऽभूत् तं साक्षादेव दर्शयन्नाह-

**वर्त्तमानताकल्पं कृतकत्वम् ॥५२॥११०॥ इति ।**

यादृशी अतीतकालसमयानां वर्त्तमानता साम्प्रतरूपता तादृशं बन्धस्य कृतकत्वं क्रियमाणत्वम्, क्रियाकाल-निष्ठाकालयोश्च निश्चयनयाभिप्रायेणाभेदादेवमुपन्यस्तम्, अन्यथा वर्त्तमानताकल्पं क्रियमाणत्वमित्युपन्यसितुं युक्तं स्यात् ॥५२॥ यादृशि चात्मनि प्रागुपन्यस्ता बन्धहेतव उपपद्यन्ते तमन्वयव्यतिरेकाभ्यामाह -

**परिणामिन्यात्मनि हिंसादयः, भिन्नाभिन्ने च देहात् ॥५३॥१११॥ इति ।**

परिणमनं परिणामः द्रव्यरूपतयाऽवस्थितस्यैव वस्तुनः पर्यायान्तरप्रतिपत्तिः, यथोक्तम्-

*परिणामो ह्यर्थान्तरगमनं, न च सर्वथा व्यवस्थानम् । न च सर्वथा विनाशः, परिणामस्तद्विदामिष्टः ॥९५॥*

परिणामो नित्यमस्यास्तीति परिणामी, तत्र आत्मनि जीवे हिंसादयः प्राग् निरूपिता उपपद्यन्ते, तथा भिन्ने

पृथग्रूपे अभिन्ने च तद्विपरीते, चकारो विशेषणसमुच्चये, कस्मादित्याह-देहात् शरीरात् ॥५३॥ अत्रैवार्थे विपक्षे बाधकमाह-

**अन्यथा तदयोगः ॥५४॥११२॥ इति ।**

यदि हि परिणामी आत्मा भिन्नाभिन्नश्च देहान्नेष्यते तदा तेषां हिंसादीनां बन्धहेतुतयोपन्यस्तानामयोगोऽघटना ॥५४॥ कथमित्याह-

**नित्य एवाविकारतोऽसम्भवात् ॥५५॥११३॥ इति ।**

नित्य एव अप्रच्युतानुत्पन्नस्थिरैकस्वभावे आत्मनि-न तु पर्यायनयावलम्बनेनानित्यरूपेऽपीत्येवकारार्थः-अभ्युपगम्यमाने द्रव्यास्तिकनयावष्टम्भतोऽविकारतस्तिलतुषत्रिभागमात्रमपि पूर्वस्वरूपादप्रच्यवमानत्वेन असम्भवाद् अघटनाद् हिंसायाः, यतो हिंसा विवक्षितपर्यायविनाशादिस्वभावा शास्त्रेषु गीयते, यथोक्तम्-

*त[1]त्पर्यायविनाशो, दुःखोत्पादस्तथा च सङ्क्लेशः । एष वधो जिनभणितो, वर्जयितव्यः प्रयत्नेन ॥९६॥* [ ] ॥५५॥ तथा-

**अनित्ये चापराहिंसनेन ॥५६॥ ॥११४॥ इति ।**

अनित्ये च सर्वथा प्रतिक्षणभङ्गुरे पुनरात्मनि अभ्युपगम्यमाने सति अपरेण केनचिद् लुब्धकादिना अहिंसनेन अव्यापादनेन कस्यचिच्छूकरादेर्हिंसाऽसम्भवः, प्रतिक्षणभङ्गुरत्वाभ्युपगमे हि सर्वेष्वात्मसु स्वत एव स्वजन्मलाभक्षणानन्तरं सर्वथा निवर्तमानेषु कः कस्य हिंसकः? को वा कस्य हिंसनीयः? इति ॥५६॥ तथा-

**भिन्न[2] एव देहान्न स्पृष्टवेदनम् ॥५७॥११५॥ इति ।**

---

१. ''तप्पजायविणासो दुक्खुप्पाओ अ संकिलेसो य। एस वहो जिणभणिओ वज्जेयव्वो पयत्तेणं ॥१९१॥ तत्पर्यायविनाशः मनुष्यादिजीवपर्यायविनाशः दुःखोत्पादश्च व्यापाद्यमानस्य, चित्तसंक्लेशश्च क्लिष्टचित्तोत्पादश्च आत्मनः, एष वधो व्यस्तः समस्तो वा ओघतो जिनभणितः तीर्थकरोक्तो वर्जयितव्यः प्रयत्नेन उपयोगसारेणानुष्ठानेनेति।'' इति सटीकायां श्रावकप्रज्ञप्तौ॥

२. 'भिन्ने' इति सप्तम्यन्तमत्र पदम्, दृश्यतामग्रेतनम् 'अभिन्न एव' इति सूत्रम्॥

यदि हि भिन्न एव विलक्षण एव सर्वथा देहादात्मा तदा न नैव स्पृष्टस्य योषिच्छरीर-श[1]यना-ऽऽसनादेः कण्टक-ज्वलन-ज्वालादेश्च इष्टानिष्टरूपस्य स्पर्शनेन्द्रियविषयस्य देहेन स्पृश्यमानस्य वेदनम् अनुभवनं प्राप्नोति भोगिनः पुरुषस्य, न हि देवदत्ते शयनादीनि भोगाङ्गानि स्पृशति सति[2] विष्णुमित्रस्यानुभवप्रतीतिरस्तीति ॥५७॥ तथा-

**निरर्थकश्चानुग्रहः ॥५८॥११६॥ इति ।**

निरर्थकः पुरुषसंतोषलक्षणफलविकलः, चः समुच्चये, अनुग्रहः स्रक्-चन्दना-ऽङ्गना-वसनादिभिर्भोगाङ्गैरुपष्टम्भो भवेद् देहस्य, देहादात्मनोऽत्यन्तभिन्नत्वात्, निग्रहस्याप्युपलक्षणमेतत् ॥५८॥

एवं भेदपक्षं निराकृत्याभेदपक्षनिराकरणायाह-

**अभिन्न एवामरणं वैकल्यायोगात् ॥५९॥११७॥ इति ।**

अभिन्न एव देहात् सर्वथा नानात्वमनालम्बमाने आत्मनि सति *चैतन्यविशिष्टः कायः पुरुषः* [ ] इति

१. प्रतिषु पाठः- शयनादेः K । शयनाशनादेः L.J.॥ २. सति K. नास्ति॥

मतावलम्बिनां सु[१]रगुरुशिष्याणामभ्युपगमेन, किमित्याह-अमरणं मृत्योरभाव आपद्यते आत्मनः, कुत इत्याह-वैकल्यस्यायोगाद् अघटनात्, यतो मृतेऽपि देहे न किञ्चित् पृथिव्यादिभूतानां देहारम्भकाणां वैकल्यमुपलभ्यते। वायोस्तत्र वैकल्यमिति चेन्न, वायुमन्तरेण उच्छूनभावायोगात् । तर्हि तेजसस्तत्र वैकल्यमस्तीति चेन्न, तेजसो व्यतिरेकेण कुथितभावाप्रतिपत्तेरिति कथं देहाभिन्नात्मवादिनां मरणमुपपन्नं भवेदिति ॥५९॥

प्राक्तनावस्थयोर्वायुतेजसोस्तत्राभावाद् मरणमुपपद्यते इति चेदुच्यते -

**मरणे परलोकाभावः ॥६०॥११८॥ इति ।**

मरणे अभ्युपगम्यमाने परलोकस्याभावः प्रसज्यते, न हि देहादभिन्न एवात्मन्यभ्युपगम्यमाने कश्चित् परलोकयायी सिद्ध्यति, देहस्यात्रैव तावत् पातदर्शनात् तद्व्यतिरिक्तस्य चात्मनोऽनभ्युपगमात्, न च वक्तव्यम्-परलोक एव तर्हि नास्ति, तस्य सर्वशिष्टैः प्रमाणोपष्टम्भोपपन्नत्वेनाभीष्टत्वात्, प्रमाणं चेदम्-यो योऽभिलाषः स

१. सुरगुरुशिष्या लौकायतिकाः चार्वाकाः॥

सोऽभिलाषान्तरपूर्वको दृष्टः, यथा यौवनकालाभिलाषो बालकालीनाभिलाषपूर्वकः, अभिलाषश्च बालस्य तदहर्जातस्य प्रसारितलोचनस्य मातुः स्तनौ निभालयतः स्तन्यस्पृहारूपः, यच्च तदभिलाषान्तरं तन्नियमाद्भवान्तरभावीति ॥६०॥ तथा-

**देहकृतस्यात्मनाऽनुपभोगः ॥६१॥ ११९॥ इति ।**

एकान्तभेदे देहात्मनोरभ्युपगते साङ्ख्येन देहेन कृतस्य परेषां ताडन-तर्जन-हिंस[1]नादिना देवतानमन-स्तवनादिना चोपायेनोपात्तस्य शुभाशुभरूपस्य कर्मण आत्मना अनुपभोगः सुख-दुःखानुभवद्वारेणावेदनमापद्यते, न हि कश्चिदन्यकृतं शुभमशुभं वा वेदयितुमर्हति, कृतनाशाऽकृताभ्यागमदोषप्रसङ्गादिति ॥६३॥ तथा-

**आत्मकृतस्य देहेन ॥६२॥१२०॥ इति ।**

यदि च देहाद् भिन्न एव आत्मेत्यभ्युपगमस्तदा आत्मकृतस्य कुशलादकुशलाद्वाऽनुष्ठानादात्मसमुपार्जितस्य

१. हिंसादिना K ॥

शुभस्याशुभस्य च कर्मण इहामुत्र च देहेन कर्त्राऽनुपभोगोऽवेदनं प्रसज्यते, अन्यकृतत्वात् ॥६२॥ यदि नामैवमापद्यते तथापि को दोष इत्याह -

**दृष्टेष्टबाधा ॥६३॥१२१॥ इति ।**

दृष्टस्य सर्वलोकप्रतीतस्य देहकृतस्यात्मना आत्मकृतस्य च देहेन यः सुखदुःखानुभवः तस्य इष्टस्य च शास्त्रसिद्धस्य बाधा अपह्नवः प्राप्नोति, तथाहि-दृश्यत एवात्मा देहकृताच्चौर्य-पारदार्याद्यनार्यकार्याच्चारकादौ चिरं शोक-विषादादीनि दुःखानि समुपलभमानः, शरीरं च तथाविधमनःसङ्क्षोभादापन्नज्वरादिजनितव्यथामनुभवदिति, न च दृष्टेष्टापलापिता युक्ता सताम्, नास्तिकलक्षणत्वात् तस्याः ॥६३॥

इत्थं सर्वथा नित्यमनित्यं च तथा देहाद् भिन्नमभिन्नं चात्मानमङ्गीकृत्य हिंसादीनामसम्भवमापाद्योपसंहरन्नाह-

**अतोऽन्यथैतत्सिद्धिरिति तत्त्ववादः ॥६४॥१२२॥ इति ।**

अतः एकान्तवादाद् अन्यथा नित्यानित्यादिस्वरूपे आत्मनि समभ्युपगम्यमाने एतत्सिद्धिः हिंसादिसिद्धिः,

तत्सिद्धौ च तन्निबन्धना बन्धमोक्षसिद्धिः, इति एष तत्त्ववादः प्रतिज्ञायते, योऽतत्त्ववेदिना पुरुषेण वेदितुं न पार्यते इति ॥६४॥ एवं तत्त्ववादे निरूपिते किं कार्यमित्याह-

**परिणामपरीक्षा ॥६५॥१२३॥ इति ।**

परिणामस्य तत्त्ववादविषयज्ञान-श्रद्धानलक्षणस्य परीक्षा एकान्तवादारुचिसूचनवचनसम्भाषणादिनोपायेन निर्णयनं विधेयम् ॥६५॥ ततोऽपि किं कार्यमित्याह-

**शुद्धे बन्धभेदकथनम् ॥६६॥१२४॥ इति ।**

शुद्धे परमां शुद्धिमागते परिणामे बन्धभेदकथनम् बन्धभेदस्य मूलप्रकृतिबन्धरूपस्याष्टविधस्य उत्तरप्रकृतिबन्धस्वभावस्य च सप्तनवतिप्रमाणस्य [५+९+२+२८+४२+४+२+५=९७] कथनं प्रज्ञापनं कार्यम्, बन्धशतकादिग्रन्थानुसारेणेति ॥६६॥ तथा-

**वरबोधिलाभप्ररूपणा ॥६७॥१२५॥ इति ।**

वरस्य तीर्थकरलक्षणफलकारणतया शेषबोधिलाभेभ्योऽतिशायिनो बोधिलाभस्य प्ररूपणा प्रज्ञापना, अथवा वरस्य द्रव्यबोधिलाभव्यतिरेकिणः पारमार्थिकस्य बोधिलाभस्य प्ररूपणा हेतुतः स्वरूपतः फलतश्चेति ॥६७॥ तत्र हेतुतस्तावदाह-

**तथाभव्यत्वादितोऽसौ ॥६८॥१२६॥ इति ।**

भव्यत्वं नाम सिद्धिगमनयोग्यत्वमनादिपारिणामिको भाव आत्मस्वतत्त्वमेव, तथाभव्यत्वं तु भव्यत्वमेव कालादिभेदेनात्मनां बीजसिद्धिभावाद् नानारूपतामापन्नम्, आदिशब्दात् काल-नियति-कर्म-पुरुषपरिग्रहः, तत्र कालो विशिष्टपुद्गलपरावर्तोत्सर्पिण्यादिस्तथाभव्यत्वस्य फलदानाभिमुख्यकारी, वसन्तादिवद् वनस्पतिविशेषस्य, कालसद्भावेऽपि न्यूनाधिक-व्यपोहेन नियतकार्यकारिणी नियतिः, अपचीयमानसङ्क्लेशं नानाशुभाशयसंवेदनहेतुः कुशलानुबन्धि कर्म, समुचितपुण्यसम्भारो महाकल्याणाशयः प्रधानपरिज्ञानवान् प्ररूप्यमाणार्थपरिज्ञानकुशलः पुरुषः, ततस्तथाभव्यत्वमादौ येषां ते तथा तेभ्यः, असौ वरबोधिलाभः प्रादुरस्ति, स्वरूपं च जीवादि-पदार्थश्रद्धानमस्य

॥६८॥ अथ फलत एनमेवाह-

**ग्रन्थिभेदे नात्यन्तसङ्क्लेशः ॥६९॥१२७॥ इति ।**

इह ग्रन्थिरिव ग्रन्थिर्दृढो राग-द्वेषपरिणामः, तस्य ग्रन्थेः भे[1]दे अपूर्वकरणवज्रसूच्या भे[2]दे विदारणे सति लब्धशुद्धतत्त्वश्रद्धानसामर्थ्यान्नात्यन्तं न प्रागिवातिनिबिडतया सङ्क्लेशो राग-द्वेषपरिणामः प्रवर्तते, न हि लब्धवेधपरिणामो मणिः कथञ्चिन्मलापूरितरन्ध्रोऽपि प्रागवस्थां प्रतिपद्यत इति ॥६९॥ एतदपि कुत इत्याह-

**न भूयस्तद्बन्धनम् ॥७०॥१२८॥ इति ।**

यतो न भूयः पुनरपि तस्य ग्रन्थेर्बन्धनं निष्पादनं भेदे सति [3]सम्पद्यते इति, किमुक्तं भवति ? यावती ग्रन्थिभेदकाले सर्वकर्मणामायुर्वर्जानां स्थितिरन्तःसागरोपमकोटीकोटिलक्षणाऽवशिष्यते तावत्प्रमाणामेवासौ समुपलब्धसम्यग्दर्शनो जीवः कथञ्चित् सम्यक्त्वापगमात् तीव्रायामपि तथाविधसङ्क्लेशप्राप्तौ बध्नाति, न पुनस्तं

१. भेद अपूर्व K.J.॥ २. भेदे L. लीं. मध्ये नास्ति॥ ३. प्रतिपद्यते K ॥

बन्धेनातिक्रामतीति ॥७०॥ तथा-

**असत्यपाये न दुर्गतिः ॥७१॥१२९॥ इति ।**

असति अविद्यमाने अपाये विनाशे सम्यग्दर्शनस्य परिशुद्धभव्यत्वपरिपाकसामर्थ्यान्मतिभेदादिकारणानवाप्तौ न नैव दुर्गतिः कुदेवत्व-कुमानुषत्व-तिर्यक्त्व-नारकत्वप्राप्तिः सम्पद्यते, किन्तु सुदेवत्व-सुमानुषत्वे एव स्याताम्, अन्यत्र पूर्वबद्धायुष्केभ्य इति ॥७१॥ तथा -

**विशुद्धेश्चारित्रम् ॥७२॥१३०॥**

विशुद्धेः परिशुद्धनिःशङ्कितत्वादिदर्शनाचारवारिपूरप्रक्षालितशङ्कादिप[1]ङ्ककलङ्कतया प्रकर्षप्राप्ति-लक्षणायाः सम्यग्दर्शनसत्कायाः सकाशात्, किमित्याह-चारित्रं सर्वसावद्ययोगपरिहार-निरवद्ययोगसमाचाररूपं सम्प[2]द्यते, शुद्धसम्यक्त्वस्यैव चारित्ररूपत्वात्, तथा चाचारसूत्रम्-

१. पङ्कतया J. विना॥ २. प्रतिपद्यते K.॥

*जं मोणं ति पासहा तं सम्मं ति पासहा । जं सम्मं ति पासहा तं मोणं ति पासह ॥९७॥* [आ[१]चा० १।५।३ सू० १६१] त्ति ॥७२॥ तथा-

**भावनातो रागादिक्षयः ॥७३॥१३१॥ इति ।**

भाव्यन्ते मुमुक्षुभिरभ्यस्यन्ते निरन्तरमेता इति भावनाः, ताश्चानित्यत्वाऽशरणत्वादयो द्वादश, यथोक्तम्

*भावयितव्यमनित्यत्वमशरणत्वं तथैकतान्यत्वे । अशुचित्वं संसारः कर्माश्रवसंवरविधिश्च ॥९८॥*

*निर्जरण-लोकविस्तर-धर्मस्वाख्यात-तत्त्वचिन्ताश्च। बोधेः सुदुर्लभत्वं च भावना द्वादश विशुद्धाः ॥९९॥*

---

१. ''जं सम्मं ति पासहा तं मोणं ति पासहा, जं मोणं ति पासहा तं सम्मं ति पासहा'' इति आचाराङ्गसूत्रे प्रथमे श्रुतस्कन्धे पञ्चमाऽध्ययने तृतीय उद्देशके पाठः सू. १६१॥ ''जं सम्मं ति पासह इत्यादि, सम्यगिति सम्यग्ज्ञानं सम्यक्त्वं वा तत्सहचरितम्, अनयोः सहभावादेकग्रहणे द्वितीयग्रहणं न्याय्यम्, यदिदं सम्यग्ज्ञानं सम्यक्त्वं वेत्येतत् पश्यत तद् मुनेर्भावो मौनं संयमानुष्ठानमित्येतत् पश्यत, यच्च मौनमित्येतत् पश्यत तत् सम्यग्ज्ञानं नैश्चयिकसम्यक्त्वं वा पश्यत, ज्ञानस्य विरतिफलत्वात् सम्यक्त्वस्य चाभिव्यक्तिकारणत्वात् सम्यक्त्व-ज्ञान-चरणानामेकताऽध्यवसेयेति भावार्थः'' इति शीलाङ्काचार्यविरचितायाम् आचाराङ्गसूत्रवृत्तौ ॥

[प्रशम.१४९-१५०] ताभ्यो रागादिक्षयः राग-द्वेष-मोहमलप्रलयः सञ्जायते, सम्यक्चिकित्साया इव वात-पित्तादिरोगापगमः प्रचण्डपवनाद्वा यथा मेघमण्डलविघटनम्, रागादिप्रतिपक्षभूतत्वाद् भावनानामिति ॥७३॥ ततोऽपि किमित्याह-

**तद्भावेऽपवर्गः ॥७४॥१३२॥ इति ।**

तस्य रागादिक्षयस्य भावे सकललोकालोकविलोकनशालिनोः केवलज्ञानदर्शनयोः लब्धौ सत्यां निस्तीर्णभवार्णवस्य सतो जन्तोरपवर्ग उक्तनिरुक्त उद्भवतीति ॥७४॥ किंलक्षण इत्याह -

**स आत्यन्तिको दुःखविगम इति ॥७५॥१३३॥ इति ।**

सोऽपवर्गोऽत्यन्तं सकलदुःखशक्तिनिर्मूलनेन भवतीति आत्यन्तिको दुःखविगमः सर्वशारीर-मानसाशर्मविरहः सर्वजीवलोकासाधारणानन्दानुभवश्चेति ॥७७॥ इत्थं देशनाविधिं प्रपञ्च्योपसंहरन्नाह-

**एवं संवेगकृद्धर्म, आख्येयो मुनिना परः । यथाबोधं हि शुश्रूषोर्भावितेन महात्मना**

॥१०॥

इति ।

एवम् उक्तन्यायेन संवेगकृत् संवेगकारी देशनार्हप्राणिनः, संवेगलक्षणं चेदम्-

*तथ्ये धर्मे ध्वस्तहिंसाप्रबन्धे देवे राग-द्वेष-मोहादिमुक्ते। साधौ सर्वग्रन्थसन्दर्भहीने संवेगोऽसौ निश्चलो योऽनुरागः[१] ॥१००॥* [ ] इति ।

धर्म उक्तलक्षण आख्येयः प्रज्ञापनीयो मुनिना गीतार्थेन साधुना, अन्यस्य धर्ममुपदेष्टुमनधिकारित्वात्, यथोक्तं निशीथे- *संसारदुक्खमहणो विबोहओ भवियपुंडरीयाणं। धम्मो जिण-पन्नत्तो पकप्पजइणा कहेयव्वो ॥१०१॥* [बृहत्कल्पभाष्ये गा० ११३५]

---

१. “संविग्नो भवनिर्वेदादात्मनिःसरणं तु यः । आत्मार्थसम्प्रवृत्तोऽसौ सदा स्यान्मुण्डकेवली ॥२९०॥ संविग्नः “तथ्ये धर्मे ध्वस्तहिंसाप्रबन्धे देवे राग-द्वेष-मोहादिमुक्ते। साधौ सर्वग्रन्थसन्दर्भहीने संवेगोऽसौ निश्चलो योऽनुरागः॥१॥” एवंलक्षणसंवेगभाक्।” इति योगबिन्दुवृत्तौ उद्धृतोऽयं श्लोकः।

प्रकल्पयतिना इति अधीतनिशीथाध्ययनेनेति। परः शेषतीर्थान्तरीयधर्मातिशायितया प्रकृष्टः, कथमाख्येय इत्याह-यथावबोधं हीति यथावबोधमेव, अनवबोधे धर्माख्यानस्योन्मार्गदेशनारूपत्वेन प्रत्युतानर्थसम्भवात्, पठन्ति च- *न ह्यन्धेनान्धः समाकृष्यमाणः सम्यगध्वानं प्रतिपद्यते* [ ] इति । कीदृशस्य सत इत्याह-शुश्रूषोः श्रोतुमुपस्थितस्य, कीदृशेन मुनिनेत्याह - भावितेन आख्यायमानधर्मप्रतिबद्धवासनावासितेन, **भावाद् भावप्रसूतिः** [ ] इति वचनात्, भाविताख्यानस्य श्रोतुः तथाविधश्रद्धानादिनिबन्धनत्वात्, पुनरपि कीदृशेनेत्याह-महात्मना, तदनुग्रहैकपरायणतया महान् प्रशस्य आत्मा यस्य स तथा तेनेति ॥१०॥ आह-धर्माख्यानेऽपि यदा तथाविधकर्मदोषान्नावबोधः श्रोतुरुत्पद्यते तदा किंफलं धर्माख्यानमित्याह-

**अबोधेऽपि फलं प्रोक्तं, श्रोतृणां मुनिसत्तमैः। कथकस्य विधानेन, नियमाच्छुद्धचेतसः ॥११॥**

**इति ।**

अबोधेऽपि अनवगमेऽपि सम्यग्धर्मस्य फलं क्लिष्टकर्मनिर्जरालक्षणं प्रोक्तम्, केषामनवबोधे इत्याह श्रोतृणां

श्रावकाणाम्, कैरुक्तमित्याह-मुनिसत्तमैर्भगवद्भिरर्हद्भिः, कथकस्य धर्मदेशकस्य साधोः विधानेन बाल-मध्यमबुद्धि-बुधरूपश्रोतृजना[१]पेक्षालक्षणेन नियमाद् अवश्यंतया, कीदृशस्य कथकस्येत्याह-शुद्धचेतसः परानुग्रहप्रवृत्ति-परिणामस्येति ॥११॥ आह-प्रकारान्तरेणापि देशनाफलस्य सम्भाव्यमानत्वादलमिहैव यत्नेनेत्याशङ्क्याह -

**नोपकारो जगत्यस्मिंस्तादृशो विद्यते क्वचित् । यादृशी दुःखविच्छेदाद्, देहिनां धर्मदेशना ॥१२॥ इति ।**

नैव उपकारोऽनुग्रहो जगति भुवने अस्मिन् उपलभ्यमाने तादृशो विद्यते समस्ति क्वचित् काले क्षेत्रे वा यादृशी यादृग्रूपा दुःखविच्छेदात् शारीर-मानसदुःखापनयनाद् देहिनां देशनार्हाणां धर्मदेशनेति धर्मदेशनाजनितो मार्गश्रद्धानादिर्गुणः, तस्य निःशेष-क्लेशलेशाकलङ्कमोक्षाक्षेपं प्रत्यवन्ध्यकारणत्वादिति ॥१२॥

इति श्रीमुनिचन्द्रसूरिविरचितायां धर्मबिन्दुवृत्तौ देशनाविधिर्नाम द्वितीयोऽध्यायः स[२]माप्तः॥२॥

---

१. पेक्षयालक्ष K.॥ २ समाप्तः नास्ति J.॥

# अथ तृतीयोऽध्यायः ।

व्याख्यातो द्वितीयोऽध्यायः, अथ तृतीय आरभ्यते, तस्य चेदमादिसूत्रम् -

**सद्धर्मश्रवणादेवं नरो विगतकल्मषः । ज्ञाततत्त्वो महासत्त्वः परं संवेगमागतः ॥१३॥ इति ।**

सद्धर्मश्रवणात् पारमार्थिकधर्माकर्णनाद् एवम् उक्तनीत्या नरः श्रोता पुमान् विगतकल्मषः व्यावृत्ततत्त्वप्रतिपत्तिबाधकमिथ्यात्वमोहादिमालिन्यः सन्, अत एव ज्ञाततत्त्वः करकमलतल-कलितनिस्तलस्थूलामलमुक्ताफलवच्छास्त्रलोचनबलेनालोकित-सकलजीवादिवस्तुवादः, तथा महत् शुद्धश्रद्धानोन्मीलनेन प्रशस्यं सत्त्वं पराक्रमो यस्य स तथा, परं प्रकृष्टं संवेगमुक्तलक्षणमागतोऽवतीर्णः सन् किं करोतीत्याह-

**धर्मोपादेयतां ज्ञात्वा, सञ्जातेच्छोऽत्र भावतः । दृढं स्वशक्तिमालोच्य, ग्रहणे सम्प्रवर्त्तते ॥१४॥ इति ।**

धर्मोपादेयताम् *एक एव सुहृद्धर्मो मृतमप्यनुयाति यः। शरीरेण समं नाशं सर्वमन्यत् तु गच्छति ॥१०२॥* [ ] इत्यादिवचनाद् धर्मोपादेयभावं ज्ञात्वा अवगम्य सञ्जातेच्छो लब्धचिकीर्षापरिणामोऽत्र धर्मे दृढमतिसूक्ष्माभोगेन स्वशक्तिं स्वसामर्थ्यमालोच्य विमृश्य ग्रहणे वक्ष्यमाणयोगवन्दनादिशुद्धिविधिना प्रतिपत्तावस्यैव धर्मस्य सम्प्रवर्त्तते सम्यक्प्रवृत्तिमाधत्ते, अदृढालोचने हि अयथाशक्ति धर्मग्रहणप्रवृत्तौ भङ्गसम्भवेन प्रत्युतानर्थभाव इति दृढग्रहणं कृतमिति। ननु किमर्थमस्यैव धर्मग्रहणसम्प्रवृत्तिर्भण्यते इत्याह -

**योग्यो ह्येवंविधः प्रोक्तो, जिनैः परहितोद्यतैः । फलसाधनभावेन, नातोऽन्यः परमार्थतः॥१५॥**

**इति ।**

योग्योऽर्हो भव्य इति योऽर्थः हिर्यस्माद् एवंविधः 'सद्धर्मश्रवणाद्' इत्यादिग्रन्थोक्तविशेषणयुक्तः पुमान् धर्मप्रतिपत्तेः प्रोक्तः, कैरित्याह-जिनैरर्हद्भिः परहितोद्यतैः सकलजीवलोककुशलाधानधनैः, केन कारणेनेत्याह फलसाधनभावेन योग्यस्यैव धर्मग्रहणफलं प्रति साधकभावोपपत्तेः, व्यतिरेकमाह - न नैव अतो धर्मग्रहीतुरन्यः पूर्वश्लोक-

द्वयोक्तविशेषणविकलः परमार्थतस्तत्त्ववृत्त्या योग्य इति ।

**इति सद्धर्मग्रहणार्ह उक्तः, साम्प्रतं तत्प्रदानविधिमनुवर्णयिष्यामः ॥१॥१३४॥ इति ।**

एतत् सुगममेव ॥१॥ ननु धर्मः स्वचित्तपरिशुद्ध्यधीनः, तत्किमस्यैवं[1] ग्रहणेनेत्याशङ्क्याह -

**धर्मग्रहणं हि सत्प्रतिपत्तिमद्विमलभावकरणम् ॥२॥१३५॥ इति ।**

धर्मग्रहणम् उक्तलक्षणं हिर्यस्मात् सत्प्रतिपत्तिमद् दृढशक्तिपर्यालोचा[2]दिना शुद्धाभ्युपगमवत्, किमित्याह- विमलभावकरणं स्वफलप्रसाधनावन्ध्यपरिणामनिमित्तं सम्पद्यते इत्येवमस्य ग्रहणविधिर्वक्तुमुपक्रम्यते इति ॥२॥ तदेव कथं सम्पद्यते इत्याह-

**तच्च प्रायो जिनवचनतो विधिना ॥३॥ १३६॥ इति ।**

तच्च तत् पुनः सत्प्रतिपत्तिमद्धर्मग्रहणं प्रायो बाहुल्येन, मरुदेव्यादौ क्वचिदन्यथापि सम्भवात्, जिनवचनतो

१. मस्यैव L. र्ली.॥ २. लोचनादिना L. ॥

वीतरागराद्धान्ताद् यो विधिर्वक्ष्यमाणस्तेन सम्पद्यते इति ॥३॥ एवं सति यत् सञ्जायते तदाह-

**इति प्रदानफलवत्ता ॥४॥१३७॥ इति ।**

इति एवं सत्प्रतिपत्तिमतो विधिना धर्मग्रहणस्य विमलभावनिबन्धनतायां सत्यां प्रदानस्य वितरणस्य धर्मगोचरस्य गुरुणा क्रियमाणस्य शिष्याय फलवत्ता शिष्यानुग्रहरूपफलयुक्तत्वमुपपद्यते, अन्यथोष[१]रवसुन्धराबीज-वपनमिव निष्फलमेव स्यादिति ॥४॥ प्रागविशेषतो धर्मो ग्राह्यतयोक्तः, तत्र च प्रायोऽभ्यस्तश्रावकधर्मो यतिधर्मयोग्यो भवतीति गृहस्थधर्मग्रहणमेवादौ बिभणिषुरिदमाह -

**सति सम्यग्दर्शने न्याय्यमणुव्रतादीनां ग्रहणम्, नान्यथा ॥५॥१३८॥ इति ।**

सति विद्यमाने सम्यग्दर्शने सम्यक्त्वलक्षणे न्याय्यम् उपपन्नम् अणुव्रतादीनाम् अणुव्रत-गुणव्रत-शिक्षाव्रतानां ग्रहणम् अभ्युपगमः, न नैव अन्यथा सम्यग्दर्शने असति, निष्फलप्रसङ्गात्, यथोक्तम् -

---

१. उखर K. ॥

*सस्यानीवोषरे क्षेत्रे, निक्षिप्तानि कदाचन । न व्रतानि प्ररोहन्ति, जीवे मिथ्यात्ववासिते ॥१०३॥*

*संयमा नियमाः सर्वे, नाश्यन्तेऽनेन पावनाः। क्षयकालानलेनेव, पादपाः फलशालिनः ॥१०४॥* [ ]

इति ॥।५॥ सम्यग्दर्शनमेव यथा स्यात् तथाऽऽह-

**जिनवचनश्रवणादेः कर्मक्षयोपशमादितः सम्यग्दर्शनम् ॥६॥१३९॥ इति ।**

जिनवचनश्रवणं प्रतीतरूपमेव, आदिशब्दात् तथाभव्यत्वपरिपाकापादितजीववीर्यविशेषलक्षणो निसर्गो गृह्यते, ततो जिनवचनश्रवणादेः सकाशाद् यः कर्मक्षयोपशमादिः कर्मणो ज्ञानावरण-दर्शनावरण-मिथ्यात्वमोहादेः क्षयोपशमोपशमक्षयलक्षणो गुणस्तस्मात् सम्यग्दर्शनं तत्त्वश्रद्धानलक्षणं विपर्ययव्यावृत्तिकारि असदभिनिवेश- शू[१]न्यं शुद्धवस्तुप्रज्ञापनानुगतं निवृत्ततीव्रसङ्क्लेशम् उत्कृष्टबन्धाभावकृत् शुभात्मपरिणामरूपं समुज्जृम्भते, कर्मक्षयादिरूपं चेत्थमवसेयम्-

१. शून्य K ॥

*खीणा[1] निव्वायहुयासणो व्व छारपिहियव्व उवसंता । दरविज्झायविहाडियजलणोवम्मा खओवसमा ॥१०५॥*

विघाटित इति इतस्ततो विप्रकीर्ण इति ।॥६॥ कीदृशमित्याह -

**प्रशम-संवेग-निर्वेदा-ऽनुकम्पा-ऽऽस्तिक्याभिव्यक्तिलक्षणं तत् ॥७॥१४०॥ इति ।**

प्रशमः स्वभावत एव क्रोधादिक्रूरकषा[2]यविषविकारकटुफलावलोकनेन वा तन्निरोधः, संवेगो निर्वाणाभिलाषः, निर्वेदो भवादुद्वेजनम्, अनुकम्पा दुःखितसत्त्वविषया कृपा, आस्तिक्यं 'त[3]देव सत्यं निःशङ्कं यज्जिनैः प्रवेदितम्' इति प्रतिपत्तिलक्षणम्, ततः प्रशम-संवेग-निर्वेदा-ऽनुकम्पा-ऽऽस्तिक्यानामभिव्यक्तिरुन्मीलनं लक्षणं स्वरूपसत्ताख्यापकं यस्य तत् तथा तदिति सम्यग्दर्शनम् ॥७॥ एवं सम्यग्दर्शनसिद्धौ यद् गुरुणा विधेयं तदाह-

**उत्तमधर्मप्रतिपत्त्यसहिष्णोस्तत्कथनपूर्वमुपस्थितस्य विधिनाऽणुव्रतादिदानम् ॥८॥१४१॥**

---

१. क्षीणा निर्वातहुताशन इव क्षारपिहिता इवोपशान्ताः। ईषद्विध्यातविघाटितज्वलनौपम्याः क्षयोपशमाः ॥

२. कषायविकास J. ॥ ३. ''तमेव सच्चं णीसंकं जं जिणेहिं पवेदितं'' इति आचारङ्गसूत्रे १/५/५, सू० १६८।

इति ।

इह भव्यस्य भवभीरोर्धर्मग्रहणोद्यममवलम्बमानस्य गुरुणा प्रथमं क्षमामार्दवादिर्यतिधर्मः सप्रपञ्चमुपवर्ण्य प्रदातुमुपस्थापनीयः, तस्यैव सर्वकर्मरोगविरेचकत्वात् । यदा चासावद्यापि विषयसुखपिपासादिभिरुत्तमस्य क्षमामार्दवादेर्यतिधर्मस्य प्रतिपत्तिरभ्युपगमस्तस्यामसहिष्णुरक्षमस्तदा तस्य तत्कथनपूर्वं स्वरूपभेदादिभिस्तेषाम् अणुव्रतादीनां कथनं प्रकाशनं पूर्वं प्रथमं यत्र तत् तथा, क्रियाविशेषणमेतत्, उपस्थितस्य ग्रहीतुमभ्युद्यतस्य, किमित्याह-विधिना वक्ष्यमाणेनाणुव्रतादिदानं कर्त्तव्यमिति ॥८॥ अन्यथा प्रदाने दोषमाह-

**सहिष्णोः प्रयोगेऽन्तरायः ॥९॥१४२॥ इति ।**

सहिष्णोरुत्तमधर्मप्रतिपत्तिसमर्थस्य प्रयोगे अणुव्रतादि-प्रदानव्यापारणे अन्तरायश्चारित्रप्रतिपत्तेः कृतो गुरुणा भवति, स च भवान्तरे आत्मनश्चारित्रदुर्लभत्वनिमित्तमिति ॥९॥ अत्रैवोपचयमाह-

**अनुमतिश्चेतरत्र ॥१०॥१४३॥ इति ।**

अनुमतिरनुज्ञादोषः, चकारो दूषणान्तरसमुच्चये, इतरत्र अणुव्रतादिप्रतिपत्तौ प्रत्याख्यातसावद्यांशाद् योऽन्यो-ऽप्रत्याख्यातः सावद्यांशस्तत्रापद्यते, तथा च गुरोर्यावज्जीवं सर्वथा सावद्यपरिहारप्रतिज्ञाया मनाग् मालिन्यं स्यादिति तत्कथनपूर्वकमित्युक्तम् ॥१०॥ अथैतद्व्यतिरेके दोषमाह -

**अकथने उभयाफल आज्ञाभङ्गः ॥११॥१४४॥ इति ।**

यदि उत्तमधर्मप्रतिपत्त्यसहिष्णोरणुव्रतादिलक्षणं धर्मं न कथयति गुरुस्तदा अकथने उभयं यतिश्राद्धधर्मलक्षणं न फलं यस्यासौ उभयाफल आज्ञाभङ्गः भगवच्छासनविनाशनमत्यन्तदुरन्तं जायत इति । भगवदाज्ञा चेयम्-

*श्रममविचिन्त्यात्मगतं, तस्माच्छ्रेयः सदोपदेष्टव्यम् । आत्मानं च परं च हि, हितोपदेष्टाऽनुगृह्णाति ॥१०६॥* [तत्त्वार्थकारिका ३०] इति । ॥११॥ ननु सर्वसावद्ययोगप्रत्याख्यानाक्षमस्याणुव्रतादिप्रतिपत्तौ सावद्यांशप्रत्याख्यानप्रदाने कथमितरत्रांशे नानुमतिदोषप्रसङ्गो गुरोरित्याशङ्क्याह-

**भगवद्वचनप्रामाण्यादुपस्थितदाने दोषाभावः ॥१२॥१४५॥ इति ।**

उपासकदशादौ हि भगवता स्वयमेव आनन्दादिश्रमणोपासकानामणुव्रतादिप्रदानमनुष्ठितमिति श्रूयते, न च भगवतोऽपि तत्रानुमतिप्रसङ्ग इति प्रेर्यम्, भगवदनुष्ठानस्य सर्वाङ्गसुन्दरत्वेनैकान्ततो दोषविकलत्वाद् इति भगवतो वचनस्य प्रामाण्यादुपस्थितस्य ग्रहीतुमुद्यतस्य जन्तोरणुव्रतादिप्रदाने साक्षिमात्रभावमवलम्बमानस्य सावद्यांशानिरोधेऽपि नानुमतिप्रसङ्गो गुरोः, प्रागेव तस्य स्वयमेव तत्र प्रवृत्तत्वादिति ॥१२॥ कुत[1] एतदिति चेदुच्यते-

**गृहपतिपुत्रमोक्षज्ञातात् ॥१३॥१४६॥ इति ।**

गृहपतेर्वक्ष्यमाणकथानकाभिधास्यमाननामधेयस्य श्रेष्ठिनो राजगृहाद् यः पुत्राणां मोक्षो विमोचनं तदेव ज्ञातं दृष्टान्तस्तस्मात्, भावार्थश्च कथानकगम्यः, तच्चेदम्-समस्ति सकलसुरसुन्दरीमनोहरविलासोपहास-प्रदानप्रवणसीमन्तिनीजनकटाक्षच्छटाक्षेपोपलक्ष्यमाणनिखिलरामणीयकप्रदेशो देशो मगधाभिधानः, तत्र च तुषारगिरिशिखरधवलप्रासादमालाविमलकूटकोटिभिरकालेऽपि शरदभ्रलीलां कुर्वाणमिव बभूव वसन्तपुरं नाम नगरम्,

---

१. कुत इति J. ॥

तस्य च पालयिता सेवावसरसरभसप्रणतनिखिलभूपालविमलमौलिमुकुटकोटीविलग्नमाणिक्यमयूखव्राताभिरञ्जितक्रमकमलयुगलः चण्डदोर्दण्डव्यापारितमण्डलाग्रखण्डितारातिमत्तमातङ्गकुम्भस्थलगलितमुक्ताफलप्रकरप्रसा[1]रिताशेषसङ्ग्राममहीमण्डलः समजायत जितशत्रुनामा नृपतिः, तस्य च सकलजननयनमनोहारिणी पूर्वभवपरम्परोपार्जितपुण्यप्राग्भारनिर्मापितफलसम्बन्धानुकारिणी विबुधवधूविलासावलेपापहारिणी बभूव प्रेयसी धारिणी, तया च सार्द्धमसौ महीपतिः प्रणताशेषक्षितिपतिर्दूरतो निराकृतनि[2]कृतिर्मनोहरपञ्चप्रकारभोगान् भुञ्जानो महान्तमनहासमनैषीत् । इतश्च तत्रैव पुरे प्रचुरतरद्विपद-चतुष्पदा-ऽपद-हिरण्य-सुवर्ण-धन-धान्य-शङ्ख -शिला-मुक्ता-प्रवाल-पद्मराग-वैडूर्य-चन्द्रकान्तेन्द्रनील-महानील-राजपट्टप्रभृतिप्रवरपदार्थ-सार्थ-परिपूर्णसमृद्धिसमुपहसितश्रीकण्ठसखदर्पोद्रेको दीना-ऽनाथा-ऽन्ध-पङ्गुप्रमुखप्राणिप्रणाशिताशेषशोकः समजनि समुद्रदत्ताभिधानो निखिलवणिग्वर्गप्रधानो गुणगणगरिष्ठः श्रेष्ठी, तस्य चाश्रय इव लावण्यगुणानाम्, उदाहरणमिव सर्वश्रेयोवस्तूनाम्, महानिधानमिव पुण्यरत्नानाम्, भूषणमिव स्वकुलसन्ततेः,

१. प्रसाधिता J विना ॥ २. निराकृति J. ॥

पादप इव सौकुमार्यवनलतायाः, समभवत् सुमङ्गलाभिधाना सधर्मचारिणी, तस्यामसौ निबिडबद्धानुरागो जीवलोकोद्भव-प्राज्यवैषयिकशर्मसागरोदरमध्यमग्नोऽनल्पं कालमतिवाहयाञ्चकार, प्रस्तावे च समजनिषत तयोर्विशदसमाचारसमाचरण-पवित्राः पुत्राः क्रमेण प्रियङ्कर-क्षेमङ्कर-धनदेव-सोमदेव-पूर्णभद्र-मणिभद्रनामानः षट्, ते च निसर्गत एव गुरुजनविनयपरायणाः परमकल्याणप्रदानप्रवणपरिशुद्धत्रिवर्गबद्धानुरागा अनुरागभरसमाकृष्यमाणकीर्तिकामिनीबाढोपगूढाः सकलसज्जनमनःसन्तोषकातुच्छसमुच्छलद्दयादाक्षिण्यप्रायप्राज्यगुणालङ्कृतशरीराः शरीरसौन्दर्योत्कर्षतिरस्कृतमकर-केतनलावण्यदर्पातिरेका वणिग्जनोचितव्यवहारसारतया पितरमतिदूरमतिक्रान्तकुटुम्बचिन्ताभारमकार्षुः ।

अन्यदा च धारिणी देवी अन्तःपुरान्तः नरपतौ पटुपटहप्रवादनप्रवृत्ते अनेककरणभङ्गसङ्गसुन्दरं राजहृदयानन्दातिरेकदायकं नृत्यविधिं व्यधात्, ततः सन्तोषभरतरलितमना महीपतिः प्रियायै वरं प्रायच्छत्, सा चोवाच यथा-देव ! अद्यापि तवान्तिक एव वरस्तिष्ठतु, प्रस्तावे याचि[१]ष्ये इति, एवं च गच्छति काले समाययौ अन्यदा

१. याचिष्यत इति L ॥

कामुकलोकविलासोल्लाससाहाय्यकारी कौमुदीदिवसः, विज्ञप्तश्च देव्या वसुन्धराधिपतिः-देव ! क्रियतां वरेण प्रसादो यथाऽद्य कर्पूरपूरप्रतिभशशधरकरनिकरपरिपूरितनिखिलाशायां निशायामिमां नगरीं गरीयसा स्वपरिवारेण शेषान्तःपुरेण च परिकरिता सती त्रिकचतुष्कादिरमणीयप्रदेशसौन्दर्यावलोकनकुतूहलेनास्खलितप्रसरा परिभ्रमामीति, तदन्वेव राजा सर्वत्र नगरे पटहप्रदानपूर्वकं सकलपुरुषव्यक्तीनां रजनिनगरनिर्वासनाज्ञामुद्घोषयामास, ततः प्रातःक्षणादारभ्य यथासंवाहं सर्वेष्वपि पुरुषेषु नगराद् बहिर्गन्तुं प्रवृत्तेषु समुचितसमये स्वयमेव महीपतिर्मन्त्रिप्रमुखनगरप्रधाननरपरिकरपरिकरितो नगराद् बहिरैशानदिग्भागवर्त्तिनि मनोरमोद्याने जगाम, ते च षडपि श्रेष्ठिसूनवो लेख्यककरणव्यग्रा 'ए[1]ते व्रजाम एते व्रजामः' इति निबिडनिबद्धाभिसन्धयोऽपि सन्ध्यासमयं यावदापण एव तस्थुः। इतश्चास्ताचलचूडामलञ्चकार सहस्रकरः, ते च त्वरापरिगता यावदायान्ति गोपुरसमीपे तावत् तज्जीविताशयेव सहोभयकपाटपुटसङ्घटनेन निरुद्धानि प्रतोली-द्वाराणि, तदनु चकितचकिताः केनाप्यलक्ष्यमाणास्ते प्रत्यावृत्य हट्टान्तर्गतगुप्तभूमीगृहैकदेशे निलि[2]ल्यिरे, धारिण्यपि रात्रौ

१. एते व्रजाम इति निबिड K.L. ॥ २. निलिल्युः K। निलिल्यिरे L ली. J सं.। निलिल्युरे J मू. ॥

कृतोदारशृङ्गाराऽन्तःपुरेण सह निर्गतनरे नगरे यथाभिप्रायमभिरेमे, सञ्जाते च प्रातःसमये, समुत्थिते कमलखण्डप्रबोधप्रदानप्रवणे किंशुककुसुमसमच्छायातुच्छोच्छलद्रागरञ्जितदिग्मण्डले जगदेकनेत्रे मित्रे, नगराभ्यन्तरमप्रविष्टे[1]ष्वेव पुरुषेषु महीपालो नगरारक्षकानादिदेश यथा-निभालयत नगरम्, मा न कश्चिदस्मदाज्ञाभङ्गकारी मानवः समजनीति । सम्यग् गवेषयद्भिश्च तैः कृतान्तदूतैरिव प्रापिरे श्रेष्ठिनन्दनाः निवेदिताश्च तत्समयमेव राज्ञः, ततोऽसौ कुपितकृतान्तभीषणभृकुटिभङ्गसङ्गिललाटपट्टमाधाय तच्छ्रेष्ठिपुत्रवधाय तान् व्यापारयाञ्चकार, अत्रान्तरे समाकर्ण्याकाण्डे एव मुद्गराघातपातसदृशमे[2]तं वृत्तान्तं श्रेष्ठी श्रान्त इव भ्रान्त इव पीडित इव करिमकरनिकरकरास्फालनसमुच्छलद्बहलजलकल्लोलाकुलितमहाजलनिधिमध्यसम्भिन्नयानपात्रान्तर्लीयमानमानव इव किंकर्त्तव्यतामूढः क्षणं कामप्यवस्थां दारुणामन्वभूत्, तदनु निराकृत्य कातरनरविलसितम्, अपास्य स्त्रीजनोचितं शोकावेगम्, समालम्ब्य धीरनरोचितं धैर्यम्, अव[3]गणय्य दीनभावम्, नगरप्रधा[4]नान्यलोकसहायः प्रवर-रत्नभृतभाजनव्यग्रपाणिः सहसैव राज्ञो

१. विष्टेषु पुरु K. सं. । विष्टेव पुरु K. मू. । २. मेनं K.L. ॥ ३. अविगणय्य K. ॥ ४. प्राधान्य K. मू. J. मू. । प्राधानान्य L. ली.॥

विज्ञापनायोपतस्थौ, विज्ञप्तवांश्च यथा-देव! न कुतोऽपि चित्तदोषादमी मत्पुत्रा नगरादनिर्गमभाजो बभूवुः, किन्तु तथाविधलेख्यकव्यग्रतया निर्गन्तुमपारयतामादित्यास्तमयसमयाग[१]मे च प्रचलिताना-मप्यमीषां प्रतोलीद्वारपिधानवशेन निर्गमो नाभूत्, अतः क्षम्यतामेकोऽपराधः, क्रियतां प्रियपुत्रजीवितव्यप्रदानेन प्रसादः, एवं च पुनः पुनः भण्यमानोऽपि राजा अवन्ध्यकोपमात्मानं मन्यमानो यदा न मोक्तुमुत्सहते तदा तत्कोपनिर्यापणायैक-पुत्रोपेक्षणेन पञ्च मोचयितुमारब्धाः, यदा तानपि न मुञ्चति तदा द्वयोरुपेक्षणेनैव चत्वारः, एवं तदमोचनेऽपि त्रयो द्वौ यावच्छेषोपेक्षणेन एको ज्येष्ठ इति, ततः सन्निहितामात्य-पुरोहिता-द्यत्यन्ताभ्यर्थनेन निर्मूलकुलोच्छेदो महते पापायेति पर्यालोचेन च मनाग् मन्दीभूतकोपोद्रेको महीपतिर्ज्येष्ठं पुत्रमेकं मुमोचेति ।

अयमत्रार्थोपनयः-यथा तद्वसन्तपुरं नगरं तथा संसारः, यथा राजा तथा श्रावकः, यथा[२] स श्रेष्ठी तथा गुरुः, यथा च षट् पुत्रास्तथाऽमी षट् जीवनिकायाः, यथा च तस्य पितुः शेषपुत्रोपेक्षणेनैकं पुत्रं मोचयतोऽपि न

१. गमे चलिता K. ॥ २. यथा श्रेष्ठी L. ली. ॥ २. ३/८॥

शेषपुत्रवधानुमतिरेवं गुरुर्निजपुत्रप्रायान् षडपि जीवनिकायांस्तैस्तैः प्रव्रज्योत्साहनोपायैर्गृहस्थतया तद्वधप्रवृत्तात् श्रावकाद् मोचयति, यदा चासौ नाद्यापि तान् मोक्तुमुत्सहते तदा ज्येष्ठपुत्रप्रायं त्रसकायं शेषोपेक्षणेन मोचयतोऽपि गुरोर्न शेषकायवधानुमतिदोष इति ॥१३॥ विधिनाऽणुव्रतादिप्रदानमित्युक्तं प्रागतस्तमेव दर्शयति-

**योग-वन्दन-निमित्त-दिगाकारशुद्धिर्विधिः ॥१४॥१४७॥ इति ।**

इह शुद्धिशब्दः प्रत्येकमभिसम्बध्यते, ततो योगशुद्धिर्वन्दनशुद्धिर्निमित्तशुद्धिर्दिक्शुद्धिराकारशुद्धिश्च विधिः अणुव्रतादिप्रतिपत्तौ भवति, तत्र योगाः काय-वाङ्-मनोव्यापारलक्षणाः, तेषां शुद्धिः सोपयोगात्वरगमन- निरवद्यभाषण-शुभचिन्तनादि-रूपा, वन्दनशुद्धिः अस्खलितामिलितप्रणिपातादिदण्डकसमुच्चारणा-ऽसम्भ्रान्तकायोत्सर्गकरणलक्षणा, निमित्तशुद्धिस्तत्कालोच्छलितशङ्ख-पणवादिनिनादश्रवण-पूर्णकुम्भ-भृङ्गार-च्छत्र-ध्वज-चामराद्यवलोकन-शुभगन्धाघ्राणादि-स्वभावा, दिक्शुद्धिः प्राच्युदीची-जिन-जिनचैत्याद्यधिष्ठि-ताशासमाश्रयणस्वरूपा, आकारशुद्धिस्तु

राजाद्यभियोगादिप्रत्याख्यानापवादमु[१]क्तीकरणात्मिकेति ॥३४॥ तथा -

**उचितोपचारश्च ॥१५॥१४८॥ इति ।**

उचितो देव-गुरु-साधर्मिक-स्वजन-दीना-ऽनाथादीनामुपचारार्हाणां यो यस्य योग्य उपचारो धूप-पुष्प-वस्त्र-विलेपना-ऽऽसनदानादिगौरवात्मकः, स च, विधिरित्यनुवर्त्तत इति ॥१५॥ अथाणुव्रतादीन्येव क्रमेण दर्शयन्नाह-

**स्थूलप्राणातिपातादिभ्यो विरतिरणुव्रतानि पञ्च ॥१६॥१४९॥ इति।**

इह प्राणातिपातः प्रमत्तयोगात् प्राणिव्यपरोपणरूपः, स च स्थूलः सूक्ष्मश्च, तत्र सूक्ष्मः पृथिव्यादिविषयः, स्थूलश्च द्वीन्द्रियादित्रसगोचरः, स्थूलश्चासौ प्राणातिपातश्चेति स्थूलप्राणातिपातः, आदिशब्दात् स्थूलमृषावादा-ऽदत्तादाना-ऽब्रह्म-परिग्रहाः परिगृह्यन्ते, ते च प्रायः प्रतीतरूपा एव, ततस्तेभ्यः स्थूलप्राणातिपातादिभ्यः पञ्चभ्यो महापातकेभ्यो विरतिर्विरमणम्, किमित्याह-साधुव्रतेभ्यः सकाशाद् अणूनि लघूनि व्रतानि नियमरूपाणि अणुव्रतानि, कियन्तीत्याह-

१. मुक्तीकारणा J. ॥

पञ्चेति पञ्चसङ्ख्यानि पञ्चाणुव्रतानीति, बहुवचननिर्देशेऽपि यद् विरतिरित्येकवचननिर्देशः स सर्वत्र विरतिसामान्यापेक्षयेति ॥७॥ तथा-

**दिग्व्रत-भोगोपभोगमाना-ऽनर्थदण्डविरतयस्त्रीणि गुणव्रतानि ॥१७॥१५०॥ इति ।**

दिशो ह्यनेकप्रकाराः शास्त्रे वर्णिताः, तत्र सूर्योपलक्षिता पूर्वा, शेषाश्च पूर्वदक्षिणादिकाः सप्त, तथा ऊर्ध्वमधश्च द्वे, एवं दशसु दिक्षु विषये गमनपरिमाणकरणलक्षणं व्रतं नियमो दिग्व्रतम्, भुज्यते सकृदेवासेव्यते यदशनादि तद्भोगः, पुनः पुनर्भुज्यते वसनवि[1]लयादि यत् तदुपभोगः, त[2]तो भोगश्चोपभोगश्च भोगोपभोगौ तयोर्मानं परिमाणं भोगोपभोगमानम्, अर्थः प्रयोजनं धर्मस्वजनेन्द्रियगतशुद्धोपकारस्वरूपम्, तस्मै अर्थाय दण्डः सावद्यानुष्ठानरूपः, तत्प्रतिषेधादनर्थदण्डः, स च चतुर्द्धा-अपध्यानाचरित-प्रमादाचरित-हिंस्रप्रदान-पापकर्मोपदेशभेदात्, तस्य विरतिरनर्थदण्डविरतिः, ततः दिग्व्रतं च भोगोपभोगमानं चानर्थदण्डविरतिश्चेति समासः, किमित्याह-त्रीणि त्रिसङ्ख्यानि

१. वनितादि इत्यर्थः ॥ २. ततो नास्ति J.K. ॥

गुणव्रतानि गुणाय उपकाराय व्रतानि भवन्ति, गुणव्रतप्रतिपत्तिमन्तरेणाणुव्रतानां तथाविधशुद्ध्यभावादिति ॥१७॥ तथा-

**सामायिक-देशावकाश-पोषधोपवासा-ऽतिथिसंविभागाश्चत्वारि शिक्षापदानि ॥१८॥१५१॥** इति ।

समानां मोक्षसाधनं प्रति सदृशसामर्थ्यानां सम्यग्दर्शन-ज्ञान-चारित्राणामायो लाभः समस्य वा रागद्वेषान्तरालवर्त्तितया मध्यस्थस्य सत आयः सम्यद्गर्शनादिलक्षणः समायः, साम्नो वा सर्वजीवमैत्रीभावलक्षणस्य आयः सामायः, सर्वत्र स्वार्थिकेकण्प्रत्ययोपादानात् सामायिकं सावद्ययोगपरिहार-निरवद्ययोगानुष्ठानरूपो जीवपरिणामः। देशे विभागे प्राक्प्रतिपन्न-दिग्व्रतस्य योजनशतादिपरिमाणरूपस्य अवकाशो गोचरो यस्य प्रतिदिनं प्रत्याख्येयतया तत् तथा, पोषं धत्ते पोषधोऽष्टमी-चतुर्दश्यादिः पर्वदिवसः, उपेति सह अप[१]वृत्तदोषस्य सतो गुणैराहारपरिहारादिरूपैर्वास उपवासः, यथोक्तम् -

१. अपावृ K. मू. ॥ उपावृ L. ॥ दृश्यतामग्रेतनं टिप्पणम् ॥

*अप[१] वृत्तस्य दोषेभ्यः, सम्यग्वासो गुणैः सह । उपवासः स विज्ञेयो, न शरीरविशोषणम् ॥१०७॥* [ब्रह्मप्रकरणे २४१] इति । ततः पोषधेषूपवासः पोषधोपवासः । अतिथयो वीतरागधर्मस्थाः साधवः साध्व्यः श्रावकाः श्राविकाश्च, तेषां न्यायागतकल्पनीयादिविशेषणानामन्नपानादीनां सङ्गतवृत्त्या विभजनं वितरणमतिथिसंविभागः, तथा च उमास्वातिवाचकविरचितश्रावकप्रज्ञप्तिसूत्रं यथा- *अतिथिसंविभागो नाम अतिथयः साधवः साध्व्यः श्रावकाः श्राविकाश्च, एतेषु गृहमुपागतेषु भक्त्याऽभ्युत्थाना-ऽऽसनदान-पादप्रमार्जन-नमस्कारादिभिरर्चयित्वा यथाविभवशक्ति अन्न-पान-वस्त्रौषधा-ऽऽलयादि-प्रदानेन संविभागः कार्यः* [ ] इति, ततः सामायिकं च देशावकाशं च पोषधोपवासश्चातिथिसंविभागश्चेति समासः, चत्वारीति चतुःसङ्ख्यानि, किमित्याह-शिक्षापदानि, शिक्षा साधुधर्माभ्यासः, तस्य पदानि स्थानानि भवन्ति ॥९॥ ततश्च-

**एतदारोपणं दानं यथाऽर्हं, साकल्य - वैकल्याभ्याम् ॥१९॥१५२॥ इति ।**

---

१. उपा. L.। मुद्रिते आचार्यश्रीहरिभद्रसूरिविरचिते 'ब्रह्मसिद्धान्त-समुच्चय' इति कल्पिताभिधे ब्रह्मप्रकरणे 'उपावृत्तस्य' इति पाठ इति ध्येयम् ॥

इह तेषामणुव्रतादीनां प्रागुक्तलक्षणे धर्मार्हे प्राणिनि यदारोपणम् उक्तविधिनैव निक्षेपणम्, तत् किमित्याह- दानं प्रागुपन्यस्तमभिधीयते, कथमित्याह-यथार्हं यथायोग्यम्, काभ्यामित्याह- साकल्य-वैकल्याभ्याम्, साकल्येन समस्ताणुव्रत-गुणव्रत-शिक्षापदाध्यारोपलक्षणेन वैकल्येन वा अणुव्रतादीनामन्यतमारोपणेनेति ॥१९॥ एवं सम्यक्त्वमूलकेष्वणुव्रतादिषु समारोपितेषु यत् करणीयं तदाह -

**गृहीतेष्वनतिचारपालनम् ॥२०॥१५३॥ इति ।**

गृहीतेषु प्रतिपन्नेषु सम्यग्दर्शनादिषु गुणेषु, किमित्याह-निरतिचारपालनमिति, अतिचारो विराधना देशभङ्ग इत्येकोऽर्थः, अविद्यमानोऽतिचारो येषु तानि अनतिचाराणि, तेषामनुपालनं धरणं कार्यम्, अतिचारदोषोपघातेन हि कुवातोपहतसस्यानामिव स्वफलप्रसाधनं प्रत्यसमर्थत्वादमीषामिति ॥२०॥ अनतिचारपालनमित्युक्तम्, अथातिचारानेवाह -

**शङ्का-काङ्क्षा-विचिकित्सा-ऽन्यदृष्टिप्रशंसा-संस्तवाः सम्यग्दृष्टेरतीचाराः ॥२१॥१५४॥**

इति ।

इह शङ्का काङ्क्षा विचिकित्सा च ज्ञानाद्याचारकथनमिति सू[1]त्रव्याख्योक्तलक्षणा एव, अन्यदृष्टीनां सर्वज्ञप्रणीतदर्शनव्यतिरिक्तानां शाक्य-कपिल-कणादा-ऽक्षपादादिप्रणीतमतवर्त्तिनां पाषण्डिनां प्रशंसा-संस्तवौ अन्यदृष्टिप्रशंसा-संस्तवौ, तत्र 'पुण्यभाज एते' 'सुलब्धमेषां जन्म' 'दयालव एते' इत्यादिका प्रशंसा, संस्तवश्चेह संवासजनितः परिचयः वसन-भोजनदाना-ऽऽलापादिलक्षणः परिगृह्यते, न स्तवरूपः, तथा च लोके प्रतीत एव सम्पूर्वः स्तौतिः परिचये, *असंस्तुतेषु प्रसभं भयेषु* [ ] इत्यादाविवेति, ततः शङ्का च काङ्क्षा च विचिकित्सा च अन्यदृष्टिप्रशंसा-संस्तवौ चेति समासः, किमित्याह-सम्यग्दृष्टेः सम्यग्दर्शनस्य अतीचारा विराधनाप्रकाराः सम्पद्यन्ते, शुद्धतत्त्वश्रद्धानबाधाविधायित्वादिति ॥२१॥ तथा-

**व्रतशीलेषु पञ्च पञ्च यथाक्रमम् ॥२२॥१५५॥ इति ।**

---

१. दृश्यताम् २। ११॥

व्रतेषु अणुव्रतेषु शीलेषु च गुणव्रत-शिक्षापदलक्षणेषु पञ्च पञ्च यथाक्रमं यथापरिपाटि अतीचारा भवन्तीति सर्वत्रानुवर्त्तते इति ॥२२॥ तत्र प्रथमाणुव्रते-

**बन्ध-वध-च्छविच्छेदा-ऽतिभारारोपणा-ऽन्नपाननिरोधाः ॥२३॥१५६॥ इति ।**

स्थूलप्राणातिपातविरतिलक्षणस्याणुव्रतस्य बन्धो वधश्छविच्छेदोऽतिभारारोपणमन्नपाननिरोधश्चेत्यतीचाराः, तत्र बन्धो रज्जुदामनकादिना संयमनम्, वधः कशादिभिर्हननम्, छविस्त्वक्, तद्योगाच्छरीरमपि छविः, तस्य छेदो ऽसिपुत्रिकादिभिः पाटनम्, तथाऽतीव भारोऽतीभारः प्रभूतस्य पूगफलादेर्गवादिपृष्ठादावारोपणम्, तथा अन्नपानयोः भोजनोदकयोर्निरोधो व्यवच्छेदोऽन्नपाननिरोधः, एते च क्रोधलोभादिकषाय-मलकलङ्कितान्तःकरणस्य प्राणिप्राणप्रहाणनिरपेक्षस्य सतो जन्तोरतिचारा भवन्ति, सापेक्षस्य तु बन्धादिकरणेऽपि सापेक्षत्वान्नातिचारत्वमेषामिति । अत्र चायमावश्यकचूर्ण्याद्युक्तो विधिः - बन्धो द्विपदानां चतुष्पदानां वा स्यात्, सोऽप्यर्थायानर्थाय वा, तत्रानर्थाय तावन्नासौ विधातुं युज्यते, अर्थाय पुनरसौ द्विविधः स्यात्, सापेक्षो निरपेक्षश्च, तत्र निरपेक्षो नाम यन्निश्चलमत्यर्थं बध्यते,

सापेक्षः पुनर्यद् दामग्रन्थिना यश्च बद्धः सन् शक्यते प्रदीपनकादिषु विमोचयितुं वा छेत्तुं वा, एवं तावच्चतुष्पदानां बन्धः। द्विपदानां पुनरेवम्- दासो वा दासी वा चौरो वा पाठा[१]दिप्रमत्तपुत्रो वा यदि बध्यते तदा सविक्रमेणैव बन्धनीयो रक्षणीयश्च तथा यथाऽग्निभयादिषु न विनश्यति। तथा ते किल द्विपद-चतुष्पदाः श्रावकेण सङ्ग्रहीतव्या ये अबद्धा एवासत इति १। वधोऽपि तथैव, नवरं निरपेक्षवधो निर्दयताडना, सापेक्षवधः पुनरेवमादित एव भीतपर्षदा श्रावकेण भवितव्यम्, यदि पुनर्न करोति कोऽपि विनयं तदा तं मर्माणि मुक्त्वा लतया दवरकेण वा सकृद् द्विर्वा ताडयेदिति २। छविच्छेदोऽपि तथैव, नवरं निरपेक्षो हस्त-पाद-कर्ण-नासिका यन्निर्दयं छिनत्ति, सापेक्षः पुनर्यद् गण्डं वाऽरुर्वा छिन्द्याद्वा दहेद्वेति ३। तथाऽति[२]भारो नारोपयितव्यः, पूर्वमेव हि या च द्विपदादिवाहनेन जीविका सा श्राद्धेन मोक्तव्या, अथान्याऽसौ न भवेत् तदा द्विपदो यं भारं स्वयमुत्क्षिपत्यवतारयति च तं वाह्यते, चतुष्पदस्य तु यथोचितभारादसौ किञ्चिदूनः क्रियते, हलशकटादिषु पुनरुचितवेलायामसौ मुच्यत इति ४। तथा भक्तपानव्यवच्छेदो न कस्यापि कर्त्तव्यः, तीक्ष्णबुभुक्षो ह्यन्यथा

१. प्रमत्तः पुत्रो L. सं. ली.॥ २. भारो वा नारोप J. ॥

म्रियते, सोऽप्यर्थानर्थादिभेदो बन्धवद् द्रष्टव्यः, नवरं सापेक्षो रोगचिकित्सार्थं स्यात्, अपराधकारिणि च वाचैव वदद् यद्'अद्य ते न दास्यते भोजनादि', शान्तिनिमित्तं वोपवासं कारयेत् ५। किं बहुना ?, यथा मूलगुणस्य प्राणातिपातविरमणस्यातिचारो न भवति तथा सर्वत्र यतनया यतितव्यमिति ।

ननु प्राणातिपात एव व्रतिना प्रत्याख्यातः, ततो बन्धादिकरणेऽपि न दोषो, विरतेरखण्डितत्वात्। अथ बन्धादयोऽपि प्रत्याख्यातास्तदा तत्करणे व्रतभङ्ग एव, विरतिखण्डनात्। किञ्च, बन्धादीनां प्रत्याख्येयत्वे विवक्षित-व्रतेयत्ता विशीर्येत, प्रतिव्रतं पञ्चानामतिचारव्रतानामाधिक्यादित्येवं न बन्धादीनामतिचारतेति, अत्रोच्यते, सत्यम्, प्राणातिपात एव प्रत्याख्यातो न बन्धादयः, केवलं तत्प्रत्याख्यानेऽर्थतस्तेऽपि प्रत्याख्याता इव द्रष्टव्याः, तदुपायत्वात् तेषाम्, न च बन्धादिकरणेऽपि व्रतभङ्गः, किं त्वतिचार एव, कथम् ?, इह द्विविधं व्रतम्-अन्तर्वृत्त्या बहिर्वृत्त्या च, तत्र मारयामीति विकल्पाभावेन यदा कोपाद्यावेशात् परप्राणप्रहाणमविगणयन् बन्धादौ प्रवर्त्तते न च प्राणघातो भवति तदा दयावर्जिततया विरत्यनपेक्षप्रवृत्तित्वेन अन्तर्वृत्त्या व्रतस्य भङ्गः, प्राणिघाताभावाच्च बहिर्वृत्त्या पालनमिति देशस्य

भञ्जनाद् देशस्यैव च पालनादतिचारव्यपदेशः प्रवर्तते, तदु[1]क्तम्-

*न मारयामीति कृतव्रतस्य, विनैव मृत्युं क इहातिचारः ?।*
*निगद्यते यः कुपितो वधादीन्, करोत्यसौ स्यान्नियमेऽनपेक्षः ॥१०८॥*
*मृत्योरभावान्नियमोऽस्ति तस्य, कोपाद् दयाहीनतया तु भङ्गः।*
*देशस्य भङ्गादनुपालनाच्च, पूज्या अतीचारमुदाहरन्ति ॥१०९॥* [ ] इति ।

यच्चोक्तं 'व्रतेयत्ता विशीर्यते' इति, तदयुक्तम्, विशुद्धाहिंसादिविरतिसद्भावे हि बन्धादीनामभाव एवेति, तदेवं बन्धादयोऽतिचारा एवेति, बन्धादिग्रहणस्य चोपलक्षणत्वान्मन्त्र-तन्त्रप्रयोगादयोऽन्येऽप्येवमत्रातिचारतया दृश्या इति ॥२३॥ अथ द्वितीयस्य

**मिथ्योपदेश-रहस्याभ्याख्यान-कूटलेखक्रिया-न्यासापहार-स्वदारमन्त्रभेदाः ॥२४॥१५७॥**

१. यदुक्तम् K. ॥

इति।

मिथ्योपदेशश्च रहस्याभ्याख्यानं च कूटलेखक्रिया च न्यासापहारश्च स्वदारमन्त्रभेदश्चेति समासः। तत्र मिथ्योपदेशो नाम अलीकवादविषय उपदेशः- 'इदमेवं चैवं च ब्रूहि' इत्यादिकमसत्याभिधानशिक्षणम् १। रहस्याभ्याख्यानं रह एकान्तस्तत्र भवं रहस्यं रहोनिमित्तं तच्च तदभ्याख्यानं चेति समासः, एतदुक्तं भवति- रहसि मन्त्रयमाणानवलोक्याभिधत्ते 'एते हि इदं चेदं च राजादिविरुद्धं मन्त्रयन्ते' इति २। कूटलेखस्य असद्भूतार्थसूचकाक्षरलेखनस्य करणं कूटलेखक्रिया ३। न्यासापहार इति, न्यासः परगृहे रूपकादेर्निक्षेपः, तस्य अपहारो ऽपलापः ४। स्वदारमन्त्रभेद इति, स्वदाराणामुपलक्षणत्वान्मित्रादीनां च मन्त्रस्य गुप्तभाषितस्य भेदो बहिः प्रकाशनमिति ५। अत्र च मिथ्योपदेशो यद्यपि 'मृषा न वादयामि' इत्यत्र, 'न वदामि न वादयामि' इत्यत्र वा व्रते भङ्ग एव, 'न वदामि' इति व्रतान्तरे तु न किञ्चन, तथापि सहसाकाराऽनाभोगाभ्यामतिक्रमव्यतिक्रमाऽतिचारैर्वा मृषावादे परप्रवर्त्तनं व्रतस्यातिचारोऽयम्, अथवा व्रतसंरक्षणबुद्ध्या परवृत्तान्तकथनद्वारेण मृषोपदेशं यच्छतोऽतिचारोऽयम्,

व्रतसव्यपेक्षत्वान्मृषावादे परप्रवर्त्तनाच्च भग्नाभग्नरूपत्वाद् व्रतस्येति ।

ननु रहस्याभ्याख्यानमसद्दोषाभिधानरूपत्वेन प्रत्याख्याततत्वाद् भङ्ग एव, न त्वतिचार इति, सत्यम्, किन्तु यदा परोपघातकमनाभोगादिनाऽभिधत्ते तदा सङ्क्लेशाभावेन व्रतानपेक्षत्वाभावान्न व्रतस्य भङ्गः, परोपघातहेतुत्वाच्च भङ्ग इति भङ्गाभङ्गरूपोऽतिचारः, यदा पुनस्तीव्रसङ्क्लेशादभ्याख्याति तदा भङ्गो व्रतनिरपेक्षत्वात्, आह च -

*स[१]हसाभक्खाणाई जाणंतो जइ करेइ तो भंगो । जइ पुणऽणाभोगाईहिंतो तो होइ अइयारो ॥११०॥*

कूटलेखकरणं तु यद्यपि 'कायेन मृषावादं न करोमि' इत्यस्य 'न करोमि न कारयामि' इत्यस्य वा व्रतस्य भङ्ग एव, व्रतान्तरे तु न किञ्चन, तथापि सहसाकारादिनाऽतिक्रमादिना वाऽतिचारः, अथवा मृषावाद इति मृ[२]षाभणनं मया प्रत्याख्यातमिदं पुनर्लेखनमिति भावनया मुग्धबुद्धेर्व्रतसव्यपेक्षस्यातिचार इति । न्यासापहारे पुनरदत्तादानं साक्षादेव भवति, मृषावादव्रतातिचारत्वं चास्य 'न त्वदीयं मम समीपे किञ्चिदपि' इत्यनाभोगादिनाऽपह्नुवानस्य स्यादिति ।

---

१. सहसाभ्याख्यानादि जानन् यदि करोति ततो भङ्गः । यदि पुनरनाभोगादिभिः ततो भवत्यतिचारः ॥ २. मृषाभषणं J. मू. । मृषाभाषणं J. सं. ।

स्वदारमन्त्रभेदः पुनरनुवादरूपत्वेन सत्यत्वाद् यद्यपि नातिचारो घटते तथापि मन्त्रितार्थप्रकाशनजनितलज्जादितः स्वदारादेर्मरणादिसम्भवेन परमार्थतस्तस्यासत्यत्वाद् कथञ्चिद् भङ्गरूपत्वादतिचार एवेति ॥२४॥ अथ तृतीयस्य

**स्तेनप्रयोग-तदाहृतादान-विरुद्धराज्यातिक्रम-हीनाधिकमानोन्मान-प्रतिरूपकव्यवहाराः॥२५॥१५८॥ इति ।**

स्तेनप्रयोगश्च तदाहृतादानं च विरुद्धराज्यातिक्रमश्च हीनाधिकमानोन्मानानि च प्रतिरूपकव्यवहारश्चेति समासः। तत्र स्तेनाश्चौरास्तेषां प्रयोगो व्यापारणं 'हरत यूयम्' इत्यनुज्ञाप्रदानम् १। तथा तैराहृतस्य कुङ्कुमादिद्रव्यस्याऽऽदानं सङ्ग्रहः २। विरुद्धः स्वकीयस्य राज्ञः प्रतिपन्थी, तस्य राज्यं कटकं देशो वा, तत्रातिक्रमः स्वराजभूमिसीमातिलङ्घनेन क्रमणं प्रवेशो विरुद्धराज्यातिक्रमः ३। हीने स्वभावापेक्षाया न्यूने अधिके वा मानोन्माने कुडवा[1]दितुलारूपे[2] भवतो हीनाधिकमानोन्माने ४। शुद्धेन व्रीह्यादिना घृतादिना वा प्रतिरूपकं सदृशं पल[3]ञ्जयादि वसादि वा द्रव्यं तेन व्यवहारो

१. वादिरूपे J मू० । वादितुलादिरूपे J सं० ॥ २. रूपेण भवतो K. ॥ ३. पुलंज्यादि K. ॥

विक्रयरूपः स प्रतिरूपकव्यवहार इति ५। इह स्तेनप्रयोगो यद्यपि 'चौर्यं न करोमि न कारयामि' इत्येवंप्रतिपन्नव्रतस्य भङ्ग एव तथापि 'किमधुना यूयं निर्व्यापारास्तिष्ठथ? यदि वो भक्तकादि नास्ति तदाऽहं ददामि, भवदानीतमोषस्य च यदि विक्रायको न विद्यते तदाऽहं विक्रेष्यामि' इत्येवंविधवचनैश्चौरान् व्यापारयतः स्वकल्पनया तद्व्यापारणं परिहरतो व्रतसापेक्षस्यासावतीचारः १। तथा स्तेनाहृतं काण[1]कक्रयेण लोभदोषात् प्रच्छन्नं गृह्णंश्चौरो भवति, यदाह-

*चौरश्चौरापको मन्त्री, भेदज्ञः काणकक्रयी । अन्नदः स्थानदश्चैव, चौरः सप्तविधः स्मृतः ॥१११॥* [ ]

ततश्चौर्यकरणाद् व्रतभङ्गः, 'वाणिज्यमेव मया विधीयते, न चौरिका' इत्यध्यवसायेन च व्रतानपेक्षत्वाभावाद् न भङ्ग इति भङ्गाभङ्गरूपोऽतिचारः २। विरुद्धराज्यातिक्रमस्तु यद्यपि स्वस्वामि[2]नाऽननुज्ञातस्य परकटकादिप्रवेशस्य सा[3]मीजीवादत्तं तित्थयरेणं तहेव य गुरुहिं [नवपदप्रक०३८] इत्यदत्तादानलक्षणयोगेन विरुद्धराज्यातिक्रमकारिणां च चौर्यदण्डयोगेनादत्तादानरूपत्वाद् भङ्ग एव तथापि विरुद्धराज्यातिक्रमं कुर्वता 'मया वाणिज्यमेव कृतम् न चौर्यम्' इति

१. काणक्रयेण J. विना ॥ २. मिनोऽननु K.J. ॥ ३. स्वामि-जीवादत्तं तीर्थकरेण तथैव च गुरुभिः ॥

भावनया व्रतसापेक्षत्वात् लोके च चौरोऽयमिति व्यपदेशाभावादतिचारोऽयमिति ३। तथा हीनाधिकमानोन्मानव्यवहारः प्रतिरूपकव्यवहारश्च परव्यंसनेन परधनग्रहणरूपत्वाद् भङ्ग एव, 'केवलं क्षत्रखननादिकमेव चौर्यम्, कूटतुलादिव्यवहार-तत्प्रतिरूप-व्यवहारौ तु वणिक्कलैव' इति स्वकीयकल्पनया व्रतरक्षणोद्यततयाऽतिचार इति ४-५। अथवा स्तेनप्रयोगादयः पञ्चाप्यमी व्यक्तचौर्यरूपा एव, केवलं सहसाकारादिना अतिक्रमव्यतिक्रमादिना वा प्रकारेण विधीयमाना अतिचारतया व्यपदिश्यन्ते इति। न चैते रा[1]जसेवकादीनां न सम्भवन्ति, तथाहि-आद्ययोः स्पष्ट एव तेषां सम्भवः, विरुद्धराज्यातिक्रमस्तु यदा सामन्तादिः स्वस्वामिनो वृत्तिमुपजीवति तद्विरुद्धस्य च सहायीभवति तदा तस्यातिचारो भवति, कूटतुलादयस्तु यदा भाण्डागारद्रव्याणां विनिमयं कारयति तदा राज्ञोऽप्यतिचाराः स्युरिति ॥२५॥ अथ चतुर्थाणुव्रतस्य स्वदारसन्तोषलक्षणस्य परदारपरिहाररूपस्य चातीचाराः-

**परवीवाहकरणेत्वरपरिगृहीता-ऽपरिगृहीतागमना-ऽनङ्गक्रीडा-**

---

१. 'राज-राजसेवकादीनाम्' इति पञ्चाशकवृत्त्यादौ पाठः ।।

तीव्रकामाभिलाषाः ॥२६॥१५९॥ इति ।

इत्वरपरिगृहीता चापरिगृहीता च इत्वरपरिगृहीतापरिगृहीते, तयोर्गमने इत्वरपरिगृहीता-ऽपरिगृहीतागमने, ततः परवीवाहकरणं च इत्वरपरिगृहीता-ऽपरिगृहीतागमने चानङ्गक्रीडा च तीव्रकामाभिलाषश्चेति समासः, इह परेषां स्वापत्यव्यतिरिक्तानां जनानां वीवाहकरणं कन्याफललिप्सया स्नेहसम्बन्धादिना वा परिणयनविधानं परवीवाहकरणम्, इह च स्वापत्येष्वपि सङ्ख्याभिग्रहो न्याय्यः तथा इत्वरी अयनशीला भाटीप्रदानेन स्तोककालं परिगृहीता इत्वरपरिगृहीता वेश्या, तथा अपरिगृहीता वेश्यैव अगृहीतान्यसत्कभाटिः कुलाङ्गना च अनाथेति, तयोर्गमनम् आसेवनम् इत्वरपरिगृहीता-ऽपरिगृहीतागमनम्, तथा अङ्गं देहावयवोऽपि मैथुनापेक्षया योनिर्मेहनं च, तद्व्यतिरिक्तानिं अनङ्गानि कुच-कक्षोरु-वदनादीनि, तेषु क्रीडा रमणम् अनङ्गक्रीडा, अथवा अनङ्गः कामः, तस्य तेन वा क्रीडा अनङ्गक्रीडा स्वलिङ्गेन निष्पन्नप्रयोजनस्याहार्यैश्चर्मादिघटितप्रजननैर्योषिदवाच्यदेशासेवनमित्यर्थः, तथा कामे कामोदयजन्ये मैथुने अथवा 'सूचनात् सूत्रम्' इति न्यायात् कामेषु कामभोगेषु, तत्र कामौ शब्दरूपे, भोगा गन्ध-रस-स्पर्शाः, तेषु

तीव्राभिलाषोऽत्यन्ततदध्यवसायित्वं यतो वाजीकरणादिनाऽनवरतसुरतसुखार्थं मदनमुद्दीपयतीति, एतान् समाचरन्नतिचरति चतुर्थाणुव्रतमिति । इह च द्वितीय-तृतीयातिचारौ स्वदार-सन्तोषिण एव नेतरस्य, शेषास्तु द्वयोरपीति, एतदेव च सूत्रानुपाति, यदाह-*स[१]दारसंतोसस्स इमे पंच अइयारा* [उपासक०] इत्यादि । भावना चेयमत्र-भाटीप्रदानेनेत्वर-कालस्वीकारेण स्वकलत्रीकृत्य वेश्यां भुञ्जानस्य स्वकीयकल्पनया स्वदारत्वेन व्रतसापेक्षचित्तत्वान्न भङ्गः, अल्पकालपरिग्रहाच्च वस्तुतोऽस्वकलत्रत्वाद्भङ्ग इति भङ्गाभङ्गरूपोऽतिचारः, अपरिगृहीतागमनं त्वनाभोगादिनाऽतिक्रमादिना वाऽतीचारः। परदारवर्जिनो नैतावतीचारौ, इत्वरकालपरिगृहीताऽपरिगृहीतयोर्वेश्यात्वेनानाथकुलाङ्गनायास्त्वनाथतयैवापरदारत्वादिति ॥

अपरे त्वाहुः-इत्वरपरिगृहीतागमनं स्वदारसन्तोषवतोऽतिचारः, अपरिगृहीतागमनं तु परदारवर्जिनः, तत्र प्रथमभावना पूर्ववत्, द्वितीयभावना त्वेवम्-अपरिगृहीता नाम वेश्या, तां यदा गृहीतान्यसत्कभाटिकामभिगच्छति तदा

१. स्वदारसन्तोषस्य इमे पञ्च अतिचाराः। ''सदारसंतोसस्स इमे पंच अइयारा जाणियव्वा न समायरियव्वा'' इति उपासकदशाङ्गसूत्रे ॥

परदारगमनजन्य-दोषसम्भवात् कथञ्चित् परदारत्वाच्च भङ्गो वेश्यात्वाच्चाभङ्गो भङ्गाभङ्ग इत्यतिचारः ।

अन्ये पुनरन्यथा प्राहुः-

*प[१]रदारवज्जिणो पंच होन्ति तिन्नि उ सदारसंतुट्ठे । इत्थीए तिन्नि पंच व भंगविग[२]प्पेहिं नायव्वं ॥११२॥*

[सम्बोधप्रकरणे ७।४१]

इह भावना-परेण इत्वरकालं या परिगृहीता वेश्या तद्गमनमतिचारः परदारवर्जिनः, कथञ्चित् तस्याः परदारत्वात्, तथा अपरिगृहीताया अनाथकुलाङ्गनाया एव यद् गमनं तदपि तस्यैवातिचारः, लोके परदारत्वेन तस्या रूढत्वात्, तत्कामुककल्पनया च परस्य भर्त्रादेरभावेनापरदारत्वात् । शेषास्तूभयोरपि स्युः, तथाहि-स्वदारसन्तोषिणः स्वकलत्रेऽपि तदितरस्य तु वेश्यास्वकलत्रयोरपि यदनङ्गरतं तत् साक्षादप्रत्याख्यातमपि न विधेयम्,

१. परदारवर्जिनः पञ्च भवन्ति त्रयस्तु स्वदारसन्तुष्टे। स्त्रियाः त्रयः पञ्च वा भङ्गविकल्पैः ज्ञातव्यम्॥ २. प्पेहिं अइयारा॥ इति नवपदप्रकरणे ५४ तमगाथायां पाठोऽयमेव च योगशास्त्रवृत्तावपि उद्धृतः ३।९३। पृ०५३३॥

यतोऽसावत्यन्तपापभीरुतया ब्रह्मचर्यं चिकीर्षुरपि यदा वेदोदयासहिष्णुतया तद्विधातुं न शक्नोति तदा यापनामात्रार्थं स्वदारसन्तोषादि प्रतिपद्यते, मैथुनमात्रेणैव च यापनायाः सम्भवादनङ्गरतमर्थतः प्रत्याख्यातमेव, एवं परविवाह-तीव्रकामाभिलाषावपीति, अतः कथञ्चित् प्रत्याख्यातेषु प्रवृत्तेरतिचारता तेषाम् ।

अन्ये त्वनङ्गक्रीडामेवं भावयन्ति- स हि निधुवनमेव व्रतविषय इति स्वकीयकल्पनया तत् परिहरन् स्वदारसन्तोषी वेश्यादौ परदारवर्जकस्तु परदारेष्वालिङ्गनादिरूपामनङ्गक्रीडां कुर्वन् कथञ्चिदेवातिचरति व्रतं व्रतसापेक्षत्वादिति । तथा स्वदारसन्तोषवता स्वकलत्राद् इतरेण च स्वकलत्रवेश्याभ्यामन्यत्र मनो-वाक्-कायैर्मैथुनं न कार्यं न च कारणीयमित्येवं यदा प्रतिपन्नं व्रतं भवति तदा परविवाहकरणतः तत्कारणमर्थतोऽनुष्ठितं भवति, तद्व्रती च मन्यते 'विवाह एवायं मया विधीयते, न मैथुनम्' इति ततो व्रतसापेक्षत्वादतिचार इति ।

ननु परविवाहकरणे कन्याफललिप्सा कारणमुक्तं तत्र किं सम्यग्दृष्टिरसौ व्रती मिथ्यादृष्टिर्वा ?, यदि सम्यग्दृष्टिस्तदा तस्य न सा सम्भवति, सम्यग्दृष्टित्वादेव, अथ मिथ्यादृष्टिस्तदा मिथ्या-दृष्टेरणुव्रतानि न भवन्त्येवेति

कथं सा परविवाहकरणलक्षणातिचारकारणमिति, सत्यम्, केवलमव्युत्पन्नावस्थायां साऽपि सम्भवति, किं च यथाभद्रकस्य मिथ्यादृशोऽपि सन्मार्गप्रवेशनायाभिग्रहमात्रं ददत्यपि गीतार्थाः, यथा आर्यसुहस्ती रङ्कस्य सर्वविरतिं दत्तवान् । इदं च परविवाहवर्जनं स्वापत्यव्यतिरिक्तेष्वेव न्याय्यम्, अन्यथाऽपरिणीता कन्या स्वच्छन्द-चारिणी स्यात्, ततः शासनोपघातः स्याद्, विहितविवाहा तु कृतव्रतबन्धत्वेन न तथा स्यादिति, यच्चोक्तं 'स्वापत्येष्वपि सङ्ख्याभिग्रहो न्याय्यः' तच्चिन्तकान्तरसद्भावे सुतसङ्ख्यापूर्तौ वाऽपत्यान्तरोत्पत्ति-परिहारोपायत इति ।

अपरे त्वाहुः-परोऽन्यो यो विवाहः, आत्मन एव विशिष्टसन्तोषाभावाद् योषिदन्तराणि प्रति विवाहान्तरकरणं तत् परविवाहकरणम्, अयं च स्वदारसन्तोषिण इति। स्त्रियास्तु स्वपुरुषसन्तोष-परपुरुषवर्जनयोर्न भेदः, स्वपुरुषव्यतिरेकेणान्येषां सर्वेषां परपुरुषत्वात्, ततः परविवाहकरणा-ऽनङ्गक्रीडा-तीव्रकामाभिलाषाः स्वदारसन्तोषिण इव स्वपुरुषविषये स्युः। द्वितीयस्तु यदा स्वकीयपतिः सपत्न्या वारकदिने परिगृहीतो भवति तदा सपत्नीवारकमतिक्रम्य तं परिभुजानाया अतिचारः। तृतीयस्त्वतिक्रमादिना परपुरुषमभिसरन्त्याः समवसेयः, ब्रह्म-चारिणस्त्वतिक्रमादिनाऽतिचार

इति ॥२६॥ अथ पञ्चमाणुव्रतस्य-

**क्षेत्रवास्तु-हिरण्यसुवर्ण-धनधान्य-दासीदास-कुप्यप्रमाणातिक्रमाः ॥२७॥१६०॥ इति ।**

क्षेत्र-वास्तुनोर्हिरण्य-सुवर्णयोर्धन-धान्ययोर्दासी-दासयोः कुप्यस्य च प्रमाणातिक्रमा इति समासः, तत्र क्षेत्रं सस्योत्पत्तिभूमिः, तच्च सेतु-केतूभयभेदात् त्रिविधम्, तत्र सेतुक्षेत्रमरघट्टादिसेक्यम्, केतुक्षेत्रं तु आकाशोदकनिष्पाद्यम्, उभयक्षेत्रं तु तदुभयनिष्पाद्यम् । वास्तु पुनरगारं ग्रामनगरादि च, तत्रागारं त्रिविधम्-खातमुच्छ्रितं खातोच्छ्रितं च, तत्र खातं भूमिगृहादि, उच्छ्रितमुच्छ्रयेण कृतम्, उभयं भूमिगृहस्योपरि प्रासादः, एतयोश्च क्षेत्र-वास्तुनोः प्रमाणस्य क्षेत्रान्तरादिमीलनेन अतिक्रमोऽतिचारो भवति, तथाहि-किलैकमेव क्षेत्रं वास्तु वेत्यभिग्रहवतोऽधिकतरतदभिलाषे सति व्रतभङ्गभयात् प्राक्तनक्षेत्रादिप्रत्यासन्नं तद् गृहीत्वा पूर्वेण सह तस्यैकत्वकरणार्थं वृ[1]त्याद्यपनयनेन तत् तत्र योज[2]यतो व्रतसापेक्षत्वात् कथञ्चिद्विरतिबाधनाच्चातिचार इति १। तथा हिरण्यं रजतम्, सुवर्णं हेम, एतत् परिमाणस्य

१. वृत्या K.J. । ''वाटे प्राचीनावेष्टकौ वृतिः'' इति अभिधानचिन्तामणौ श्लो० ९८२॥ २. प्रयोजयतो K.J. ॥

अन्यवितरणेनातिक्रमोऽतिचारो भवति, यथा केनापि चातुर्मासाद्यवधिना हिरण्यादिपरिमाणं विहितम्, तत्र च तेन तुष्टराजादेः सकाशात् तदधिकं तल्लब्धम्, तच्चान्यस्मै व्रतभङ्गभयात् प्रददाति 'पूर्णेऽवधौ ग्रहीष्यामि' इति भावनयेति व्रत[१]सापेक्षत्वाददतिचार इति २।

तथा धनं गणिम-धरिम-मेय-परिच्छेद्यभेदाच्चतुर्विधम्, तत्र गणिमं पूगफलादि, धरिमं गुडादि, मेयं घृतादि, परिच्छेद्यं माणिक्यादि, धान्यं व्रीह्यादि, एतत्प्रमाणस्य बन्धनतोऽतिक्रमोऽतिचारो भवति, यथा हि किल कृतधनादिपरिमाणस्य कोऽपि लभ्यमन्यद्वा धनादि ददाति, तच्च व्रतभङ्गभयाच्चतुर्मास्यादिपरतो गृहगतधनादिविक्रये वा कृते ग्रहीष्यामीति भावनया बन्धनेन नियन्त्रणेन रज्ज्वादिसंयमनेन सत्यङ्कारदानादिरूपेण वा स्वीकृत्य तद्गेह एव स्थापयतीत्यतोऽतिचारः ३। तथा दासीदासप्रमाणातिक्रम इति, सर्वद्विपदचतुष्पदोपलक्षणमेतत्, तत्र द्विपदं पुत्र-कलत्र-दासी-दास-कर्मकर-शुक-सारिकादि, चतुष्पदं गवोष्ट्रादि, तेषां यत् परिमाणं तस्य गर्भाधानविधापनेनातिक्रमोऽतिचारो

१. व्रतसापेक्षत्वात् कथंचिद् विरतिबाधनाच्चातिचारः L. ॥

भवति, यथा किल केनापि संवत्सराद्यवधिना द्विपद-चतुष्पदानां परिमाणं कृतम्, तेषां च संवत्सरमध्य एव प्रसवे अधिकद्विपदादिभावाद् व्रतभङ्गः स्यादिति तद्भयात् कियत्यपि काले गते गर्भग्रहणं कारयतो गर्भस्थद्विपदादिभावेन बहिर्गततदभावेन च कथञ्चिद् व्रतभङ्गादतिचारः ४। तथा कुप्यम् आसन-शयनादिगृहोपस्करः, तस्य यन्मानं तस्य पर्यायान्तरारोपणेनातिक्रमोऽतिचारो भवति, यथा किल केनापि 'दश करोटकानि' इति कुप्यस्य परिमाणं कृतम्, ततस्तेषां कथञ्चिद् द्विगुणत्वे भूते सति व्रतभङ्गभयात् तेषां द्वयेन द्वयेन एकैकं महत्तरं कारयतः पर्यायान्तरकरणेन सङ्ख्यापूरणात् स्वाभाविकसङ्ख्याबाधनाच्चातिचारः। अन्ये त्वाहुः- तदर्थित्वेन 'विवक्षितकालावधेः परतोऽहमेतत् करोटकादि कुप्यं ग्रहीष्याम्यतो नान्यस्मै देयम् इति पराप्रदेयतया व्यवस्थापयत इति ५। यथाश्रुतत्वेन चैषामभ्युपगमे भङ्गातिचारयोर्न विशेषः स्यादिति तद्विशेषोपदर्शनार्थं मीलनवितरणादिना भावना दर्शितेति। यच्च क्षेत्रादिपरिग्रहस्य नवविधत्वेन नवसङ्ख्या-तिचारप्राप्तौ पञ्चसङ्ख्यात्वमुक्तं तत् सजातीयत्वेन शेषभेदानामत्रैवान्तर्भावात्, शिष्यहितत्वेन च प्रायः सर्वत्र

मध्य[1]मगतेर्विवक्षितत्वात् पञ्चकसङ्ख्ययैवातिचारपरिगणनम्, अतः क्षेत्रवास्त्वादिसङ्ख्ययाऽतिचाराणामगणनमुपपन्नमिति ॥२७॥ अथ प्रथमगुणव्रतस्य-

**ऊर्ध्वाधस्तिर्यग्व्यतिक्रम-क्षेत्रवृद्धि-स्मृत्यन्तर्धानानि ॥२८॥१६१॥ इति ।**

ऊर्ध्वाधस्तिर्यग्व्यतिक्रमाश्च क्षेत्रवृद्धिश्च स्मृत्यन्तर्धानं चेति समासः, तत्र ऊर्ध्वाधस्तिर्यक्क्षेत्रव्यतिक्रमलक्षणास्त्रयोऽतीचाराः, एते च आनयने विवक्षितक्षेत्रात् परतः स्थितस्य वस्तुनः परहस्तेन स्वक्षेत्रप्रापणे, प्रेषणे वा ततः परेण, उभये वा आनयनप्रेषणलक्षणे सति सम्पद्यन्ते, अयं चानयनादावतिक्रमो 'न कारयामि' इत्येवंविहितदिग्व्रतस्यैव सम्भवति, तदन्यस्य तु आनयनादावनतिक्रम एव, तथाविधप्रत्याख्यानाभावादिति १-२-३। तथा क्षेत्रस्य पूर्वादिदेशस्य दिग्व्रतविषयस्य ह्रस्वस्य सतो वृद्धिर्वर्द्धनम्, पश्चिमादिक्षेत्रान्तरपरिमाणप्रक्षेपेण दीर्घीकरणं क्षेत्रवृद्धिः, किल केनापि पूर्वापरदिशोः प्रत्येकं योजनशतं गमनपरिमाणं कृतम्, स चोत्पन्नप्रयोजन एकस्यां

१. मध्यगते J. ॥

दिशि नवतिं व्यवस्थाप्यान्यस्यां तु दशोत्तरं योजनशतं करोति, उभाभ्यामपि प्रकाराभ्यां योजनशतद्वयरूपस्य परिमाणस्याव्याहतत्वादित्येवमेकत्र क्षेत्रं वर्द्धयतो व्रतसापेक्षत्वादतिचारः ४। तथा कथञ्चिदतिव्याकुलत्व-प्रमादित्व-मत्यपाटवादिना स्मृतेः स्मरणस्य योजनशतादिरूपदिक्परिमाणविषयस्यान्तर्धानं भ्रंशः स्मृत्यन्तर्धानमिति ५। इह वृद्धसम्प्रदायः- ऊर्ध्वं यत् प्रमाणं गृहीतं तस्योपरि पर्वतशिखरे वृक्षे वा मर्कटः पक्षी वा वस्त्रमाभरणं वा गृहीत्वा व्रजेत्, तत्र तस्य न कल्पते गन्तुम्, यदा तु तत् पतितमन्येन वाऽऽनीतं तदा कल्पते ग्रहीतुम्, एतत् पुनरष्टापदोज्जयन्तादिषु भवेत्, एवमधः कूपादिषु विभाषा, तथा यत् तिर्यक्प्रमाणं गृहीतं तत् त्रिविधेन करणेन नातिक्रमितव्यम्, क्षेत्रवृद्धिश्च न कर्त्तव्या, कथम्?, असौ पूर्वेण भाण्डं गृहीत्वा गतो यावत् तत् परिमाणम्, ततः परतो भाण्डमर्घं लभते इतिकृत्वा अपरेण यानि योजनानि तानि पूर्वदिक्परिमाणे क्षिपति, यदि च स्मृत्यन्तर्धानात् परिमाणमतिक्रान्तो भवेत् तदा ज्ञाते निवर्तितव्यं परतश्च न गन्तव्यम्, अन्योऽपि न विसर्जनीयः, अथानाज्ञया कोऽपि गतो भवेत् तदा यत् तेन लब्धं स्वयं विस्मृत्य गतेन वा तन्न गृह्यते इति ॥२८॥ अथ द्वितीयस्य-

**स[1]चित्त-सम्बद्ध-सम्मिश्रा-ऽभिषव-दुष्पक्काहाराः ॥२९॥१६२॥ इति ।**

सचित्तं च सम्बद्धं च सम्मिश्रं च अभिषवश्च दुष्पक्काहारश्चेति समासः। इह च सचित्तादौ निवृत्तिविषयीकृतेऽपि प्रवृत्तावतिचाराभिधानं व्रतसापेक्षस्यानाभोगाऽतिक्रमादिनिबन्धनप्रवृत्त्या द्रष्टव्यम्, अन्यथा भङ्ग एव स्यात् । तत्र सचित्तं कन्द-मूल-फलादि, तथा सम्बद्धं प्रतिबद्धं सचित्तवृक्षेषु गुन्दादि पक्कफलादि वा, तद्भक्षणं हि सावद्याहारवर्जकस्य सावद्याहारप्रवृत्तिरूपत्वादनाभोगादिनाऽतिचारः, अथवाऽस्थिकं त्यक्ष्यामि तस्यैव सचेतनत्वात् कटाहं तु भक्षयिष्यामि तस्याचेतनत्वादिति, तथा सम्मिश्रमर्द्धपरिणतजलादि सद्यः पिष्टकणिक्कादि वा, अभिषवः सुरासन्धानादि, दुष्पक्काहारश्च अर्द्धस्विन्नपृथुकादि, एतेऽपि अतीचारा अनाभोगादतिक्रमादिना वा सम्मिश्राद्युपजीवनप्रवृत्तस्य भवन्ति, अन्यथा पुनर्भङ्ग एवेति ।

इह भोगोपभोगमानलक्षणं गुणव्रतमन्यत्र भोजनतो गुणव्रतं यदुच्यते तदपेक्षयैवातिचारा उपन्यस्ताः,

१. सच्चित K १. J. १. ॥

शेषव्रतपञ्चपञ्चातिचारसाधर्म्याद्, अन्यथाऽन्यत्रावश्यकनिर्युक्त्यादौ कर्मतोऽपीदमभिधीयते, तत्र कर्म जीविकार्थमारम्भस्तदाश्रित्य खरकर्मादीनां निस्त्रिंशजनोचितकठोरारम्भाणां कोट्टपालगुप्तिपालत्वादीनां वर्जनं परिमाणं वा कार्यमिति । अत्र चाङ्गारकर्मादयः पञ्चदशातिचारा भवन्ति, तदुक्तम्-

*इंगाले वण-साडी-भाडी-फोडीसु वज्जए कम्मं। वाणिज्जं चेव य दंत-लक्ख-रस-केस-विसविसयं ॥११३॥*

*एवं खु जंतपीलणकम्मं नेलंछणं च दवदाणं। सर-दह-तलायसोसं असईपोसं च वज्जेज्जा ॥११४॥* [श्रावकप्रज्ञप्तौ २८७-२८८]

भावार्थस्तु वृद्धसम्प्रदायादवसेयः, स चायम्- अङ्गारकर्मेति अङ्गारान् कृत्वा विक्रीणीते, तत्र षण्णां जीवनिकायानां वधः स्यात् ततस्तन्न कल्पते १। वनकर्म यद्वनं क्रीणाति ततस्तच्छित्त्वा विक्रीय मूल्येन जीवति, एवं पत्रादीन्यपि प्रतिषिद्धानि भवन्ति २। शकटीकर्म यच्छाकटिकत्वेन जीवति, तत्र गवादीनां वध-बन्धादयो दोषाः स्युः

३। भाटीकर्म यद् भाटकमादाय स्वकीयेन शकटादिना परभाण्डं वहत्यन्येषां वा शकट-बलीवर्दादीनर्पयतीति ४। स्फोटीकर्म ओड्डत्वम्, यद्वा हलेन भूमेः स्फोटनम् ५। दन्तवाणिज्यं यत् पूर्वमेव पुलिन्द्राणां मूल्यं ददाति 'दन्तान्मे यूयं दद्यात' इति, ततस्ते हस्तिनो घ्नन्ति 'अचिरादसौ वाणिजक एष्यति' इति कृत्वा, एवं कर्मकराणां शङ्ख्यमूल्यं ददाति, पूर्वानीतांस्तु क्रीणाति ६। लाक्षावाणिज्यमप्येवमेव, दोषस्तु तत्र कृमयो भवन्ति ७। रसवाणिज्यं कल्पपालत्वम्, तत्र सुरादावनेके दोषा मारणाऽऽक्रोशव[१]धादयः ८। केशवाणिज्यं यद् दास्यादीन् गृहीत्वाऽन्यत्र विक्रीणीते, अत्राप्यनेके दोषाः परवशि[२]त्वादयः ९। विषवाणिज्यं विषविक्रयः, स च न कल्पते, यतस्तेन बहूनां जीवानां विराधना स्यात् १०। यन्त्रपीडनकर्म तिलेक्षुयन्त्रादिना तिलादिपीडनम् ११। निर्लाञ्छनकर्म गवादीनां वर्द्धितककरणम् १२। दवदानकर्म यद्वनदवं ददाति क्षेत्ररक्षणनिमित्तं यथोत्तरापथे, दग्धे हि तत्र तरुणं तृणमुत्तिष्ठति, तत्र च सत्त्वशतसहस्राणां वधः स्यात् १३। सरो-ह्रद-तडागपरिशोषणं यत् सरःप्रभृतीनि शोषयति १४। असतीपोषणं यद् योनिपोषका दासीः पोषयन्ति तसम्बन्धिनीं च

१. बंधादयः L. मू.लीं. ॥ २. वशत्वा L. सं. ॥

भार्टी गृह्णन्ति यथा गोल्लविषय इति १५। दिङ्मात्रदर्शनं चैतत् बहुसावद्यानां कर्मणामेवंजातीयानाम्, न पुनः परिगणनमिति। इह चैवं विंशतिसङ्ख्यातिचाराभिधानमन्यत्रापि पञ्चातिचारसङ्ख्यया तज्जातीयानां व्रतपरिणामकालुष्यनिबन्धनविधीनामपरेषां संग्रहो दृष्टव्य इति ज्ञापनार्थम्, तेन स्मृत्यन्तर्धानादयो यथासम्भवं सर्वव्रतेष्वतिचारा दृश्या इति। नन्वङ्गारकर्मादयः कस्मिन् व्रतेऽतिचाराः ? खरकर्मव्रत इति चेत्तर्हि व्रतविषयस्यातिचाराणां च कः परस्परं विशेषः ? खरकर्मरूपत्वादङ्गारकर्मादीनाम्, अत्रोच्यते, खरकर्मादय एवैतेऽतः खरकर्मादिव्रतिना परिहार्याः, यदा पुनरेतेष्वेवानाभोगादिना प्रवर्त्तते तदा खरकर्मव्रतातिचारा भवन्ति, यदा त्वाकुट्ट्या तदा भङ्गा एवेति ॥२९॥ अथ तृतीयस्य-

**कन्दर्प-कौत्कुच्य-मौखर्या-ऽसमीक्ष्याधिकरणोपभोगाधिकत्वानि ॥३०॥१६३॥ इति ।**

कन्दर्पश्च कौत्कुच्यं च मौखर्यं चासमीक्ष्याधिकरणं चोपभोगाधिकत्वं चेति समासः, तत्र कन्दर्पः कामः,

तद्धेतुर्विशिष्टो वाक्प्रयोगोऽपि कन्दर्प एव, मोहोद्दीपकं वा[१]क्कर्मेति भावः, इह च सामाचारी-श्रावकस्याट्टहासो न कल्पते कर्त्तुम्, यदि नाम हसितव्यं तदेषदेवेति १। तथा कुत्कुचः कुत्सितसङ्कोचनादिक्रियायुक्तः, तद्भावः कौत्कुच्यम् अनेक-प्रकारमुख-नयनादिविकारपूर्विका परिहासादिजनिता भाण्डानामिव विडम्बनक्रियेत्यर्थः, अत्र सामाचारी-तादृशानि भणितुं न कल्पन्ते यादृशैर्लोकस्य हास उत्पद्यते, एवं गत्या गन्तुं स्थानेन वा स्थातुमिति । एतौ च कन्दर्पकौत्कुच्याख्यावतिचारौ प्रमादाचरितव्रतस्यावसेयौ, प्रमादरूपत्वात् तयोः २। तथा मुखमस्यास्तीति मुखरस्तद्भावः कर्म वेति मौखर्यं धार्ष्ट्यप्रायमसभ्यासत्यासम्बद्धप्रलापित्वम्, अयं च पापोपदेशव्रतस्यातिचारो, मौखर्ये सति पापोपदेशसम्भवात् ३। तथा असमीक्ष्यैव तथाविधकार्यमपर्यालोच्यैव प्रवणतया यद् व्यवस्थापितमधिकरणं वास्युदूखल-शिलापुत्रकगोधूमयन्त्रकादि तदसमीक्ष्याधिकरणम्। अत्र सामाचारी-श्रावकेण न संयुक्तानि शकटादीनि धारयितव्यानीति, अयं च हिंस्रप्रदान-व्रतस्यातीचारः ४।

१. वा कर्मेति J. मू. L. ॥

तथा उपभोगस्य उपलक्षणत्वाद् भोगस्य च उक्तनिर्वचनस्याधिकत्वम् अतिरिक्तता उपभोगाधिकत्वम्, इहापि सामाचारी-उपभोगातिरिक्तानि यदि बहूनि तैलामलकानि गृह्णान्ति तदा तल्लौल्येन बहवः स्नातुं तडागादौ व्रजन्ति, ततश्च पूतरकादिवधोऽधिकः स्या[१]द्, एवं ताम्बूलादिष्वपि विभाषा, न चैवं कल्पते, ततः को विधिरुपभोगे? तत्र स्नाने तावद् गृहे एव स्नातव्यम्, नास्ति चेत्तत्र सामग्री तदा तैलामलकैः शिरो घर्षयित्वा तानि च सर्वाणि झाटयित्वा तडागादीनां तटे निविष्टोऽञ्जलिभिः स्नाति, तथा येषु पुष्पादिषु कुन्थ्वादयः सन्ति तानि परिहरतीति, अयं च प्रमादाचरितव्रत एव, विषयात्मकत्वादस्य ५। अपध्यानाचरितव्रते त्वानाभोगादिना अपध्याने प्रवृत्तिरतिचार इति स्वयमभ्यूह्यम्, कन्दर्पादय आकुट्ट्या क्रियमाणा भङ्गा एवावसेया इति ॥३०॥ अथ प्रथमशिक्षापदस्य-

**योगदुष्प्रणिधाना-ऽनादर-स्मृत्यनुपस्थापनानि॥३१॥१६४॥ इति ।**

योगदुष्प्रणिधानानि च अनादरश्च स्मृत्यनुपस्थानं चेति समासः । तत्र योगाः मनो-वचन-कायाः, तेषां

१. स्यादित्येवं J. ॥

दुष्प्रणिधानानि सावद्ये प्रवर्त्तनलक्षणानि योगदुष्प्रणिधानानि, एते त्रयोऽ-तिचाराः, अनादरः पुनः प्रबलप्रमादादिदोषाद् यथाकथञ्चित् करणं कृत्वा वाऽकृतसामायिककार्यस्यैव तत्क्षणमेव पारणमिति, स्मृत्यनुपस्थापनं पुनः स्मृतेः सामायिककरणावसरविषयायाः कृतस्य वा सामायिकस्य प्रबलप्रमाददोषादनुपस्थापनम् अनवतारणम्, एतदुक्तं भवति- 'कदा मया सामायिकं कर्त्तव्यम्, कृतं मया सामायिकं न वा' इत्येवंरूपस्य स्मरणस्य भ्रंश इति। ननु मनोदुष्प्रणिधानादिषु सामायिकस्य निरर्थकत्वादभाव एव प्रतिपादितो भवति, अतिचारश्च मालिन्यरूपो भवतीति कथं सामायिकाभावे ? अतो भङ्गा एवैते नातिचाराः, सत्यम्, किन्त्वनाभोगतोऽतिचारत्वमिति। ननु द्विविधं त्रिविधेन सावद्यप्रत्याख्यानं सामायिकम्, तत्र च मनोदुष्प्रणिधानादौ प्रत्याख्यानभङ्गात् सामायिकाभाव एव, तद्भङ्गजनितं प्रायश्चित्तं च स्यात्, मनोदुष्प्रणिधानं च दुष्परिहार्यम्, मनसोऽनवस्थिततत्वाद्, अतः सामायिकप्रतिपत्तेः सकाशात् तदप्रतिपत्तिरेव श्रेयसीति, नैवम्, यतः सामायिकं द्विविधं त्रिविधेन प्रतिपन्नम्, तत्र मनसा सावद्यं न करोमीत्यादीनि षट् प्रत्याख्यानानि

इत्यन्यतरभङ्गेऽपि शेषसद्भावान्न सामायिकस्यात्यन्ताभावः, मिथ्यादुष्कृतेन मनोदुष्प्रणि[1]धानमात्रशुद्धेश्च, सर्वविरतिसामायिकेऽपि तथाऽभ्युपगतत्वात्, यतो गुप्तिभङ्गे मिथ्यादुष्कृतं प्रायश्चित्तमुक्तम्, यदाह- *बीओ उ असमिओ मि त्ति कीस सहसा अगुत्तो वा* [आव०नि० १४३९] द्वितीयोऽ-तिचारः समित्यादिभङ्गरूपोऽनुतापेन शुद्ध्यतीत्यर्थः, इति न प्रतिपत्तेरप्रतिपत्तिर्गरीयसीति । किञ्च, सातिचारानुष्ठानादप्यभ्यासतः कालेन निरतिचारमनुष्ठानं भवतीति सूरयः। यदा[2]ह- *अभ्यासोऽपि प्रायः प्रभूतजन्मानुगो भवति शुद्धः* [षोडशक० १३/१३ ]॥३१॥ अथ द्वितीयस्य-

**आनयन-प्रेष्यप्रयोग-शब्द-रूपानुपात-पुद्गलक्षेपाः ॥३२॥१६५॥** इति ।

आनयनं च प्रेष्यश्च आनयनप्रेष्यौ, तयोः प्रयोगावानयन-प्रेष्यप्रयोगौ, तथा शब्दरूपयोरनुपातौ शब्द-रूपानुपातौ, आनयन-प्रेष्यप्रयोगौ च शब्द-रूपानुपातौ च पुद्गलक्षेपश्चेति समासः, तत्रानयने विवक्षितक्षेत्राद् बहिर्वर्त्तमानस्य सचेतनादिद्रव्यस्य विवक्षितक्षेत्रप्रापणे प्रयोगः स्वयं गमने व्रतभङ्गभयादन्यस्य स्वयमेवाऽगच्छतः

१. धानशुद्धेश्च J. विना । दृश्यतां पञ्चाशकवृत्तौ १/२६॥ २. यदाह नास्ति J. ॥

सन्देशादिना व्यापारणमानयनप्रयोगः, तथा प्रेष्यस्य आदेश्यस्य प्रयोगो विवक्षितक्षेत्राद् बहिः प्रयोजनाय स्वयं गमने व्रतभङ्गभयादन्यस्य व्यापारणं प्रेष्य-प्रयोगः, तथा शब्दस्य कासितादे रूपस्य स्वशरीराकारस्य विवक्षितक्षेत्राद्बहिर्व्यवस्थितस्याह्वानीयस्याह्वानाय श्रोत्रे दृष्टौ चानुपातोऽवतारणमिति योऽर्थः, अयमत्र भावः विवक्षितक्षेत्राद् बहिर्वर्त्तमानं कञ्चन नरं व्रतभङ्गभयादाह्वातुमशक्नुवन् यदा काशितादिशब्दश्रावण-स्वकीयरूपसंदर्शनद्वारेण तमाकारयति तदा व्रतसापेक्षत्वाच्छब्दानुपात-रूपानुपातावतिचाराविति, तथा पुद्गलस्य शर्करादेर्नियमितक्षेत्राद् बहिर्वर्त्तिनो जनस्य बोधनाय तदभिमुखं प्रक्षेपः पुद्गलप्रक्षेपः, देशावकाशिकव्रतं हि गृह्यते मा भूद् गमनागमनादिव्यापारजनितः प्राण्युपमर्द इत्यभिप्रायेण, स च स्वयं कृतोऽन्येन वा कारित इति न कश्चित् फले विशेषः, प्रत्युत गुणः, स्वयं गमने ईर्यापथविशुद्धेः, परस्य पुनरनिपुणत्वात् तदशुद्धिरिति। इह चाद्यद्वयमव्युत्पन्नबुद्धित्वेन सहसाकारादिना वा अन्त्यत्रयं तु व्याजपरस्यातिचारतां यातीति ।

इहाहुर्वृद्धाः- दिग्व्रतसङ्क्षेपकरणमणुव्रतादिसङ्क्षेपकरणस्याप्युपलक्षणं द्रष्टव्यम्, तेषामपि सङ्क्षेपस्यावश्यं

कर्त्तव्यत्वात्, प्रतिव्रतं च सङ्क्षेपकरणस्य भिन्नव्रतत्वेन द्वादश व्रतानीति सङ्ख्याविरोधः स्यादिति। अत्र केचिदाहुः- दिग्व्रतसङ्क्षेप एव देशावकाशिकम्, तदतिचाराणां दिग्व्रतानुसारितयैवोपलम्भाद्, अत्रोच्यते, यथोपलक्षणतया शेषव्रतसङ्क्षेपकरणमपि देशावकाशिकमुच्यते तथोपलक्षणतयैव तदतिचारा अपि तदनुसारिणो द्रष्टव्याः, अथवा प्राणातिपातादिसङ्क्षेपकरणेषु बन्धादय एवातिचारा घटन्ते, दिग्व्रतसङ्क्षेपे तु सङ्क्षिप्तत्वात् क्षेत्रस्य शब्दानुपातादयोऽपि स्युरिति भेदेन दर्शिताः, न च सर्वेषु व्रतभेदेषु विशेषतोऽतिचारा दर्शनीयाः, रात्रिभोजनादिव्रतभेदेषु तेषामदर्शितत्वादिति ॥३२॥ अथ तृतीयस्य-

**अप्रत्युपेक्षिताप्रमार्जितोत्सर्गा-ऽऽदाननिक्षेप-संस्तारोप-क्रमणा-ऽनादर-स्मृत्यनुपस्थापनानि ॥३३॥१६६॥ इति।**

इह 'पदेऽपि पदसमुदायोपचाराद्' अप्रत्युपेक्षितपदेनाप्रत्युपेक्षितदुष्प्रत्युपेक्षितः स्थण्डिलादिभूमिदेशः परिगृह्यते, अप्रमार्जितपदेन तु स एवाप्रमार्जितदुष्प्रमार्जित इति, तथा उत्सर्गश्चादाननिक्षेपौ चेति उत्सर्गादाननिक्षेपाः, ततोऽप्रत्यु-

पेक्षिताप्रमार्जिते स्थण्डिलादावुत्सर्गादाननिक्षेपा अप्रत्युपेक्षिताप्रमार्जितोत्सर्गादाननिक्षेपाः, ततस्ते च संस्तारोपक्रमणं चानादरश्च स्मृत्यनुपस्थापनं चेति समासः, तत्राप्रत्युपेक्षिते प्रथमत एव लोचनाभ्यामनिरीक्षिते दुःप्रत्युपेक्षिते तु प्रमादाद् भ्रान्तलोचनव्यापारेण न सम्यग् निरीक्षिते तथा अप्रमार्जिते मूलत एव वस्त्राञ्चलादिना अपरामृष्टे दुष्प्रमार्जिते त्वर्द्धप्रमार्जिते स्थण्डिलादौ यथार्हमुत्सर्गो मूत्र-पुरीषादीनामुज्झनीयानाम्, आदान-निक्षेपौ च पौषधोपवासोपयोगिनो धर्मोपकरणस्य पीठ-फलकादेर्द्वावतीचारौ स्यातामेताविति १-२। इह संस्तारोपक्रमणम् इति संस्तारकशब्दः शय्योपलक्षणम्, तत्र शय्या शयनं सर्वाङ्गीणं वसतिर्वा संस्तारकः अर्द्धतृतीयहस्तपरिमाणः, ततः संस्तारकस्य प्रस्तावादप्रत्युपेक्षितस्याप्रमार्जितस्य चोपक्रम उपभोगोऽतीचारोऽयं तृतीयः ३। अनादरस्मृत्यनुपस्थापने पुनर्द्वौ चतुर्थ-पञ्चमावतीचारौ ४-५ सामायिकातिचाराविव भावनीयाविति। इह संस्तारोपक्रमे इयं वृद्धसामाचारी - कृतपौषधोपवासो नाप्रत्युपेक्षितां शय्यामारोहति, संस्तारकं वा पोषधशालां वा सेवते, दर्भवस्त्रं वा शुद्धवस्त्रं वा भूम्यां संस्तृणाति, कायिकाभूमेश्चागतः पुनरपि संस्तारकं प्रत्युपेक्षतेऽन्यथाऽतिचारः स्यात्, एवं पीठादिष्वपि विभाषेति ॥३३॥

अथ चतुर्थस्य-

**सचित्तनिक्षेप-पिधान-परव्यपदेश-मात्सर्य-कालातिक्रमाः॥३४॥१६७॥ इति ।**

सचित्तनिक्षेपपिधाने च परव्यपदेशश्च मात्सर्यं च कालातिक्रमश्चेति समासः, तत्र सचित्ते सचेतने पृथिव्यादौ निक्षेपः साधुदेयभक्तादेः स्थापनं सचित्तनिक्षेपः, तथा सचित्तेनैव बीजपूरादिना पिधानं साधुदेयभक्तादेरेव स्थगनं सचित्तपिधानम् । तथा परस्य आत्मव्यतिरिक्तस्य व्य[१]पदेशः परकीयमिदमन्नादिकमित्येवमदित्सावतः साधुसमक्षं भणनं परव्यपदेशः, तथा मत्सरोऽसहनं साधुभिर्याचितस्य कोपकरणम्, तेन रङ्केण याचितेन दत्तमहं तु किं ततोऽपि हीन इत्यादिविकल्पो वा, सोऽस्यास्तीति मत्सरी, तद्भावो मात्सर्यम्, तथा कालस्य साधूचितभिक्षासमयस्यातिक्रमो ऽदित्सयाऽनागतभोजन-पश्चाद्भोजनद्वारेणोल्लङ्घनं कालातिक्रमोऽतिचार इति। भावना पुनरेवम्- यदाऽना-भोगादिनाऽतिक्रमादिना वा एतानाचरति तदाऽतिचारोऽन्यदा तु भङ्ग इति ॥३४॥[२] एवमणुव्रत-गुणव्रत-शिक्षापदानि

१. व्यपदेशः परव्यपदेशः परकीय K. ॥ २. इतः परं त्रयोदश पत्राणि K मध्ये न सन्ति॥

तदतिचारांश्चाभिधाय प्रस्तुते योजयन्नाह-

**एतद्रहिताणुव्रतादिपालनं विशेषतो गृहस्थधर्मः ॥३५॥१६८॥ इति ।**

एतैरतिचारै रहितानामणुव्रतादीनामुपलक्षणत्वात् सम्यक्त्वस्य च पालनम्, किमित्याह-विशेषतो गृहस्थधर्मो भवति यः शास्त्रादौ प्राक् सूचित आसीदिति ॥३५॥ आह-उक्तविधिना प्रतिपन्नेषु सम्यक्त्वाऽणुव्रतादिष्वतिचाराणामसम्भव एव, तत्कथमुक्तमेतद्रहिताणुव्रतादिपालनमित्याशङ्क्याह-

**क्लिष्टकर्मोदयादतीचाराः ॥३६॥१६९॥ इति ।**

**क्लिष्टस्य** सम्यक्त्वादिप्रतिपत्तिकालोत्पन्नशुद्धिगुणादपि सर्वथाऽव्यवच्छिन्नानुबन्धस्य कर्मणो मिथ्यात्वादेरुदयाद् विपाकात् सकाशादती[१]चाराः शङ्कादयो वध-बन्धादयश्च सम्पद्यन्ते, इदमुक्तं भवति-यदा तथाभव्यत्वपरिशुद्धिवशादत्यन्तमननुबन्धीभूतेषु मिथ्यात्वादिषु सम्यक्त्वादि प्रतिपद्यते तदाऽतिचाराणामसम्भव एव,

१. दतिचाराः J. ॥

अन्यथा प्रतिपत्तौ तु स्युरप्यतिचारा इति ॥३६॥ तर्हि कथमेषां निवारणमित्याशङ्क्याह-

**विहितानुष्ठानवीर्यतस्तज्जयः ॥३७॥१७०॥ इति ।**

विहितानुष्ठानं प्रतिपन्नसम्यक्त्वादेर्नित्यानुस्मरणादिलक्षणं तदेव वीर्यं जीवसामर्थ्यं तस्मात्, किमित्याह-तज्जयः, तेषाम् अतिचाराणां जयोऽभिभवः सम्पद्यते, यतो विहितानुष्ठानं सर्वापराधव्याधिविरेचनौषधं महदिति ॥३७॥ एतद्विषयमेवोपदेशमाह-

**अत एव तस्मिन् यत्नः ॥३८॥१७१॥ इति ।**

अत एव विहितानुष्ठानवीर्यस्यातिचारजयहेतुत्वादेव तस्मिन् विहितानुष्ठाने यत्नः सर्वोपाधिशुद्ध उद्यमः कार्य इति ॥ अन्यत्राप्युक्तम्-

*तम्हा निच्चसईए बहुमाणेणं च अहिगयगुणंमि। पडिवक्खदुगुंछाए परिणइआलोयणेणं च ॥११५॥*
*तित्थंकरभत्तीए सुसाहुजणपज्जुवासणाए य। उत्तरगुणसद्धाए य एत्थ सया होइ जइयव्वं ॥११६॥*

*एवमसंतो वि इमो जायइ जाओ य ण पडइ क[१]या वि । ता एत्थं बुद्धिमया अपमाओ होइ कायव्वो ॥११७॥* [पञ्चा. १। ३६-३७-३८] त्ति ॥

साम्प्रतं सम्यक्त्वादिगुणेष्वलब्धलाभाय लब्धपरिपालनाय च विशेषतः शिक्षामाह -

**सामान्यचर्याऽस्य ॥३९॥१७२॥ इति ।**

सामान्या प्रतिपन्नसम्यक्त्वादिगुणानां सर्वेषां प्राणिनां साधारणा सा चासौ चर्या चेष्टा च सामान्यचर्या, अस्य प्रतिपन्नविशेषगृहस्थधर्मस्य जन्तोरिति ॥३९॥ कीदृशीत्याह-

**समानधार्मिकमध्ये वासः ॥४०॥१७३॥ इति ।**

समानास्तुल्यसमाचारतया सदृशा उपलक्षणत्वादधिकाश्च ते धार्मिकाश्चेति समासः, तेषां मध्ये वासोऽवस्थानम्, तत्र चायं गुणः-यदि कश्चित् तथाविधदर्शनमोहोदयाद्धर्माच्च्यवते ततस्तं स्थिरीकरोति, स्वयं वा प्रच्यवमानः

---

१. कइयावि L. ॥

तैः स्थिरीक्रियते, पठ्यते च -

*यद्यपि निर्गतभावस्तथाप्यसौ रक्ष्यते सद्भिरन्यैः । वेणुर्विलूनमूलोऽपि वंशगहने महीं नैति ॥११८॥* [ ] ॥४०॥ तथा-

**वात्सल्यमेतेषु ॥४१॥१७४॥ इति ।**

वात्सल्यम् अन्न-पान-ताम्बूलादिप्रदान-ग्लानावस्थाप्रतिजागरणादिना सत्करणं एतेषु साधर्मिकेषु कार्यम्, तस्य प्रवचनसारत्वात्, उच्यते च-

*जिनशासनस्य सारो जीवदया निग्रहः कषायाणाम् । साधर्मिकवात्सल्यं भक्तिश्च तथा जिनेन्द्राणाम् ॥११९॥* [ ] तथा-

**धर्मचिन्तया स्वपनम् ॥४२॥१७५॥ इति ।**

धर्मचिन्तया- *धन्यास्ते वन्दनीयास्ते तैस्त्रैलोक्यं पवित्रितम् ।*

*यैरेष भुवनक्लेशी काममल्लो विनिर्जितः ॥१२०॥* [ ] इत्यादि शुभभावनारूपया स्वपनं निद्राङ्गीकारः, शुभभावनासुप्तो हि तावन्तं कालमवस्थितशुभपरिणाम एव लभ्यत इति ॥४२॥ तथा-

**नमस्कारेणावबोधः ॥४३॥१७६॥ इति ।**

नमस्कारेण सकलकल्याणपुरपरमश्रेष्ठिभिः परमेष्ठिभिरधिष्ठितेन *नमो अरहंताणमि*त्यादिप्रतीतरूपेण अवबोधो निद्रापरिहारः, परमेष्ठिनमस्कारस्य महागुणत्वात्, पठ्यते च-

*एष पञ्चनमस्कारः सर्वपापप्रणाशनः। मङ्गलानां च सर्वेषां प्रथमं भवति मङ्गलम् ॥१२१॥* इति । तथा-

**प्रयत्नकृतावश्यकस्य विधिना चैत्यादिवन्दनम् ॥४४॥१७७॥ इति ।**

प्रयत्नेन प्रयत्नवता कृतान्यावश्यकानि मूत्रपुरीषोत्सर्गा-ऽङ्गप्रक्षालन-शुद्धवस्त्रग्रहणादीनि येन स तथा तस्य विधिना पुष्पादिपूजासम्पादनमुद्रान्यसनादिना प्रसिद्धेन चैत्यवन्दनं प्रसिद्धरूपमेव, आदिशब्दान्मातापित्रादिगुरुवन्दनं च,

य[1]थोक्तम्-

*चैत्यवन्दनतः सम्यक् शुभो भावः प्रजायते । तस्मात् कर्मक्षयः सर्वं ततः कल्याणमश्नुते* [ललित.]॥१२२॥

इत्यादीति ॥४४॥ तथा-

**सम्यक् प्रत्याख्यानक्रिया ॥४५॥१७८॥ इति ।**

सम्यगिति क्रियाविशेषणम्, ततः सम्यग् यथा भवति तथा मान-क्रोधा-ऽनाभोगादिदोषपरिहारवशात् प्रत्याख्यानस्य मूलगुणगोचरस्योत्तरगुणगोचरस्य च क्रिया ग्रहणरूपा, परिमितसावद्यासेवनेऽपि अपरिमितपरिहारेण प्रत्याख्यानस्य महागुणत्वात्, यथोक्तम्-

*परिमितमुपभुञ्जानो ह्यपरिमितमनन्तकं परिहरंश्च । प्रा[2]प्नोन्ति परलोके ह्यपरिमितमनन्तकं सौख्यम् ॥१२३॥*

[ ] इति ॥४५॥ तथा

१. "उक्तं च- चैत्यवन्दनतः......मश्नुते॥ इत्यादि" इति ललितविस्तारायाम् ॥ २. प्राप्नोति च. मु. ॥

**यथोचितं चैत्यगृहगमनम् ॥४६॥१७९॥ इति ।**

यथोचितं यथायोग्यं चैत्यगृहगमनं चैत्यगृहे जिनभवनलक्षणे अर्हद्बिम्बवन्दनाय प्रत्याख्यानक्रियानन्तरमेव गमनमिति, इह द्विविधः श्रावको भवति- ऋद्धिमांस्तदितरश्च, तत्रर्द्धिमान् राजादिरूपः, स सर्वस्वपरिवारसमुदायेन व्रजति, एवं हि तेन प्रवचनप्रभावना कृता भवति, तदितरोऽपि स्वकुटुम्बसंयोगेने[1]ति, समुदायकृतानां कर्मणां भवान्तरे समुदायेनैवोपभोगभावात् ॥४६॥ तथा-

**विधिनाऽनुप्रवेशः ॥४७॥१८०॥ इति ।**

विधिना विधानेन चैत्यगृहे प्रवेशः कार्यः, अनुप्रवेशविधिश्चायम्- *सच्चित्ताणं दव्वाणं विउस्सरणयाए १, अचित्ताणं दव्वाणं अविउस्सरणयाए २, एगसाडिएणं उत्तरासंगेणं ३, चक्खुफासे अंजलिपग्गहेणं ४, मणसो एगत्तीकरणेणं ५ [भगवतीसूत्रे २/५, ज्ञातधर्मकथाङ्गे प्रथमाध्ययने पृ.४२, पं.१७] ति ॥४७॥* तत्र च -

१. नैति मु. ॥

**उचितोपचारकरणम् ॥४८॥१८१॥ इति ।**

उचितस्य अर्हद्बिम्बानां योग्यस्य उपचारस्य पुष्प-धूपाद्यभ्यर्चनलक्षणस्य करणं विधानम् ॥४८॥ ततो

**भावतः स्तवपाठः ॥४९॥१८२॥ इति ।**

दरिद्रनिधिलाभादिसन्तोषोपमानोपमेयाद् भावतो भावात् सन्तोषलक्षणात् स्तवानां गम्भीराभिधेयानां सद्भूतगुणोद्भावना-प्रधानानां नमस्कारस्तोत्रलक्षणानां पाठः समुचितेन ध्वनिना समुच्चारणम् ॥४९॥ ततः-

**चैत्य-साधुवन्दनम् ॥५०॥१८३॥ इति ।**

चैत्यानामर्हद्बिम्बानामन्येषामपि भावार्हत्प्रभृतीनां साधूनां च व्याख्यानाद्यर्थमागतानां वन्दनीयानां वन्दनम् अ[1]भिष्टवनं प्रणिपातदण्डकादिपाठक्रमेण द्वादशावर्त्तवन्दनादिना च प्रसिद्धरूपेणैवेति ॥५०॥ ततः-

**गुरुसमीपे प्रत्याख्यानाभिव्यक्तिः ॥५१॥१८४॥ इति ।**

१. अभिस्तवनं J.। ''उपसर्गात् सुग-सुव-सो-स्तु-स्तुभोऽटयप्यद्वित्वे ॥२।३।३९॥'' इति सिद्धहेमशब्दानुशासने ॥

तथाविधशुद्धसमाचारसाधुसमीपे प्रागेव गृहादौ गृहीतस्य प्रत्याख्यानस्य अभिव्यक्तिः गुरोः साक्षिभावसम्पादनाय प्रत्युच्चारणम् ॥५१॥ ततो-

**जिनवचनश्रवणे नियोगः ॥५२॥१८५॥ इति ।**

'सम्प्राप्तसम्यग्दर्शनादिः प्रतिदिनं साधुजनात् सामाचारीं शृणोति' इति श्रावक इत्यन्वर्थसम्पादनाय जिनवचनश्रवणे नियोगो नियमः कार्य इति ॥५२॥ ततः-

**सम्यक् तदर्थालोचनम् ॥५३॥१८६॥ इति ।**

सम्यक् सन्देह-विपर्यया-ऽनध्यवसायपरिहारेण तदर्थस्य वचनाभिधेयस्य पुनः पुनर्विमर्शनम्, अन्यथा *वृथा श्रुतमचिन्तितम्* [ ] इति वचनात् न कश्चिच्छ्रवणगुणः स्यादिति ॥५३॥ ततः-

**आगमैकपरता ॥५४॥१८७॥ इति ।**

आगमो जिनसिद्धान्तः स एवैको न पुनरन्यः कश्चित् सर्वक्रियासु परः प्रधानो यस्य स तथा, तस्य भावः

आगमैकपरता, सर्वक्रियास्वागममेवैकं पुरस्कृत्य प्रवृत्तिरिति भाव इति ॥५४॥ ततः-

**श्रुतशक्यपालनम् ॥५५॥१८८॥ इति ।**

श्रुतस्य आगमादुपलब्धस्य शक्यस्य अनुष्ठातुं पार्यमाणस्य पालनमनुशीलनं सामायिक-पौषधादेरिति ॥५४॥ तथा

**अशक्ये भावप्रतिबन्धः ॥५६॥१८९॥ इति ।**

अशक्ये पालयितुमपार्यमाणे तथाविधशक्तिसामग्र्यभावात् साधुधर्माभ्यासादौ भावेन अन्तःकरणेन प्रतिबन्ध आत्मनि नियोजनम्, त[1]स्यापि तदनुष्ठानफलत्वात्, यथोक्तम्-

*नार्या यथाऽन्यसक्तायास्तत्र भावे सदा स्थितेः(ते)। तद्योगः पापबन्धाय तथा धर्मेऽपि दृश्यताम् ॥१२४॥* [योगबिन्दौ २०४] तद्योग इति अन्यप्रसक्तनारीव्यापारः स्वकुटुम्बपरिपालनादिरूप इति ॥५६॥ तथा-

१. तस्यापि सदनुष्ठान मु. ॥

**तत्कर्त्तृषु प्रशंसोपचारौ ॥५७॥१९०॥ इति ।**

तत्कर्त्तृषु आत्मानमपेक्ष्याशक्यानुष्ठानविधायिषु पुरुषसिंहेषु प्रशंसोपचारौ, प्रशंसा मुहुर्मुहुर्गुणगणोत्कीर्त्तनरूपा, उपचारश्च तदुचितान्नपानवसनादिना साहाय्यकरणमिति ॥५७॥ तथा-

**निपुणभावचिन्तनम् ॥५८॥१९१॥ इति ।**

निपुणानामतिसूक्ष्मबुद्धिगम्यानां भावानां पदार्थानामुत्पाद-व्यय-ध्रौव्यस्वभावानां बन्ध-मोक्षादीनां वाऽनुप्रेक्षणम्, यथा-

*अनादिनिधने द्रव्ये स्वपर्यायाः प्रतिक्षणम् । उन्मज्जन्ति निमज्जन्ति जलकल्लोलवज्जले ॥१२५॥* [ ]

तथा-

*स्नेहाभ्यक्तशरीरस्य रेणुना श्लिष्यते यथा गात्रम् । राग[1]द्वेषाक्लिन्नस्य कर्मबन्धो भवत्येवम् ॥१२६॥*

---

१. द्वेषात् क्लिन्नस्य J. ॥

[प्रशम.५५] इत्यादीति ॥५८॥ तथा

**गुरुसमीपे प्रश्नः ॥५९॥१९२॥ इति ।**

यदा पुनर्निपुणं चिन्त्यमानोऽपि कश्चिद्भावोऽतिगम्भीरतया स्वयमेव निश्चेतुं न पार्यते तदा गुरोः संविग्नगीतार्थस्य वृत्तस्थस्य च समीपे प्रश्नो विशु[1]द्धविनयविधिपूर्वकं पर्यनुयोगः कार्यः, यथा 'भगवन्! नावबुद्धोऽयमर्थोऽस्माभिः कृतयत्नैरपि, ततोऽस्मान् बोधयितुमर्हन्ति भगवन्तः' इति ॥५९॥ तथा -

**निर्णयावधारणम् ॥६०॥१९३॥ इति ।**

निर्णयस्य निश्चयकारिणो वचनस्य गुरुणा निरूपितस्य अवधारणं दत्तावधानतया ग्रहणम् । भणितं चान्यत्रापि -

*सम्मं वियारियव्वं अट्ठपयं भावणापहाणेणं । विसए य ठावियव्वं ब[2]हुसुयगुरुणो सयासाओ ॥१२७॥* [पञ्चव० ८६५] त्ति । तथा -

१. विशुद्धविशुद्धविनयविधिपूर्वकं L. ॥ २. बहुस्सुयगुरुस्सयासाओ J. ॥

**ग्लानादिकार्याभियोगः ॥६१॥१९४॥ इति ।**

ग्लानादीनां ग्लान-बाल-वृद्धा-ऽऽगमग्रहणोद्यत-प्राघूर्णकादिलक्षणानां साधु-साधर्मिकाणां यानि कर्माणि प्रति-जागरणौषधाऽन्न-पान-वस्त्रप्रदान-पुस्तकादिसमर्पणोपाश्रयनिरूपणादिलक्षणानि, तेष्वभियोगो दत्तावधानता विधेयेति ॥६१॥ तथा-

**कृताकृतप्रत्युपेक्षा॥६२॥१९५॥ इति ।**

कृतानामकृतानां च चैत्यकार्याणां ग्लानादिकार्याणां च प्रत्युपेक्षा निपुणाभोगविलोचनव्यापारेण गवेषणम्, तत्र कृतेषु करणाभावादकृतकरणायोद्यमो विधेयः, अन्यथा निष्फलशक्तिक्षयप्रसङ्गादिति ॥६२॥ ततश्च-

**उचितवेलयाऽऽगमनम् ॥६३॥१९६॥ इति ।**

उचितवेलया हट्टव्यवहारराजसेवादिप्रस्तावलक्षणया आगमनं चैत्यभवनाद् गुरुसमीपाद् वा गृहादाविति ॥६३॥ ततो-

**धर्मप्रधानो व्यवहारः ॥६४॥१९७॥ इति ।**

कुलक्रमागतमित्या[1]दिसूत्रोक्तानुष्ठानरूपो व्यवहारः कार्यः ॥६४॥ तथा-

**द्रव्ये सन्तोषपरता ॥६५॥१९८॥ इति ।**

द्रव्ये धन-धान्यादौ विषये सन्तोषप्रधानता, परिमितेनैव निर्वाहमात्रहेतुना द्रव्येण सन्तोषवता धा[2]र्मिकेण भवितव्यमित्यर्थः, असन्तोषस्यासुखहेतुत्वात् । यदुच्यते -

*अत्युष्णात् सघृतादन्नादच्छिद्रात् सितवाससः। अपरप्रेष्यभावाच्च शेषमिच्छन् पतत्यधः ॥१२८॥* [ ]

इति । तथा-

*सन्तोषामृततृप्तानां यत् सुखं शान्तचेतसाम् । कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम् ? ॥१२९॥* [ ]

इति ॥६५॥ तथा-

१. दृश्यतां १।३। पृ. ९ ॥ २. धार्मिकेणैव भवि L. ॥

**धर्मे धनबुद्धिः ॥६६॥१९९॥ इति ।**

धर्मे श्रुत-चारित्रात्मके सकलाभिलषिताविकलसिद्धिमूले धनबुद्धिः 'मतिमतां धर्म एव धनम्' इति परिणामरूपा निरन्तरं निवेशनीयेति ॥६६॥ तथा-

**शासनोन्नतिकरणम् ॥६७॥२००॥ इति ।**

शासनस्य निखिलहेयोपादेयभावाविर्भावेन भास्करकल्पस्य जिननिरूपितवचनरूपस्य उन्नतिरुच्चैर्भावस्तस्याः करणं सम्यग्न्यायव्यवहरण-यथोचितजनविनयकरण-दीनानाथाभ्युद्धरण-सुविहितयतिपुरस्करण-परिशुद्धशीलपालन-जिनभवनविधापन-यात्रास्नात्रादिनानाविधोत्सवसम्पादनादिभिरुपायैः, तस्यातिमहागुणत्वादिति । पठ्यते च-

*कर्तव्या चोन्नतिः सत्यां शक्ताविह नियोगतः। अ[१]वन्ध्यं कारणं ह्येषा तीर्थकृन्नामकर्मणः ॥१३०॥* [हा०अष्टके २३।८] इति ॥६७॥ तथा-

१. 'प्रधानं कारणम्' इति अष्टके पाठः ॥

**विभवोचितं विधिना क्षेत्रदानम् ॥६८॥२०१॥ इति ।**

विभवोचितं स्वविभवानुसारेण विधिना अनन्तरमेव निर्देक्ष्यमाणेन क्षेत्रेभ्यो निर्देक्ष्यमाणेभ्य एव दानमन्न-पानौषध-वस्त्र-पात्राद्युचितवस्तुवितरणम् ॥६८॥ विधिं क्षेत्रं च स्वयमेव निर्दिशन्नाह-

**सत्कारादिर्विधिर्निःसङ्गता च ॥६९॥२०२॥ इति ।**

सत्करणं सत्कारोऽभ्युत्थाना-ऽऽसनप्रदान-वन्दनरूपो विनयः, स आदिर्यस्य देशकालाराधन-विशुद्धश्रद्धाविष्करण-दानक्रमानुवर्तनादेः कुशलानुष्ठानविशेषस्य स तथा, किमित्याह- विधिर्वर्तते, निःसङ्गता ऐहिक-पारलौकिकफलाभिलाषविकलतया सकलक्लेशलेशाकलङ्कित-मुक्तिमा[१]त्राभिसन्धिता, चकारः समुच्चये ॥६९॥

**वीतरागधर्मसाधवः क्षेत्रम् ॥७०॥२०३॥ इति ।**

वीतरागस्य जिनस्य धर्मः उक्तनिरुक्तः, तत्प्रधानाः साधवो वीतरागधर्मसाधवः क्षेत्रं दानार्हं पात्रमिति, तस्य

१. भिसम्बन्धिता J.Ÿ॥

च विशेषलक्षणमिदम्-

*क्षान्तो दान्तो मुक्तो जितेन्द्रियः सत्यवागभयदाता । प्रोक्त-स्त्रिदण्डविरतो विधिग्रहीता भवति पात्रम् ॥१३१॥* [ ]

॥७०॥ तथा-

**दुःखितेष्वनुकम्पा यथाशक्ति द्रव्यतो भावतश्च ॥७१॥२०४॥** इति ।

दुःखितेषु भवान्तरोपात्तपापपाको[१]पहितातितीव्रक्लेशावेशेषु देहिष्वनुकम्पा कृपा कार्या यथाशक्ति स्वसामर्थ्यानुरूपम्, द्रव्यतस्तथाविधग्रासादेः सकाशात्, भावतो भीषणभवभ्रमणवैराग्यसम्पादनादिरूपात्, चः समुच्चये, दुःखितानुकम्पा हि तदुपकारत्वेन धर्मैकहेतुः। यथोक्तम् -

*अन्योपकारकरणं धर्माय महीयसे च भवतीति । अधिगतपरमार्थानामविवादो वादिनामत्र ॥१३२॥* [ ]

इति ॥७१॥ तथा-

१. पहता J. ॥

**लोकापवादभीरुता ॥७२॥२०५॥ इति।**

लोकापवादात् सर्वजनापरागलक्षणाद् भीरुता अत्यन्तभीतभावः, किमुक्तं भवति? निपुणमत्या विचिन्त्य तथा तथोचितवृत्तिप्रधानतया सततमेव प्रवर्तितव्यं यथा यथा सकलसमीहितसिद्धिविधायि जनप्रियत्वमुज्जृम्भते, न पुनः कथञ्चिदपि जनापवादः, तस्य मरणान्निर्विशिष्यमाणत्वात्, तथा चावाचि-

*वचनीयमेव मरणं भवति कुलीनस्य लोकमध्येऽस्मिन्। मरणं तु कालपरिणतिरियं च जगतोऽपि सामान्या ॥१३३॥* [ ] इति ॥७२॥ तथा -

**गुरुलाघवापेक्षणम् ॥७३॥२०६॥ इति ।**

सर्वप्रयोजनेषु धर्मार्थकामरूपेषु तत्तत्कालादिबलालोचनेन प्रारब्धुमिष्टेषु प्रथमत एव मतिमता गुरोर्भूयसो गुणलाभपक्षस्य दोषलाभपक्षस्य च लघोश्च तदितररूपस्य भावो गुरुलाघवं तस्य निपुणतया अपेक्षणमालोचनं कार्यमिति। ततः किमित्याह-

**बहुगुणे प्रवृत्तिः ॥७४॥२०७॥ इति ।**

प्रायेण हि प्रयोजनानि गुणदोषलाभमिश्राणि, ततो बहुगुणे प्रयोजने प्रवृत्तिर्व्यापारः, तथा चार्षम्-

*अं प्पेण बहुमेसेज्जा, एयं पंडियलक्खणं। सव्वासु पडिसेवासु, एयं अट्ठपयं विऊ ॥१३४॥* [ ] ॥७४॥ तथा-

**चैत्यादिपूजापुरःसरं भोजनम् ॥७५॥२०८॥ इति ।**

प्राप्ते भोजनकाले चैत्यानामर्हद्बिम्बलक्षणानामादिशब्दात् साधु-साधर्मिकाणां च पूजा पुष्प-धूपादिभिरन्न-पानप्रदानादिभिश्चोपचरणं सा पुरःसरा यत्र तच्चैत्यादिपूजापुरःसरं भोजनमन्नोपजीवनम्, यतोऽन्यत्रापि पठ्यते-

*जिं णपूओचियदाणं परियणसंभालणा उचियकिच्चं। ठाणुववेसो य तहा पच्चक्खाणस्स संभरणं ॥१३५॥* [ ] ॥७५॥ तथा -

**तदन्वेव प्रत्याख्यानक्रिया ॥७६॥२०९॥ इति ।**

तदन्वेव भोजनानन्तरमेव प्रत्याख्यानक्रिया द्विविधाद्याहारसंवरणरूपा ॥७६॥ तथा-

**शरीरस्थितौ प्रयत्नः ॥७७॥२१०॥ इति ।**

शरीरस्थितौ उचिताभ्यङ्ग-संवाहन-स्नानादिलक्षणायां यत्न आदरः, तथा च पठ्यते -

*धर्मार्थकाममोक्षाणां शरीरं कारणं यतः। ततो यत्नेन तद्रक्ष्यं यथोक्तैरनुवर्तनैः ॥१३६॥* [ ] इति ॥१६६॥ तथा-

**तदुत्तरकार्यचिन्ता ॥७८॥२११॥ इति ।**

तस्याः शरीरस्थितेरुत्तराणि उत्तरकालभावीनि यानि कार्याणि व्यवहारकरणादीनि तेषां चिन्ता तप्तिरूपा कार्या इति ॥७८॥ तथा-

**कुशलभावनायां प्रबन्धः ॥७९॥२१२॥ इति ।**

कुशलभावनायाम् *सर्वेऽपि सन्तु सुखिनः, सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु, मा कश्चित्*

*पापमाचरेत्* ॥१३७॥ [ ] इत्यादिशुभचिन्तारूपायां प्र[1]बन्धः प्रकर्षवृत्तिः॥७९॥ तथा-

**शिष्टचरितश्रवणम् ॥८०॥२१३॥ इति ।**

शिष्टचरितानां 'शिष्टचरितप्रशंसा[2]' इति प्रथमाध्यायसूत्रोक्तलक्षणानां श्रवणं निरन्तरमाकर्णनम्, तच्छ्रवणे हि तद्गताभिलाषभावान्न कदाचिद् लब्धगुणहानिः सम्पद्यत इति ॥८०॥ तथा-

**सान्ध्यविधिपालना ॥८१॥२१४॥ इति ।**

सान्ध्यस्य सन्ध्याकालभवस्य विधेरनुष्ठानविशेषस्य दिनाष्टमभागभोजनव्यवहारसङ्कोचादिलक्षणस्य पालना अनु-सेवनमिति ॥८१॥ एनामेव विशेषत आह-

**य[3]थोचितं तत्प्रतिपत्तिः ॥८२॥२१५॥ इति ।**

यथोचितं यथासामर्थ्यं तत्प्रतिपत्तिः सान्ध्यविधिप्रतिपत्तिरिति ॥८२॥ कीदृशीत्याह -

१. प्रबन्ध इति प्रकर्षवृत्तिः J. ॥ २. दृश्यतां १।१४॥ ३. यथोचितत्प्र J.L. ॥

**पूजापुरस्सरं चैत्यादिवन्दनम् ॥८३॥२१६॥ इति ।**

तत्कालोचितपूजापूर्वकं चैत्यवन्दनं गृहचैत्य-चैत्यभवनयोः, आदिशब्दाद् यतिवन्दनं माता-पितृवन्दनं च ॥८३॥

तथा-

**साधुविश्रामणक्रिया ॥८४॥२१७॥ इति ।**

साधूनां निर्वाणाराधनयोगसाधन[१]प्रवृत्तानां पुरुषविशेषाणां स्वाध्याय-ध्यानाद्यनुष्ठाननिष्ठोपहितश्रमाणां तथाविधविश्रामकसाध्वभावे विश्रामणक्रिया, विश्राम्यतां विश्रामं लभमानानां करणं विश्रामणा, सा चासौ क्रिया चेति समासः ॥८४॥ तथा-

**योगाभ्यासः ॥८५॥२१८॥ इति ।**

योगस्य सालम्बन-निरालम्बनभेदभिन्नस्याभ्यासः पुनः पुनरनुशीलनम्, उक्तं च-

---

१. धनप्रवृत्तानां पुरुषाणां J. विना ॥

*सालम्बनो निरालम्बनश्च योगः परो द्विधा ज्ञेयः। जिनरूपध्यानं खल्वाद्यस्तत्तत्त्वगस्त्वपरः ॥१३८॥* [षोड० १४।१] त[1] [त्त] त्त्वग इति निर्वृतजिन[2]स्वरूपप्रतिबद्ध इति ॥८५॥ तथा -

**नमस्कारादिचिन्तनम् ॥८६॥२१९॥ इति ।**

नमस्कारस्य, आदिशब्दात्तदन्यस्वाध्यायस्य च चिन्तनं भावनम् ॥८६॥ तथा -

**प्रशस्तभावक्रिया ॥८७॥२२०॥ इति ।**

तथा तथा क्रोधादिदोषविपाकपर्यालोचनेन प्रशस्तस्य प्रशंसनीयस्य भावस्य अन्तःकरणरूपस्य क्रिया करणम्, अन्यथा महादोषभावात्, यदुच्यते-

*चित्तरत्नमसंक्लिष्टमान्तरं धनमुच्यते। यस्य तन्मुषितं दोषैस्तस्य शिष्टा विपत्तयः ॥१३९॥* [हा० अष्टके २४।७] इति ॥८७॥ तथा-

---

१. तत्तत्त्वग मु० ॥ २. जिनरूप J. ॥

**भवस्थितिप्रेक्षणम् ॥८८॥२२१॥ इति ।**

भवस्थितेः संसाररूपस्य प्रेक्षणमवलोकनम्, यथा-

*यौवनं नगनदास्पदोपमं, शारदाम्बुदविलासि जीवितम् । स्वप्न-लब्धधनविभ्रमं धनं, स्थावरं किमपि नास्ति तत्त्वतः ॥१४०॥*

*विग्रहा गदभुजङ्गमालयाः, सङ्गमा विगमदोषदूषिताः। सम्पदोऽपि विपदा कटाक्षिता, नास्ति किञ्चिदनुपद्रवं स्फुटम् ॥१४१॥* [श्रा[१]वका० १४।१-२] इत्यादीति ॥८८॥

**तदनु तन्नैर्गुण्यभावना ॥८९॥२२२॥ इति ।**

तस्या भवस्थितेः नैर्गुण्यभावना निःसारत्वचिन्तनम्, यथा-

*इतः क्रोधो गृध्रः प्रकटयति पक्षं निजमितः शृगाली तृष्णेयं विवृतवदना धावति पुरः ।*

१. दिगम्बराचार्येण अमितगतिना विरचिते श्रावकाचारे॥

*इतः क्रूरः कामो विचरति पिशाचश्चिरमहो श्मशानं संसारः क इह पतितः स्थास्यति सुखम्? ॥१४२॥*
*एतास्तावदसंशयं कुशदलप्रान्तोदबिन्दूपमा, लक्ष्म्यो बन्धुसमागमोऽपि न चिरस्थायी खलप्रीतिवत् ।*
*यच्चान्यत् किल किञ्चिदस्ति निखिलं तच्छारदाम्भोधरच्छायावच्चलतां बिभर्ति यदतः स्वस्मै हितं चिन्त्यताम् ॥१४३॥* [ ] इति ॥८९॥ तथा-

**अपवर्गालोचनम् ॥९०॥२२३॥ इति ।**

अपवर्गस्य मुक्तेरालोचनं सर्वगुणमयत्वेनोपादेयतया परिभावनम्, यथा-
*प्राप्ताः श्रियः सकलकामदुघास्ततः किम् ? दत्तं पदं शिरसि विद्विषतां ततः किम्?।*
*सं[१]म्पूरिताः प्रणयिनो विभवैस्ततः किम् ? कल्पं स्थितं तनुभृतां तनुभिस्ततः किम् ? ॥१४४॥* [वैराग्यश०६७]
*तस्मादनन्तमजरं* प[२]रमं प्रकाशम्, तच्चित्त ! चिन्तय *किमेभिरसद्विकल्पैः?*

१. सम्मानिताः इति मुद्रिते वैराग्यशतके ॥ २. ''परमं विकासि, तद् ब्रह्म चिन्तय....।....कृपणलोकमता भवन्ति'' इति मुद्रिते वैराग्यशतके ॥

*यस्यानुषङ्गिण इमे भुवनाधिपत्य[1]-भोगादयः कृपणजन्तुमतां भवन्ति॥१४५॥* [वैराग्यश०६९]॥९०॥तथा-

**श्रामण्यानुरागः ॥९१॥२२४॥ इति ।**

श्रामण्ये शुद्धसाधुभावे अनुरागो विधेयः, यथा-

*जैनं मुनिव्रतमशेषभवात्तकर्मसन्तानतानवकरं स्वयमभ्युपेतः। कुर्यां तदुत्तरतरं च तपः कदाऽहम्, भोगेषु निःस्पृहतया परिमुक्तसङ्गः? ॥१४६॥* [ ] इति ॥९१॥ तथा-

**यथोचितं गुणवृद्धिः॥९२॥२२५॥ इति ।**

यथोचितं यो यदा वर्द्धयितुमुचितस्तस्य सम्यग्दर्शनादेर्गुणस्य दर्शनप्रतिमाव्रतप्रतिमाभ्यासद्वारेण वृद्धिः पुष्टीकरणं का[2]र्या ॥९२॥ तथा-

**सत्त्वादिषु मैत्र्यादियोग इति ॥९३॥२२६॥ इति ।**

---

१. पत्ययोगादयः.. L.॥ २. कार्यम् L.J.॥

सत्त्वेषु सामान्यतः सर्वजन्तुषु आदिशब्दाद्दुःखित-सुखित-दोषदूषितेषु मैत्र्यादीनामाशयविशेषाणां योगो व्यापारः कार्यः, मैत्र्यादिलक्षणं चेदम्-

*परहितचिन्ता मैत्री परदुःखविनाशिनी तथा करुणा । परसुखतुष्टिर्मुदिता परदोषोपेक्षणमुपेक्षा ॥१४७॥* [षोड० ४।१५] इतिः परिसमाप्तौ ॥९३॥ सम्प्रत्युपसंहरन्नाह-

**विशेषतो गृहस्थस्य, धर्म उक्तो जिनोत्तमैः। एवं सद्भावनासारः, परं चारित्रकारणम् ॥१६॥ इति ।**

विशेषतः सामान्यगृहस्थधर्मवैलक्षण्येन गृहस्थस्य गृहमेधिनो धर्म उक्तो निरूपितो जिनोत्तमैरर्हद्भिरेवम् उक्तनीत्या सद्भावनासारः परमपुरुषार्थानुकूलभावनाप्रधानो भावश्रावकधर्म इत्यर्थः, कीदृशोऽसावित्याह-परम् अवन्ध्यमिह भवान्तरे वा चारित्रकारणं सर्वविरतिहेतुः ॥१६॥

ननु कथं परं चारित्रकारणमसावित्याशङ्क्याह-

**पदंपदेन मेधावी, यथारोहति पर्वतम् । सम्यक् तथैव नियमाद्धीरश्चारित्रपर्वतम् ॥१७॥**

इह पदं पदिकोच्यते, ततः पदेन पदेन यदारोहणं तन्निपातनात् पदंपदेनेत्युच्यते, ततः पदंपदेन मेधावी बुद्धिमान् यथेति दृष्टान्तार्थ आरोहति आक्रामति पर्वतमुज्जयन्तादिकं सम्यक् हस्तपादादिशरीरावयवभङ्गाभावेन तथैव तेनैव प्रकारेण नियमादवश्यन्तया धीरो निष्कलङ्कानुपालितश्रमणोपासकसमाचारः चारित्रपर्वतं सर्वविरतिमहाशैलमिति ॥१७॥ ननु एतदपि कथमित्थमित्याह-

**स्तोकान् गुणान् समाराध्य, बहूनामपि जायते। यस्मादाराधनायोग्यस्तस्मादादावयं मतः ॥१८॥**

**इति ।**

स्तोकान् तुच्छान् गुणान् श्रमणोपासकावस्थोचितान् समाराध्य पालयित्वा बहूनां सु[१]श्रमणोचितगुणानां 'स्तोकानामाराधनायोग्यो जात एव' इति अपिशब्दार्थः, जायते भवति यस्मात् कारणादाराधनायोग्यः परिपालनोचितो ऽविकलाल्पगुणाराधनाबलप्रलीनबहुगुणलाभबाधककर्मकलङ्कत्वेन तद्गुणलाभसामर्थ्यभावात् तस्मात् कारणादादौ

१ इत आरभ्य १२७-१२८ इति पत्रद्वयं K. मध्ये नास्ति॥

प्रथमत एव अयमनन्तरप्रोक्तो गृहस्थधर्मो मतः सुधियां सम्मतः इति। पुरुषविशेषापेक्षोऽयं न्यायः, अन्यथा तथाविधाध्यवसायसामर्थ्यात्तदा एवाबलीभूतचारित्रमोहानां स्थूलभद्रादीनामेतत्क्रममन्तरेणापि परिशुद्धसर्वविरतिलाभस्य शास्त्रेषु श्रूयमाणत्वात् ॥१८॥

इति श्री मुनिचन्द्रसूरिविरचितायां धर्मबिन्दुवृत्तौ विशेषतो गृहस्थधर्मविधिस्तृतीयोऽध्यायः समाप्तः ।

## अथ चतुर्थोऽध्यायः।

व्याख्यातस्तृतीयोऽध्यायः, साम्प्रतं चतुर्थ आरभ्यते, तस्य चेदमादिसूत्रम्-

**एवं विधिसमायुक्तः सेवमानो गृहाश्रमम् ।चारित्रमोहनीयेन, मुच्यते पापकर्मणा ॥१९॥इति।**

एवमुक्तरूपेण विधिना सामान्यतो विशेषतश्च गृहस्थधर्मलक्षणेन समायुक्तः सम्पन्नः सेवमानोऽनुशीलयन् गृहाश्रमं गृहवासम्, किमित्याह- चारित्रमोहनीयेन प्रतीतरूपेण मुच्यते परित्यज्यते पापकर्मणा पापकृत्यात्मकेन ॥१॥

एतदपि कथमित्याह-

**सदाज्ञाराधनायोगाद् भावशुद्धेर्नियोगतः ।उपायसम्प्रवृत्तेश्च सम्यक्चारित्ररागतः ॥२०॥इति ।**

सन् अकलङ्कितो य आज्ञाराधन[ना?]योगो 'यतिधर्माभ्यासासहनादौ श्रावकधर्मोऽभ्यसनीयः' इत्येवंलक्षणो जिनोपदेशसम्बन्धः, तस्माद् यका भावशुद्धिर्मनोनिर्मलता, तस्या नियोगतोऽवश्यन्तया, तथा उपायसम्प्रवृत्तेश्च, उपायेन शुद्धहेत्वङ्गीकरणरूपेण प्रवृत्तेः चेष्टनात्, चकारो हेत्वन्तरसमुच्चये, इयमपि कुत इत्याह-सम्यक्चारित्ररागतो निर्व्याज-

चारित्राभिलाषात्, इदमुक्तं भवति-सदाज्ञारा[1]धनायोगाद् यका भावशुद्धिर्या च सम्यक्चारित्रानुरागत उपायसम्प्रवृत्ति-रणुव्रतादिपालनरूपा ताभ्यामुभाभ्यामपि हेतुभ्यां चारित्र-मोहनीयेन मुच्यते, न पुनरन्यथेति ॥

आह-इदमपि कथं सिद्धं यथेत्थं चारित्रमोहनीयेन मुच्यते ततः परिपूर्णप्रत्याख्यानभाग् भवतीत्याशङ्क्याह -

**विशुद्धं सदनुष्ठानं स्तोकमप्यर्हतां मतम् । तत्त्वेन तेन च प्रत्याख्यानं ज्ञात्वा सुबह्वपि ॥२१॥ इति ।**

विशुद्धं निरतिचारमत एव सत् सुन्दरमनुष्ठानं स्थूलप्राणातिपातविरमणादि स्तोकमपि अन्यतमैकभङ्गक-प्रतिपत्त्या अल्पम्, बहु तावन्मतमेवेत्यपिशब्दार्थः, अर्हतां पारगतानां मतमभीष्टम्, कथमित्याह-तत्त्वेन तात्त्विक-रूपतया, न पुनरतिचारकालुष्यदूषितं बह्वप्यनुष्ठानं सुन्दरं मतम्, तेन च तेन पुनर्विशुद्धेनानुष्ठानेन करणभूतेन स्तोकेनापि कालेन प्रत्याख्यानमाश्रवद्वारनिरोधलक्षणं ज्ञात्वा गुरुमूले श्रु[2]तधर्मतया सम्यगवबुध्य प्रत्याख्यानस्य फलं हेतुं च सुबह्वपि सर्वपापस्थानविषयतया भूयिष्ठमपि करोतीति गम्यते, स्तोकं तावदनुष्ठानं सम्पन्नमेवेत्यपिशब्दार्थः, अयमभिप्रायः-

१. इतः K. प्रतेरारम्भ ः॥ २. श्रुतमूलधर्मतया J. ॥

स्तोकादप्यनुष्ठानादत्यन्तविशुद्धात् स[1]काशात् कालेन प्रत्याख्यानस्वरूपादि ज्ञातुर्भूयिष्ठमपि प्रत्याख्यानं सम्पद्यत इति ॥२१॥

**इति विशेषतो गृहस्थधर्म उक्तः, साम्प्रतं यतिधर्मावसर इति यतिमनुवर्णयिष्यामः ॥१॥२२७॥ इति।**

प्रतीतार्थमेव ॥१॥ यत्यनुवर्णनमेवाह-

**अर्हः अर्हसमीपे विधिप्रव्रजितो यतिः ॥२॥२२८॥ इति।**

अर्हः प्रव्रज्यार्हो वक्ष्यमाण एव अर्हस्य प्रव्रज्यादानयोग्यस्य वक्ष्यमाणगुणस्यैव गुरोः समीपे पार्श्वे विधिना वक्ष्यमाणेनैव प्रव्रजितो गृहीतदीक्षो यतिर्मुनिरित्युच्यते इति ॥२॥ 'यथोद्देशं निर्देशः' इति न्यायात् प्रव्रज्यार्हमेवाभिधित्सुराह -

१. सकाशात् नास्ति J.L.॥

अथ प्रव्रज्यार्हः- आर्यदेशोत्पन्नः१, विशिष्टजातिकुलान्वितः२, क्षीणप्रायकर्ममलः३, तत एव विमलबुद्धिः ४, 'दुर्लभं मानुष्यम्, जन्म मरणनिमित्तम्, सम्पदश्चपलाः, विषया दुःखहेतवः, संयोगे वियोगः, प्रतिक्षणं मरणम्, दारुणो विपाकः इत्यवगतसंसारनैर्गुण्यः ५, तत एव तद्विरक्तः ६, प्रतनुकषायः ७, अल्पहास्यादिः ८, कृतज्ञः ९, विनीतः १०, प्रागपि राजा-ऽमात्य-पौरजन-बहुमतः ११, अद्रोहकारी १२, कल्याणाङ्गः १३, श्राद्धः १४, स्थिरः १५, समुपसम्पन्न १६ श्चेति ॥३॥२२९॥ इति ।

एतत् सर्वं सुगमम्, परम् अथेत्यानन्तर्यार्थः, प्रव्रजनं पापेभ्यः प्रकर्षेण शुद्धचरणयोगेषु व्रजनं गमनं प्रव्रज्या, तस्या अर्हो योग्यः प्रव्रज्यार्हो जीवः, कीदृशः इत्याह-आर्यदेशोत्पन्नो मगधाद्यर्धषड्विंशतिमण्डलमध्यलब्धजन्मा, तथा विशिष्टजातिकुलान्वितो विशुद्धवैवाह्यचतुर्वर्णान्तर्गतमातृपितृपक्षरूपजातिकुलसम्पन्नः, तथा क्षीणप्रायकर्ममलः, क्षीणप्राय उत्सन्नप्रायः कर्ममलो ज्ञानावरण-मोहनीयादिरूपो यस्य स तथा, तत एव विमलबुद्धि र्यत एव क्षीणप्रायकर्ममलस्तत एव हेतोर्विमलबुद्धिर्निर्मलीमसमतिः, प्रतिक्षणं मरणमिति समयप्रसिद्धावीचिमरणापेक्षयेति, पठ्यते च-

*यां[1] मेव रात्रिं प्रथमामुपैति गर्भे वसत्यै नरवीर! लोकः। ततः प्रभृत्यस्खलितप्रयाणः स प्रत्यहं मृत्युसमीपमेति ॥१४८॥*[ ] नरवीर इति व्यासेन युधिष्ठिरस्य सम्बोधनमिति। दारुणो विपाको मरणस्यैवेति गम्यते, सर्वाभावकारित्वात्तस्येति। प्रागपि इति प्रव्रज्याप्रतिपत्तिपूर्वकाल एवेति। स्थिर इति प्रारब्धकार्यस्यापान्तराल एव न परित्यागकारी। समुपसम्पन्न इति समिति सम्यग्वृत्त्या सर्वथाऽऽत्मसमर्पणरूपया उपसम्पन्नः सामीप्यमागत इति ॥३॥

इत्थं प्रव्रज्यार्हमभिधाय प्रव्राजकमाह -

**गुरुपदार्हस्तु इत्थम्भूत एव-विधिप्रतिपन्नप्रव्रज्यः१, समुपासितगुरुकुलः२, अस्खलितशीलः३, सम्यगधीतागमः४, तत एव विमलतरबोधात्तत्त्ववेदी ५, उपशान्तः ६, प्रवचनवत्सलः७, सत्त्वहितरतः८, आदेयः९, अनुवर्तकः१०, गम्भीरः११, अविषादी १२, उपशमलब्ध्यादिसम्पन्नः१३, प्रवचनार्थवक्ता १४, स्वगुर्वनुज्ञातगुरुपद १५ श्चेति ॥४॥ २३०॥** इति ।

१. महाभारते शान्तिपर्वणि १६९ तमेऽध्याये ॥११॥ श्लोकानन्तरं 'यामेव रात्रिं प्रथमां गर्भो भजति मातरम्। तामेव रात्रिं प्रस्थाति मरणायानिवर्तकः ॥' इति प्रत्यन्तरे पाठः ॥

गुरुपदार्हः प्रव्राजकपदयोग्यः, तुः पूर्वस्माद् विशेषणार्थः, इत्थम्भूत एव प्रव्रज्यार्हगुणयुक्त एव सन् न पुनरन्यादृशोऽपि, तस्य स्वयं निर्गुणत्वेन प्रव्राज्यजीवगुणबीजनिक्षेपकरणायोगात्, किमित्याह-विधिप्रतिपन्नप्रव्रज्यो वक्ष्यमाणक्रमाधिगतदीक्षः,समुपासितगुरुकुलो विधिवदाराधितगुरुपरिवारभावः, अस्खलितशीलः प्रव्रज्याप्रतिपत्तिप्रभृत्येवाखण्डितव्रतः, सम्यगधीतागमः सूत्रार्थोभयज्ञानक्रियादिगुणभाजो गुरोरासेवनेनाधिगतपारगत-गदितागमरहस्यः, यतः पठ्यते-

*तित्थे सुत्तत्थाणं गहणं विहिणा उ तत्थ तित्थमिदं। उभयन्नू चेव गुरू विही उ विणयाइओ चित्तो ॥१४९॥*

*उभयण्णू वि य किरियापरो दढं पवयणाणुरागी य। ससमयपरूवगो परिणओ य पन्नो य अच्चत्थं ॥१५०॥*

[उपदेशपदे ८५१-८५२] त्ति।

तत एव सम्यगधीतागमत्वादेव हेतोर्यो विमलतरो बोधः शेषान् सम्यगधीतागमानपेक्ष्य स्फुटतरः प्रज्ञोन्मीलः तस्मात् सकाशात् तत्त्ववेदी जीवादिवस्तुविज्ञाता, उपशान्तो मनोवाक्कायविकारविकलः, प्रवचनवत्सलो यथानुरूपं

साधु-साध्वी-श्रावक-श्राविकारूपचतुर्वर्णश्रमणसङ्घवात्सल्यविधायी, सत्त्वहितरतः तत्तच्चित्रोपायोपादानेन सामान्येन सर्वसत्त्वप्रियकरणपरायणः, आदेयः परेषां ग्राह्यवचनचेष्टः, अनुवर्तकः चित्रस्वभावानां प्राणिनां गुणान्तराधानधियाऽनुवृत्तिशीलः, गम्भीरो रोषतोषाद्यवस्थायामप्यलब्धमध्यः, अविषादी न परीषहाद्यभिभूतः का[१]यसंरक्षणादौ दैन्यमुपयाति, उपशमलब्ध्यादिसम्पन्नः, उपशमलब्धिः परमुपशमयितुं सामर्थ्यलक्षणा, आदि-शब्दादुपकरणलब्धिः स्थिरहस्तलब्धिश्च गृह्यते, ततस्ताभिः सम्पन्नः समन्वितः प्रवचनार्थवक्ता यथावस्थितागमार्थप्रज्ञापकः, स्वगुर्वनुज्ञातगुरुपदः, स्वगुरुणा स्वगच्छनायकेनानुज्ञातगुरुपदः समारोपिताचार्यपदवीकः, चकारो विशेषणसमुच्चये, इतिशब्दो गुरुगुणेयत्तासूचकः। अत्र षोडश प्रव्रज्यार्हगुणाः, पञ्चदश पुनर्गुरुगुणा निरूपिता इति ॥४॥ उत्सर्गपक्षश्चायम्, अथात्रैवापवादमाह-

**पादार्द्धगुणहीनौ मध्यमा-ऽवरौ ॥५॥२३१॥ इति ।**

१. षड्जीवनिकायसंरक्षणादावित्यर्थः ॥

पादेन चतुर्थभागेन अर्द्धेन च प्रतीतरूपेण प्रस्तुतगुणानां हीनौ न्यूनौ प्रव्राज्य-प्रव्राजकौ मध्यमा-ऽवरौ मध्यम-जघन्यौ क्रमेण योग्यौ स्यातामिति ॥५॥

अथैतस्मिन्नेवार्थे परतीर्थिकमतानि दश स्वमतं चोपदर्शयितुमिच्छुः 'नियम एवायमिति वायु'रित्यादिकं 'भवन्ति अल्पा अपि गुणाः कल्याणोत्कर्षसाधकाः' इत्येतत्पर्यन्तं सूत्रकदम्बकमाह-

**नियम एवायमिति वायुः ॥६॥२३२॥ इति।**

नियम एव अवश्यम्भाव एव अयं यदुत परिपूर्णगुणो योग्यो नापरः पादप्रमाणादिहीनगुणः स्यादित्येवं वायुः वायुनामा प्रवादिविशेषः, प्राहेति सर्वत्र क्रिया गम्यते ॥६॥ कुत इत्याह-

**समग्रगुणसाध्यस्य तदर्द्धभावेऽपि तत्सिद्ध्यसम्भवाद् ॥७॥२३३॥ इति ।**

समग्रगुणसाध्यस्य कारणरूपसमस्तगुणनिष्पाद्यस्य कार्यस्य तदर्द्धभावेऽपि तेषां गुणानामर्द्धभावे उपलक्षणत्वात्

पादहीनभावे च तत्सिद्ध्य[1]सम्भवात्, त[2]स्माद् गुणार्द्धात् पादोनगुणभावाद्वा या सिद्धिः निष्पत्तिः तस्या असम्भवाद् अघटनात्, अन्यथा कार्यकारणव्यवस्थोपरमः प्रसज्यत इति ॥७॥

**नैतदेवमिति वाल्मीकिः ॥८॥२३४॥ इति ।**

न नैव एतद् वायूक्तमिति एतत् प्राह वाल्मीकिः वल्मीकोद्भवः ऋषिविशेषः ॥८॥ कुत इत्याह-

**निर्गुणस्य कथञ्चित्तद्गुणभावोपपत्तेः ॥९॥२३५॥ इति ।**

निर्गुणस्य सतो जीवस्य कथञ्चित् केनापि प्रकारेण स्वगतयोग्यताविशेषलक्षणेन प्रथमं तद्गुणभावोपपत्तेस्तेषां समग्राणां प्रव्राज्यगुणानां प्रव्राजकगुणानां वा भावोपपत्तेर्घटनासम्भवात्, तथाहि - यथा निर्गुणोऽपि सन् जन्तुर्विशिष्टकार्यहेतून् प्रथमं गुणान् लभते तथा यदि तद्गुणाभावेऽपि कथञ्चिद्विशिष्टमेव कार्यं लप्स्यते तदा को नाम विरोधः स्यात् ?, दृश्यते च दरिद्रस्यापि कस्यचिदकस्मादेव राज्यादिविभूतिलाभ इति ॥९॥

१. सम्भवादिति L. ॥ २. तस्मात् गुणाद् गुणार्धात् J. ॥

**अकारणमेतदिति व्यासः ॥१०॥२३६॥ इति ।**

अकारणम् अप्रयो[१]जनं निष्फलमित्यर्थ एतद् वाल्मीकिनिरूपितं वाक्यम् इत्येतद् ब्रूते व्यासः कृष्णद्वैपायनः ॥१०॥ कुत इत्याह-

**गुणमात्रासिद्धौ गुणान्तरभावनियमाभावात्॥११॥२३७॥ इति ।**

गुणमात्रस्य स्वाभाविकस्य तुच्छस्यापि गुणस्य प्रथममसिद्धौ सत्यां गुणान्तरस्य अन्यस्य गुणविशेषस्य भाव उत्पादो गुणान्तरभावः, तस्य नियमाद् अवश्यन्तया अभावाद् असत्त्वात्, स्वानुरूपकारणपूर्वको हि कार्यव्यवहारः, यतः पठ्यते-

नाकारणं भवेत् कार्यम्, नान्यकारणकारणम् । अन्यथा न व्यवस्था स्यात् कार्यकारणयोः क्वचित् ॥१५१॥ [ ] नान्यकारणकारणमिति न नैव अन्यस्य आत्मव्यतिरिक्तस्य कारणमन्यकारणम्, अन्यकारणं कारणं यस्य तत् तथा,

---

१. योजकं L. ॥

पटादेः कारणं सूत्रपिण्डादिर्घटादेः कारणं न भवति इति भावः ॥११॥

**नैतदेवमिति सम्राट् ॥१२॥२३८॥ इति ।**

नैतदेवमिति प्राग्वत् सम्राट् राजर्षिविशेषः प्राह ॥१२॥ कुत इत्याह-

**सम्भवादेव श्रेयस्त्वसिद्धेः ॥१३॥२३९॥ इति ।**

सम्भवादेव यो[1]ग्यत्वादेव, न पुनर्गुणमात्रादेव केवलात् सम्भवविकलात्, श्रेयस्त्वसिद्धेः सर्वप्रयोजनानां श्रेयोभावनिष्पत्तेः, इदमुक्तं भवति-गुणमात्रे सत्यपि यावदद्यापि प्रव्राज्यादिर्जीवो विवक्षित[2]कार्यं प्रति योग्यतां न लभते न तावत्तत्तेनारब्धमपि सिध्यति, अनधिकारित्वात्तस्य, अनधिकारिणश्च सर्वत्र कार्ये प्रतिषिद्धत्वात्, अतो योग्यतैव सर्वकार्याणां श्रेयोभावसम्पादिकेति ॥१३॥

**यत्किञ्चिदेतदिति नारदः ॥१४॥२४०॥ इति ।**

१. श्रेयस्त्वयोग्यत्वादेव L. ॥ २. क्षितं कार्यं L. ॥

[१]यत्किञ्चिद् न किञ्चिदित्यर्थ एतत् सम्राडुक्तमिति नारदो वक्ति ॥१४॥ कुत इत्याह-

**गुणमात्राद् गुणान्तरभावेऽप्युत्कर्षायोगात् ॥१५॥२४१॥ इति ।**

गुणमात्राद् योग्यतामात्ररूपाद् गुणान्तरस्य तथाविधस्य भावेऽप्युत्कर्षायोगादुत्कृष्टानां गुणानामसम्भवात्, अन्यथा योग्यतामात्रस्य प्रायेण सर्वप्राणिनां सम्भवादुत्कृष्टगुणप्रसङ्गेन न कश्चित् सामान्यगुणः स्यात्, अतो विशिष्टैव योग्यता गुणोत्कर्षसाधिकेति सिद्धमिति ॥१५॥

**सोऽप्येवमेव भवतीति वसुः ॥१६॥२४२॥ इति ।**

सोऽपि गुणोत्कर्षः, किं पुनर्गुणमात्राद् गुणान्तरसिद्धिरित्यपिशब्दार्थः, एवमेव पूर्वगुणानामुत्तरोत्तरगुणारम्भकत्वेन भवति निष्पद्यते, निर्बीजस्य कस्यचित् कार्यस्य कदाचिदप्यभावादित्येतद् वसुः समयप्रसिद्धो राजविशेषो निगदति, एष च मनाग् व्यासमतानुसारीति ॥१६॥

१. यत्किञ्चिदेतदित्यर्थः एतत्सम्राडुक्तमिति K. ॥

**अयुक्तंकार्षापणधनस्य तदन्यविढपनेऽपि कोटिव्यवहारारोपणमिति क्षीरकदम्बः ॥१७॥२४३॥ इति ।**

अयुक्तमघटमानकं कार्षापणधनस्य अतिजघन्यरूपकविशेषसर्वस्वस्य व्यवहारिणो लोकस्य तदन्यविढपनेऽपि, तस्मात् कार्षापणादन्येषां कार्षापणादीनां विढपने उपार्जने, किं पुनस्तदन्याविढपने इत्यपिशब्दार्थः, कोटिव्यवहारारोपणं कोटिप्रमाणानां दीनारादीनां व्यवहारे आत्मन आरोपणमिति, यतोऽतिबहुकालसाध्योऽयं व्यवहारः, न च तावन्तं कालं व्यवहारिणां जीवितं सम्भाव्यते । एवं च क्षीरकदम्बनारदयोर्न कश्चिन्मतभेदो यदि परं वचनकृत एवेति ॥१७॥

**न दोषो योग्यतायामिति विश्वः ॥१८॥२४४॥ इति ।**

न नैव दोषोऽघटनालक्षणः कश्चिद् योग्यतायां कार्षापणधनस्यापि तथाविधभाग्योदयात् प्रतिदिनं शतगुणसहस्रगुणादिकार्षापणोपार्जनेन कोटिव्यवहारारोपणोचितत्वलक्षणायाम्, श्रूयन्ते च केचित् पूर्वं तुच्छव्यवहारा अपि तथाविधभाग्यवशेन स्व[1]ल्पेनैव कालेन कोटिव्यवहारमारूढा इत्येतद् विश्वो विश्वनामा प्रवादी प्राहेति, अयं च मनाक्

१. स्वल्पेनैव व्यवहारकालेन J. ॥

सम्प्राण्मतमनुसरतीति ॥१८॥

**अन्यतरवैकल्येऽपि गुणबाहुल्यमेव सा तत्त्वत इति सुरगुरुः ॥१९॥२४५॥ इति ।**

अन्यतरस्य कस्यचिद् गुणस्य वैकल्येऽपि, किं पुनरवैकल्ये इत्यपिशब्दार्थः, गुणबाहुल्यमेव गुणभूयस्त्वमेव सा पूर्वसूत्रसूचिता योग्यता तत्त्वतः परमार्थवृत्त्या वर्तते, अतो न पादगुणहीनादिचिन्ता कार्येत्येतत् सुरगुरुः बृहस्पतिरुवाचेति ॥१९॥

**सर्वमुपपन्नमिति सिद्धसेनः ॥२०॥२४६॥ इति ।**

समस्तेष्वपि धर्मार्थकाममोक्षव्यवहारेषु पुरुषपराक्रमसाध्येषु विषये यद् यद् उपपन्नं घटमानं निमित्ततया बुद्धिमद्भिरुत्प्रेक्ष्यते तत् सर्वमखिलं से[१]त्यनुवर्तते उपपन्नत्वस्य योग्यताया अभिन्नत्वादिति सिद्धसेनो नीतिकारः शास्त्रकृद्विशेषो जगाद ॥२०॥ इत्थं दश परतीर्थिकमतान्युपदर्श्य स्वमतमुपदर्शयन्नाह-

१. योग्यतैव इत्यर्थः J. मध्ये टिप्पणे सूचितः ॥

**भवन्ति त्वल्पा अपि असाधा[१]रणा गुणाः कल्याणोत्कर्षसाधका इति ॥२१॥२४७॥**

भवन्ति न न भवन्ति, तुः पूर्वमतेभ्योऽस्य वैशिष्ट्यख्यापनार्थः, अल्पा अपि परिमिता अपि, किं पुनरनल्पा इत्यपिशब्दार्थः, गुणा आर्यदेशोत्पन्नतादय असाधारणाः सामान्यमानवेष्वसम्भवन्तः कल्याणोत्कर्षसाधकाः प्रव्रज्या-द्युत्कृष्टकल्याणनिष्पादकाः, असाधारणगुणानां नियमादितरगुणाकर्षणावन्ध्यकारणत्वादिति युक्तमुक्तमादौ यदुत पा[२]दार्द्धगुणहीनौ मध्यमावरौ योग्याविति । अत्र वायु-वाल्मीकि-व्यास-सम्राड्-नारद-वसु-क्षीरकदम्बमतानां कस्यचित् केनापि संवादेऽप्यन्यतरेण निराक्रियमाणत्वादनादरणीयतैव, विश्व-सुरुगुरु-सिद्धसेनमतेषु च यद्यसाधारणगुणाना[३]दरणेन योग्यताङ्गीक्रियते तदा न सम्यक्, तस्याः परिपूर्णकार्यासाधकत्वात्, अथान्यथा तदाऽस्मन्मतानुवाद एव तैः शब्दान्तरेण कृतः स्यात्, न[४] पुनः स्वमतस्थापनं किञ्चिद् इति ॥२१॥ इत्युक्तौ प्रव्राज्य-प्रव्राजकौ, अधुना प्रव्रज्यादानविधिमभिधित्सुराह-

---

१. रणगुणाः JKL ॥ २. दृश्यतां ४।५ ॥ ३. नादरेण L ॥ ४. न तु स्वमत J ॥

उपस्थितस्य प्रश्ना-ऽऽचारकथन-परीक्षादिर्विधिः॥२२॥२४८॥ इति ।

उपस्थितस्य स्वयं प्रव्रज्यां ग्रहीतुं समीपमागतस्य, प्रश्नश्च आचारकथनं च परीक्षा च प्रश्नाचारकथनपरीक्षाः ता आदिर्यस्य स तथा, आदिशब्दात् कण्ठतः सामायिकादिसूत्रप्रदानतथाविधानुष्ठानाभ्यासग्रहः, विधिः क्रमः प्रव्रज्याप्रदाने पूर्वसूत्रसूचित एषः, इदमुक्तं भवति- सद्धर्मकथाक्षिप्ततया प्रव्रज्याभिमुख्यमागतो भव्यजन्तुः पृच्छनीयः यथा 'को वत्स ! त्वम्, किंनिमित्तं वा प्रव्रजसि?' ततो यद्यसौ कुलपुत्रकः तगरानगरादिसुन्दरक्षेत्रोत्पन्नः 'सर्वाशुभोद्भवभवव्याधिक्षयनिमित्तमेवाहं भगवन् ! प्रव्रजितुमुद्यतः' इत्युत्तरं कुरुते तदाऽसौ प्रश्नशुद्धः। ततोऽस्य 'दुरनुचरा प्रव्रज्या कापुरुषाणाम्, आरम्भनिवृत्तानां पुनरिह परभवे च परमः कल्याणलाभः, तथा यथैव जिनानामाज्ञा सम्यगाराधिता मोक्षफला तथैव विराधिता संसारफल[1]दुःखदायिनी, तथा य[2]था कुष्ठादिव्याधिमान् क्रियां प्राप्तकालां प्रतिपद्यापथ्यमासेवमानोऽप्रवृत्तादधिकं शीघ्रं च विनाशमाप्नोति एवमेव भावक्रियां संयमरूपां कर्मव्याधिक्षयनिमित्तं प्रपद्य

१. फला दुःख J.। तुलना-पञ्चव. ११९॥ २. यथाहि L. ॥

पश्चादसंयमापथ्यसेवी अधिकं कर्म समुपार्जयति' इ[1]त्येवं तस्य साध्वाचारः कथनीय इति २। एवं कथितेऽपि साध्वाचारे निपुणमसौ परीक्षणीयः, यतः-

*असत्याः सत्यसङ्काशाः, स[2]त्याश्चासत्यसन्निभाः। दृश्यन्ते विविधा भावास्त[3]स्माद्युक्तं परीक्षणम् ॥१५२॥ [महाभारते शान्तिपर्वणि १२/११२/६१]*

*अ[4]तथ्यान्यपि तथ्यानि, दर्शयन्त्यतिकौशलाः। चित्रे निम्नोन्नतानीव चित्रकर्मविदो जनाः ॥१५३॥ [महाभारते अनुशासनपर्वणि ]*

परीक्षा च सम्यक्त्व-ज्ञान-चारित्रपरिणतिविषया तैस्तैरुपायै-र्विधेया, परीक्षाकालश्च प्रायतः षण्मासाः, तथाविधपात्रापेक्षया तु अल्पो बहुश्च स्यात् ३। तथा सामायिकसूत्रमकृतोपधानस्यापि कण्ठतो वितरणीयम्, अन्यदपि

१. इत्येवं च तस्य L. । २. सत्याश्चासत्यदर्शिनः (दर्शनाः-इति प्रत्यन्तरे) इति महाभारते पाठः ॥ ३. स्तेषु युक्तं-इत्यपि महाभारते क्वचित् पुस्तके पाठः ॥ ४. अतथ्यान्यपि तथ्यानि दर्शयन्त्यपि पेशलाः । समे निम्नोन्नतानीव चित्रं (त्र) कर्मविदो जनाः ॥'' इति महाभारते अनुशासनपर्वणि १५० तमाध्यायानन्तरं ८७ तमः श्लोकः, दृश्यताम् अनुशासनपर्वणि Appendix 20, Lines 173-174 ॥

सूत्रं पात्रतामपेक्ष्याध्यापयित[1]व्यः ४॥२२॥ तथा-

**गुरुजनाद्यनुज्ञा ॥२३॥२४९॥ इति ।**

गुरुजनो माता-पित्रादिलक्षणः, आदिशब्दाद् भगिनीभार्यादिशेषसम्बन्धिलोकपरिग्रहः, तस्य अनुज्ञा 'प्रव्रज त्वम्' इत्यनुमतिरूपा विधिरित्यनुवर्तते ॥२३॥ यदा पुनरसौ तत्तदुपायतोऽनुज्ञापितोऽपि न मुञ्चति तदा यद् विधेयं तदाह-

**तथा तथोपधायोगः ॥२४॥२५०॥ इति ।**

तथा तथा तेन तेन प्रकारेण सर्वथा परैरनुपलक्ष्यमाणेन उपधायोगो मायायाः प्रयोजनम् ॥२४॥ कथमित्याह-

**दुःस्वप्नादिकथनम् ॥२५॥२५१॥ इति ।**

दुःस्वप्नस्य खरोष्ट्रमहिषाद्यारोहणादिदर्शनरूपस्य आदिशब्दान्मातृमण्डलादिविपरीतालोकनादिग्रहः, तस्य कथनं गुर्वादिनिवेदनमिति ॥२५॥ तथा -

१. स प्रव्राज्य इति भावः ॥

**विपर्ययलिङ्गसेवा ॥२६॥२५२॥ इति ।**

विपर्ययः प्रकृतिविपरीतभावः, स एव मरणसूचकत्वाद् लिङ्गम्, तस्य सेवा निषेवणं कार्यं येन स गुर्वादिजनः सन्निहितमृत्युरयमित्यवबुध्य प्रव्रज्यामनुजानीते इति॥२६॥ विपर्ययलिङ्गानि तेषु स्वयमेवाबुध्यमानेषु किं कृत्यमित्याह--

**दैवज्ञैस्तथा तथा निवेदनम् ॥२७॥२५३॥ इति ।**

दैवज्ञैर्निमित्तशास्त्रपाठकैः तथा तथा तेन तेन निमित्तशास्त्रपाठादिरूपेणोपायेन निवेदनं गुर्वादिजनस्य ज्ञापनं विपर्ययलिङ्गानामेव कार्यमिति ॥२७॥ नन्वेवं मायाविनः प्रव्रज्याप्रतिपत्तावपि को गुणः स्यादित्याशङ्क्याह -

**न धर्मे माया ॥२८॥२५४॥ इति ।**

न नैव धर्मे साध्ये माया क्रियमाणा माया वञ्चना भवति, परमार्थतोऽमायात्वात्तस्याः ॥२८॥ एतदपि कुत इत्याह-

**उभयहितमेतत् ॥२९॥२५५॥ इति ।**

उभयस्य स्वस्य गुर्वादिजनस्य च हितं श्रेयोरूपमेतद् एवं प्रव्रज्याविधौ मायाकरणम्, एतत्फलभूतायाः प्रव्रज्यायाः स्वपरोपकारकत्वात्, पठ्यते च-

*अमायोऽपि हि भावेन माय्येव तु भवेत् क्वचित् । पश्येत् स्वपरयोर्यत्र सानुबन्धं हितोदयम् ॥१५४॥*
*[ ] इति ।*

अथेत्थमपि कृते तं विना गुर्वादिजनो निर्वाहमलभमानो न तं प्रव्रज्यार्थमनुजानीते तदा किं विधेयमित्याशङ्क्याह -

**यथाशक्ति सौविहित्यापादनम् ॥३०॥२५६॥ इति ।**

यथाशक्ति यस्य यावती शक्तिः शतसहस्रादिप्रमाणनिर्वाहहेतुद्रव्यादिसमर्पणरूपा तया सौविहित्यस्य सौस्थ्य-स्यापादनं विधानम्, येन प्रव्रजितेऽपि तस्मिन्नसौ न सीदति तस्य निर्वाहोपायस्य करणमिति भावः, एवं कृते कृतज्ञता

कृता भवति, करुणा च मार्गप्रभावनाबीजम्, ततस्तेनानुज्ञातः प्रव्रजेदिति ॥३०॥ अथैवमपि न तं मोक्तुमसावुत्सहते तदा -

**ग्लानौषधादिज्ञातात्त्यागः ॥३१॥२५७॥ इति ।**

ग्लानस्य तथाविधव्याधिबाधावशेन ग्लानिमागतस्य गुर्वादेर्लोकस्य औषधादिज्ञाताद् औषधस्य आदिशब्दात् स्वनिर्वाहस्य च ग्रहः, तस्य गवेषणमपि औषधादीत्युच्यते, ततो ग्लानौषधाद्येव ज्ञातं दृष्टान्तः, तस्मात्, त्यागः कार्यो गुर्वादेरिति। इदमुक्तं भवति-यथा कश्चित् कुलपुत्रकः कथञ्चिदपारं कान्तारं गतो मातापित्रादिसमेतः तत्प्रतिबद्धश्च तत्र व्रजेत्, तस्य च गुर्वादेस्तत्र व्रजतो नियमघाती वैद्यौषधादिरहितपुरुषमात्रासाध्यः तथाविधौषधादिप्रयोगयोग्यश्च महानातङ्कः स्यात्, तत्र चासौ तत्प्रतिबन्धादेवमालोचयति-यथा न भवति नियमादेष गुरुजनो नीरुक् औषधादिकमन्तरेण, औषधादिभावे च संशयः कदाचित् स्यात् कदाचिन्नेति, कालसहश्चायम्, ततः संस्थाप्य तथाविधचित्रवचनोपन्यासेन तं तदौषधादिनिमित्तं स्ववृत्तिहेतोश्च त्यजन् सन्नसौ साधुरेव भवति, एष हि त्यागोऽत्याग

एव, यः पुनरत्यागः स परमार्थतस्त्याग एव, यतः फलमत्र प्रधानम्, धीराश्चैतद्दर्शिन एव भवन्ति, तत औषधसम्पादनेन तं जीवयेदपीति सम्भवात् सत्पुरुषोचितमेतत्।

एवं शुक्लपाक्षिको महापुरुषः संसारकान्तारपतितो मातापित्रादिसङ्गतो धर्मप्रतिबद्धो विहरेत्, तेषां च तत्र नियमविनाशकोऽप्राप्तसम्यक्त्वबीजादिना पुरुषमात्रेण साधयितुमशक्यः, सम्भवत्सम्यक्त्वाद्यौषधो दर्शनमोहाद्युदयलक्षणः कर्मातङ्कः स्यात्, तत्र स शुक्लपाक्षिकः पुरुषो धर्मप्रतिबन्धादेवं समालोचयति, यदुत-विनश्यन्त्येतान्यवश्यं सम्यक्त्वाद्यौषधविरहेण, तत्सम्पादने विभाषा, कालसहानि चेमानि व्यवहारतस्ततो यावद् गृहवासं निर्वाहादिचिन्तया त[१]था संस्थाप्य तेषां सम्यक्त्वाद्यौषधनिमित्तं स्वचारित्रलाभनिमित्तं च स्वकीयौचित्यकरणेन त्यजन् सन्नभीष्टसंयमसिद्ध्या साधुरेव, एष त्यागोऽत्यागस्तत्त्वभावनातः, अत्याग एव च त्यागो मिथ्याभावनातः, तत्त्वफलमत्र प्रधानं बुधानाम्, यतो

१. तथा तथा संस्थाप्य K मू० ॥

धीरा एतद्दर्शिन आसन्नभव्याः, एवं च तानि सम्यक्त्वाद्यौषधसम्पादनेन जीवयेदात्यन्तिकम् अ[१]पुनर्मरणे[ऽ]-मरणावन्ध्यबीजयोगेन सम्भवात्, सुपुरुषोचितमेतद्, यतो दुष्प्रतिकारौ नियमान्मातापितरौ शेषश्च यथोचितं स्वजनलोकः, एष धर्मः सज्जनानाम्, भ[२]गवानत्र ज्ञातं परिहरन्नकुशलानुबन्धिमातापित्रादिशोकमिति ॥३१॥

**तथा गुरुनिवेदनम् ॥३२॥२५८॥ इति ।**

तथेति विध्यन्तरसमुच्चयार्थः, गुरुनिवेदनं सर्वात्मना गुरोः प्रव्राजकस्यात्मसमर्पणं कार्यमिति ॥३२॥

इत्थं प्रव्रज्यगतं विधिमभिधाय प्रव्राजकगतमाह-

**अनुग्रहधियाऽभ्युपगमः॥३३॥ २५९॥ इति ।**

गुरुणा अनुग्रहधिया सम्यक्त्वादिगुणारोपणबुद्ध्या अभ्युपगमः 'प्रव्राजनीयस्त्वम्' इत्येवंरूपः कार्यः, न पुनः

---

१. प्रतिषु पाठाः- अपुनर्मरणामरणावन्ध्यबीजयोगेन K, अयमपि पाठः कथञ्चित् सङ्गच्छत एव । अपुनर्मरणे मरणावन्ध्यबीजयोगेन J.L. मू० ॥ अपुनर्मरणेनामरणावन्ध्यबीज योगेन L. सं. । २. 'श्रीवीरः दृष्टान्त' इति L. टिप्पणेऽस्य अर्थः स्पष्टीकृतः ॥

स्वपरिषत्पूरणादिबुद्ध्येति ॥३३॥ तथा-

**निमित्तपरीक्षा ॥३४॥२६०॥ इति ।**

निमित्तानां भाविकार्यसूचकानां शकुनादीनां परीक्षा निश्चयनं कार्यम्, निमित्तशुद्धेः प्रधानविधित्वाद् इति ॥३४॥ तथा -

**उचितकालापेक्षणम् ॥३५॥२६१॥ इति ।**

उचितस्य प्रव्रज्यादानयोग्यस्य कालस्य विशिष्टतिथिनक्षत्रादियोगरूपस्य गणिविद्यानामक-प्रकीर्णकनिरूपितस्यापेक्षणम् आदरणमिति, यतस्तत्र पठ्यते-

*तिहिं उत्तराहिं तह रोहिणीहिं कुज्जा उ सेहनिक्खमणं। गणिवायए अणुन्ना महव्वयाणं च आरुहणा ॥१५५॥ [पञ्चव० ११२] तथा -*

*चाउद्दसिं पन्नरसिं वज्जेज्जा अट्ठमिं च नवमिं च। छट्ठिं च चउत्थिं बारसिं च दोण्हं पि पक्खाणं ॥१५६॥*

*[गणिविद्या० ७] इत्यादि ॥३५॥ तथा -*

**उपायतः कायपालनम् ॥३६॥२६२॥ इति ।**

उपायत उपायेन निरवद्यानुष्ठानाभ्यासरूपेण कायानां पृथिव्यादीनां पालनं रक्षणं प्रविव्रजिषुः प्राणी का[१]र्यत इति ॥३६॥ तथा -

**भाववृद्धिकरणम् ॥३७॥२६३॥ इति ।**

भावस्य प्रव्रज्याभिलाषलक्षणस्य वृद्धिरुत्कर्षः, तस्याः तैस्तैः प्रव्रज्याफलप्ररूपणादिवचनैः करणं सम्पादनं तस्य ॥३७॥ तथा -

**अनन्तरानुष्ठानोपदेशः ॥३८॥२६४॥ इति ।**

१. कार्य इति L ॥

अनन्तरानुष्ठानस्य प्रव्रज्याग्रहणानन्तरमेव करणीयस्य 'गुर्वन्तेवासिता-तद्भक्तिबहुमानादेः' अनन्तराध्या[१]ये एव वक्ष्यमाणस्योपदेशस्तस्य कार्यः ॥३८॥ तथा -

**शक्तितस्त्याग-तपसी ॥३९॥२६५॥ इति ।**

शक्तितः शक्तिमपेक्ष्य त्यागं च अर्थव्ययलक्षणं देव-गुरु-सङ्घपूजादौ विषये तपश्च अनशनादि कारणीयः स इति ॥३९॥ तथा -

**क्षेत्रादिशुद्धौ वन्दनादिशुद्ध्या शीलारोपणम् ॥४०॥२६६॥ इति ।**

क्षेत्रस्य भूमिभागलक्षणस्य आदिशब्दाद्दिशश्च शुद्धौ सत्यां वन्दनादिशुद्ध्या चैत्यवन्दन-कायोत्सर्गकारण-साधुनेपथ्य-समर्पणादिसमाचारचारुरूपतया शीलस्य सामायिकपरिणामरूपस्य करेमि भंते !

---

१. ५।३, ४।३. ''इक्षुवणादीनां समीपे दद्यात् सामायिकम्, न तु भग्नध्यामितगृहादिप्रदेशे। द्राक्षा-चन्दनलताद्याच्छादितप्रदेशो गम्भीरः, यत्र जल्पतां प्रतिशब्द उत्तिष्ठते स प्रदेशः सानुनाद इति'' इति विशेषावश्यकभाष्यस्य मलधारिहेमचन्द्रसूरिविरचितायां वृत्तौ॥

सामायिकमित्यादिदण्डकोच्चारण-पूर्वकमारोपणं प्रव्रज्यार्हे न्यसनं गुरुणा कार्यमिति। तत्र क्षेत्रशुद्धिरिक्षुवनादिरूपा, यथोक्तम् -

*उंच्छुवणे सालिवणे पउमसरे कुसुमिंए व वणसंडे। गंभीरसाणुणाए पयाहिणजले जिणहरे वा ॥१५७॥*

तथा -

*पुव्वाभिमुहो उत्तरमुहोव्व दिज्जाऽहवा पडिच्छेज्जा। जाए जिणादओ वा दिसाए जिणचेइयाइं वा ॥१५८॥*

[विशे० ३४०४,३४०६]॥ इति॥ शीलमेव व्याचष्टे -

**असङ्गतया समशत्रुमित्रता शीलम् ॥४१॥२६७॥ इति ।**

असङ्गतया क्वचिदपि अर्थे प्रतिबन्धाभावेन समशत्रुमित्रता शत्रौ मित्रे च समानमनस्कता शीलमुच्यत इति

१. मिए वण J मू० K ॥ 'मिए व वण J सं० ॥ २. इक्षुवणे शालिवने पद्मसरसि कुसुमिते वा वनषण्डे गम्भीरे सानुनादे प्रदक्षिणजले जिनगृहे वा ॥ पूर्वाभिमुख उत्तरमुखो वा दद्यादथवा प्रतीच्छेत् । यस्यां जिनादयो वा दिशि जिनचैत्यानि वा॥

॥४२॥ ननु स्वपरिणामसाध्यं शीलं तत् किमस्य क्षेत्रादिशुद्ध्यारोपणेनेत्याशङ्क्याह -

**अतोऽनुष्ठानात्तद्भावसम्भवः ॥४२॥२६८॥ इति ।**

अतोऽस्माद् अनुष्ठानादुक्तरूपशीलारोपणलक्षणात्तद्भावस्य शीलपरिणामलक्षणस्य सम्भवः समुत्पादः प्रागसतोऽपि जायते, सतश्च स्थिरीकरणमिति ॥४२॥ तथा-

**तपोयोगकारणं चेति ॥४३॥२६९॥ इ[1]ति ।**

स एवं विधिप्रव्रजितः सन् गुरुपरम्परयाऽऽगतमाचाम्लादितपोयोगं कार्यत इति ॥४३॥ अथोपसंहारमाह-

**एवं यः शुद्धयोगेन परित्यज्य गृहाश्रमम् । संयमे रमते नित्यं स यतिः परिकीर्तितः ॥२२॥ इति ।**

एवमुक्तरूपेण यो भव्यविशेषः शुद्धयोगेन सम्यगाचारविशेषेण परित्यज्य हित्वा गृहाश्रमं गृहस्थावस्थां संयमे हिंसादिविरमणरूपे रमते आसक्तिमान् भवति स एवंगुणो यतिः परिकीर्तित उक्तनिरुक्तः इति । अत्रैवाभ्युच्चयमाह-

१. इति नास्ति J.K.॥

**एतत्तु सम्भवत्यस्य सदुपायप्रवृत्तितः। अनुपायात्तु साध्यस्य सिद्धिं नेच्छन्ति पण्डिताः ॥२३॥ इति।**

एतत् पुनः यतित्वं सम्भवत्यस्य प्रव्रजितस्य सतः, कुत इत्याह-सदुपायप्रवृत्तितः, सता सुन्दरेण उपायेन अर्[1]होऽर्हसमीपे इत्याद्युक्तरूपेण प्रवृत्तेः चेष्टनात्, अत्रैव व्यतिरेकमाह- अनुपायात्तु उपायविपर्ययात् पुनः सिद्धिं सामान्येन सर्वस्य कार्यस्य निष्पत्तिं नेच्छन्ति न प्रतिपद्यन्ते पण्डिताः कार्यकारणविभागकुशलाः, यतः पठन्ति-*नाकारणं भवेत् कार्यम्* [ ] इत्यादि। उक्तविपर्यये दोषमाह -

**यस्तु नैवंविधो मोहाच्चेष्टते शास्त्रबाधया। स तादृग्लिङ्गयुक्तोऽपि न गृही न यतिर्मतः ॥२४॥इति।**

यस्तु यः पुनरद्याप्यतुच्छीभूतभवभ्रमणशक्तिर्न नैव एवंविधः किन्तु उक्तविधिविपरीतो मोहादज्ञानात् चेष्टते प्रवर्तते शास्त्रबाधया शास्त्रार्थोल्लङ्घनेन स प्राणी तादृग्लिङ्गयुक्तोऽपि शुद्धयतितुल्यनेपथ्यसनाथोऽपि, किं पुनरन्यथा-भूतनेपथ्य इत्यपिशब्दार्थः, न गृही गृहस्थाचाररहितत्वात्, न यतिर्भावचारित्रविरहितत्वादिति ॥४९॥

---

१. ४।२॥

इति श्रीमुनिचन्द्रसूरिविरचितायां धर्मबिन्दुवृत्तौ
यतिविधिःनामचतुर्थोऽध्यायः समाप्तः।

## अथ पञ्चमोऽध्यायः ।

व्याख्यातश्चतुर्थोऽध्यायः, अथ पञ्चमो व्याख्यायते, तस्य चेदमादिसूत्रम् -

**बाहुभ्यां दुस्तरो यद्वत् क्रूरनक्रो महोदधिः । यतित्वं दुष्करं तद्वदित्याहुस्तत्त्ववेदिनः ॥२५॥ इति ।**

बाहुभ्यां भुजाभ्यां दुस्तरः कृच्छ्रेण तरीतुं शक्यो यद्वदिति दृष्टान्तार्थः, क्रूरनक्रः, क्रूरा भीषणा नक्रा जलजन्तुविशेषा उपलक्षणत्वाद् मत्स्य-मकर-सुसुमारादयश्च यत्र स तथा, महोदधिर्महासमुद्रः, यतित्वं श्रामण्यं दुष्करं दुरनुष्ठेयं तद्वदिति दार्ष्टान्तिकार्थः, इत्येतदाहुरुक्तवन्तः, के इत्याह-तत्त्ववेदिनः प्रव्रज्यापरमार्थज्ञातार इति ॥१॥ अस्यैव दुष्करत्वे हेतुमाह -

**अपवर्गः फलं यस्य जन्म-मृत्य्वादिवर्जितः । परमानन्दरूपश्च दुष्करं तन्न चाद्भुतम् ॥२६॥ इति ।**

अपवर्गो मोक्षः फलं कार्यं यस्य यतित्वस्य जन्म-मृत्य्वादिवर्जितः जन्म-मरण-जरादिसंसारविकारविरहितः,

तथा परमानन्दरूपः सर्वोपमातीतानन्दस्वभावः, चकारो विशेषण-समुच्चये, दुष्करं कृच्छ्रेण कर्तुं शक्यं तद् यतित्वम्, न च नैवाद्भुतमाश्चर्यमेतत्, अत्यन्तमहोदयानां विद्या-मन्त्रौषधादि-साधनानामिहैव दुष्करत्वोपलम्भादिति ।।२।। एवं तर्हि कथमतिदुष्करं यतित्वं कर्तुं शक्यं स्यादित्याशङ्क्याह -

**भवस्वरूपविज्ञानात्तद्विरागाच्च तत्त्वतः । अपवर्गानुरागाच्च स्यादेतन्नान्यथा क्वचित् ।।२७।।**

**इति ।**

भवस्वरूपस्य इन्द्रजाल-मृगतृष्णिका-गन्धर्वनगर-स्वप्नादिकल्पस्य विज्ञानात् सम्यक्श्रुतलोचनेन अवलोकनात् प्राक्, तदनु तद्विरागात् तप्तलोहपदन्यासोद्विजनन्यायेन भवस्वरूपोद्वेगात्, चकारो हेत्वन्तरसमुच्चये, तत्त्वतः निर्व्याजवृत्त्या, तथा अपवर्गानुरागात् परमपदस्पृहातिरेकात्, चशब्दः प्राग्वत्, स्याद् भवेदेतद् यतित्वम्, नान्यथा नान्यप्रकारेण क्वचित् क्षेत्रे काले वा, सम्यगुपायमन्तरेणोपेयस्य कदाचिदभावादिति ।।३।।

**इत्युक्तो यतिः, अधुनाऽस्य धर्ममनुवर्णयिष्यामः, यतिधर्मो द्विविधः-सापेक्षयतिधर्मो-**

**निरपेक्षयतिधर्मश्च ॥१॥२७०॥ इति ।**

प्रतीतार्थमेव, परं गुरुगच्छादिसाहाय्यमपेक्षमाणो यः प्रव्रज्यां परिपालयति स सापेक्षः, इतरस्तु निरपेक्षो यतिः, तयोर्धर्मो-ऽनुक्रमेण गच्छवासलक्षणो जिनकल्पादिलक्षणश्चेति ॥१॥

**तत्र सापेक्षयतिधर्मः ॥२॥२७१॥ इति ।**

तत्र तयोः सापेक्ष-निरपेक्षयतिधर्मयोर्मध्यात् सापेक्षयतिधर्मोऽयं भण्यते ॥२॥ यथा-

**गुर्वन्तेवासिता ॥३॥२७२॥ इति ।**

गुरोः प्रव्राजकाचार्यस्य अन्तेवासिता शिष्यभावो यावज्जीवमनुष्ठेया, तच्छिष्यभावस्य महाफलत्वात्, पठ्यते च- *नाणस्स होइ भागी थिरयरओ दंसणे चरित्ते य। धण्णा आवकहाए गुरुकुलवासं न मुंचंति ॥१५९॥*[1] [बृहत्कल्पभाष्ये ५७१३] तथा -

१. गाथेयं पञ्चवस्तुके १३५८, उपदेशपदे ६८२ चाप्यस्ति ॥

**तद्भक्ति-बहुमानौ ॥४॥२७३॥ इति ।**

तस्मिन् गुरौ भक्तिः समुचितान्नपानादिनिवेदनपादप्रक्षालनादिरूपा बहुमानश्च भावप्रतिबन्धः ॥५॥ तथा-

**सदाज्ञाकरणम् ॥५॥२७४॥ इति ।**

सदा सर्वकालमह्नि रात्रौ चेत्यर्थ आज्ञाया गुरूपदिष्टस्वरूपायाः करणम् ॥६॥ तथा -

**विधिना प्रवृत्तिः ॥६॥२७५॥ इति ।**

विधिना शास्त्रोक्तेन प्रवृत्तिः प्रत्युपेक्षणा-प्रमार्जना-भिक्षाचर्यादिषु साधुसमाचारेषु व्यापारणम् ॥६॥ तथा -

**आत्मानुग्रहचिन्तनम् ॥७॥२७६॥ इति ।**

क्व[1]चिदप्यर्थे गुर्वाज्ञाया आत्मानुग्रहस्य उपकारस्य चिन्तनं विमर्शनम्, यथा-

*धन्यस्योपरि निपतत्यहितसमाचरणघर्मनिर्वापी । गुरुवदन-मलयनिसृतो वचनसरसचन्दनस्पर्शः ॥१६०॥*

१. क्वचिदर्थे J विना ॥

[प्रशम०७०] इति । तथा-

**व्रतपरिणामरक्षा ॥८॥२७७॥ इति ।**

व्रतपरिणामस्य चारित्रलक्षणस्य तत्तदुपसर्गपरीषहादिषु स्वभावत एव व्रतबाधाविधायिषु सत्सु रक्षा चिन्तामणिमहौषध्यादिरक्षणोदाहरणेन परिपालना विधेया ॥८॥ तथा-

**आरम्भत्यागः ॥९॥२७८॥ इति ।**

आरम्भस्य षट्कायोपमर्दरूपस्य त्यागः ॥९॥ एतदुपायमेवाह -

**पृथिव्याद्यसङ्घट्टनम् ॥१०॥२७९॥ इति ।**

पृथिव्यादीनां जीवनिकायानाम् असङ्घट्टनम्, सङ्घट्टनं स्पर्शनम्, तत्प्रतिषेधादसङ्घट्टनम्, उपलक्षणत्वादगाढ-गाढ-परितापना-ऽपद्रावणानां च परिहार इति ॥१०॥ तथा -

**त्रिधेर्याशुद्धिः ॥११॥२८०॥ इति ।**

त्रिधा ऊर्ध्वाधस्तिर्यग्दिगपेक्षया ईर्यायाः चङ्क्रमणस्य शुद्धिः युगमात्रादिदृष्टिनिवेशरूपा ॥११॥ तथा -

**भिक्षाभोजनम् ॥१२॥२८१॥ इति ।**

इह त्रिधा भिक्षा सर्वसम्पत्करी पौरुषघ्नी वृत्तिभिक्षा चेति । तल्लक्षणं चेदम् -

*यतिर्ध्यानादियुक्तो यो गुर्वाज्ञायां व्यवस्थितः। सदाऽनारम्भिणस्तस्य [१]सर्वसम्पत्करी मता ॥१६१॥*

*वृद्धाद्यर्थमसङ्गस्य भ्रमरोपमयाटतः । गृहि-देहोपकाराय विहितेति शुभाशयात् ॥१६२॥*

*प्रव्रज्यां प्रतिपन्नो यस्तद्विरोधेन वर्तते। असदारम्भिणस्तस्य पौरुषघ्नी प्रकीर्तिता ॥१६३॥ [हा० अष्टके ५/२, ३, ४]*

*निःस्वा-ऽन्ध-पङ्गवो ये तु, न शक्ता वै क्रियान्तरे। भिक्षा-मटन्ति वृत्त्यर्थं वृत्तिभिक्षेयमुच्यते ॥१६४॥* [हा०अष्टके ५।६] इति ।

१. इत आरभ्य षट् पत्राणि K. मध्ये न सन्ति ॥

ततो भिक्षया प्रस्तावात् सर्वसम्पत्करीलक्षणया पिण्डमुत्पाद्य भोजनं विधेयमिति ॥१२॥ तथा -

**आघाताद्यदृष्टिः ॥१३॥२८२॥ इति ।**

आघात्यन्ते हिंस्यन्ते जीवा अस्मिन्निति आघातः सू[1]नादिस्थानम्, आदिशब्दात् द्यूत-खलाद्यशेषप्रमादस्थान-ग्रहः, ततः आघातादेरदृष्टिरनवलोकनं कार्यम्, तदवलोकने हि अनादिभवाभ्यस्ततया प्रमादानां तत्कौतुकात् कोपादिदोषप्रसङ्गाद् इति ॥१३॥ तथा -

**तत्कथाऽश्रवणम् ॥१४॥२८३॥ इति ।**

तेषामाघातादीनां कथायाः परैरपि कथ्यमानाया अश्रवणमानाकर्णनम्, तच्छ्रवणेऽपि दोषः प्राग्वत् ॥१४॥ तथा-

**अरक्तद्विष्टता ॥१५॥२८४॥ इति ।**

१. शूना L. ॥

सर्वत्र प्रियकारिण्यरक्तेन अरागवता तदितरस्मिंश्चाद्विष्टेन अद्वेषवता भाव्यम्, यतः पठ्यते-

*रा[१]गद्वेषौ यदि स्यातां तपसा किं प्रयोजनम्? ॥१६५॥१५॥* [ ] इति । तथा -

**ग्लानादिप्रतिपत्तिः ॥१६॥२८५॥ इति ।**

ग्लानो ज्वरादिरोगातुरः, आदिशब्दाद् बाल-वृद्ध-बहुश्रुत-प्रा[२]घूर्णकादिग्रहः, तेषां प्रतिपत्तिः समुचितान्नपानादिसम्पादनरूपं वैया[३]वृत्त्यम्, महाफलत्वात्तस्य, पठ्यते च-

*पडिभग्गस्स मयस्स व नासइ चरणं सुअं अगुणणाए । नो वेयावच्च[४]चियं सुहोदयं नासई कम्मं ॥१६६॥*

[ओघनि० ५३५] तथा -

*जह भमर-महुअरिगणा निवयंती कुसुमियम्मि वणसंडे । इय होइ निवइयव्वं गेलण्णे क[५]इयवजढेण ॥१६७॥*

---

१. रागद्वेषौ यदि स्यातां तपसा किं प्रयोजनम्? । स्यातां चेद् राग-द्वेषौ न, तपसा किं प्रयोजनम्? ।।मु.॥ २. प्राघुणकादि L. ॥ ३. वैयावृत्यं L. ॥ ४. वच्चकियं L. ॥ ५. कईयव L. ॥

[निशीथ[१]भाष्ये २९७१] ॥१६॥ तथा-

**परोद्वेगाहेतुता ॥१७॥२८६॥ इति ।**

परेषामात्मव्यतिरिक्तानां स्वपक्षगतानां परपक्षगतानां च गृहस्थपाषण्डिरूपाणामुद्वेगस्य अप्रीतिरूपस्याऽहेतुता अहेतुभावः, यथोक्तम्-

*धम्मत्थमुज्जएणं सव्वस्सापत्तियं न कायव्वं। इय संजमोऽवि सेओ एत्थ य भयवं उदाहरणं ॥१६८॥*
*सो तावसासमाओ तेसिं अप्पत्तियं मुणेऊणं। परमं अबोहिबीअं तओ गओ हंतऽकाले वि ॥१६९॥*
*इय अन्नेण वि सम्मं सक्कं अप्पत्तियं सइ जणस्स। नियमा परिहरियव्वं इयरम्मि सतत्तचिंता उ ॥१७०॥*

[पञ्च०१११४-५-६ पञ्चा० ७।१४-१६]

इयरम्मि सतत्तचिंता उ इतरस्मिन् अशक्यप्रतीकारेऽप्रीतिके स्वतत्त्वस्य स्वापराधरूपस्य चिन्ता कार्या, यथा -

१. गाथेयं बृहत्कल्पभाष्येऽपि १८७३ ॥

*ममैवायं दोषो यदपरभवे नार्जितमहो, शुभं यस्माल्लोको भवति मयि¹ कुप्रीतिहृदयः।*

*अपापस्यैवं मे कथमपरथा मत्सरमयं, जनो याति स्वार्थं प्रति विमुखतामेत्य सहसा? ॥१७१॥* [ ]

एतदेवाह-

**भावतः प्रयत्नः ॥१८॥२८७॥ इति ।**

भावतः चित्तपरिणामलक्षणात् प्रयत्नः परोद्वेगाहेतुतायामुद्यमः कार्यः इति, अयमत्र भावः- यदि कथञ्चित् तथाविधप्रघट्टकवैषम्यात् कायतो वचनतो वा न परोद्वेगहेतुभावः परिहर्तुं पार्यते तदा भावतोऽरुचिलक्षणात् परोद्वेगं परिहर्तुं यत्नः कार्यः, भावस्यैव फलं प्रति अवन्ध्यहेतुत्वात्। उक्तं च-

*अभिसन्धेः फलं भिन्नमनुष्ठाने समेऽपि हि। परमोऽतः स एवेह वारीव कृषिकर्मणि ॥१७२॥* [योगदृष्टि ११८] इति ॥१८॥ तथा -

१. मयकि प्रीति L. ॥

**अशक्ये बहिश्चारः ॥१९॥२८८॥ इति ।**

अशक्ये कुतोऽपि वैगुण्यात् समाचरितुमपार्यमाणे तपोविशेषादौ क्वचिदनुष्ठाने बहिश्चारो बहिर्भावलक्षणः तस्मात् कार्यः, अशक्यं नारब्धव्यमित्यर्थः, अशक्यारम्भस्य क्लेशैकफलत्वेन साध्यसिद्धेरनङ्गत्वात् ॥१९॥ तथा-

**अस्थानाभाषणम् ॥२०॥२८९॥ इति ।**

अस्थाने भाषितोपयोगायोग्यत्वेनाप्रस्तावे अभाषणं कस्यचित् कार्यस्याभणनम्, एवमेव साधोर्भाषासमितत्वशुद्धिः स्यादिति ॥२०॥ तथा-

**स्खलितप्रतिपत्तिः ॥२१॥२९०॥ इति ।**

कुतोऽपि तथाविधप्रमाददोषात् स्खलितस्य क्वचिन्मूलगुणादावाचारविशेषे स्खलनस्य विराधनालक्षणस्य जातस्य प्रतिपत्तिः स्वतः परेण वा प्रेरितस्य सतोऽभ्युपगमः तत्रोदितप्रायश्चित्ताङ्गीकारेण कार्यः, स्खलितकालदोषाद् अनन्तगुणत्वेन दारुणपरिणामत्वात् तदप्रतिपत्तेः, अत एवोक्तम्-

*उप्पण्णा उप्पण्णा माया अणुमग्गओ निहंतव्वा। आलोअणनिंदणगरिहणाहि न पुणो वि बीयं ति* ॥१७३॥ [पञ्चव० ४६४]

*अणायारं परक्कम्म नेव गूहे न निण्हवे। सुई सया वियडभावे असंसत्ते जिइंदिए* ॥१७४॥ [दशवै० ८।३२] ॥२१॥ तथा-

**पारुष्यपरित्यागः ॥२२॥२९१॥ इति ।**

पारुष्यस्य तीव्रकोपकषायोदयविशेषात् [1]परुषभावलक्षणस्य तथाविधभाषणादेः स्वपक्ष-परपक्षाभ्यामसम्बन्धयोग्यताहेतोः परित्यागः कार्यः, अपारुष्यरूपवि[2]श्वासमूलत्वात् सर्वसिद्धीनाम्, यदुच्यते-

*सिद्धेर्विश्वासिता मूलं यद्यूथपतयो गजाः। सिंहो मृगाधिपत्येऽपि न मृगैरनुगम्यते* ॥१७५॥ ॥२२॥ इति ।

**सर्वत्रापिशुनता ॥२३॥२९२॥ इति ।**

१. परपरुष J. ॥ २. विश्वासहेतुत्वात् J. ॥

सर्वत्र स्वपक्षे परपक्षे च परोक्षं दोषाणामनाविष्करणम्, परदोषग्राहितायां हि आत्मैव दोषवान् कृतः स्यात्, पठ्यते च-

*लोओ परस्स दोसे हत्थाहत्थिं गुणे य गिण्हंतो । अ[1]प्पाणमप्पणो च्चिय कुणइ सदोसं च सगुणं च[2] ॥१७६॥*

[ ] ॥२३॥ तथा -

**विकथावर्जनम् ॥२४॥२९३॥ इति ।**

विकथानां स्त्री-भक्त-देश-राजगोचराणां स्वभावत एवाकुशलाशयसमुन्मीलननिबन्धनानां वर्जनम्, एतत्कथाकरणे हि कृष्णनीलाद्युपाधिरिव स्फटिकमणिरात्मा कथ्यमानस्त्र्यादिचेष्टानामनुरूपतां प्रतिपद्यते ॥२४॥ तथा-

**उपयोगप्रधानता ॥२५॥२९४॥ इति ।**

---

१. अप्पाण अप्पणा च्चिय J. ॥ ''स्वयमोऽर्थे अप्पणो न वा ॥२।२०९॥ स्वयमित्यस्यार्थे अप्पणो वा प्रयोक्तव्यम्'' इति हैमे स्वोपज्ञवृत्तिसहिते प्राकृतव्याकरणे ॥ २. लोकः परस्य दोषान् हस्ताहस्ति गुणांश्च गृह्णन्। आत्मानं स्वयमेव करोति सदोषं च सगुणं च ॥

उपयोगः प्रधानं पुरस्सरः सर्वकार्येषु यस्य स तथा, तस्य भावस्तत्ता विधेया, निरुपयोगानुष्ठानस्य द्रव्यानुष्ठानत्वात्, *अ[१]नुपयोगो द्रव्यम्* [ ] इति वचनात् ॥२५॥ तथा-

**निश्चितहितोक्तिः ॥२६॥२९५॥ इति ।**

निश्चितस्य संशय-विपर्यया-ऽनध्यवसायबोधदोषपरिहारेण निर्णीतस्य हितस्य च परिणामसुन्दरस्योक्तिः भाषणम्, अत एव पठ्यते-

*कुदृष्टं कुश्रुतं चैव कुज्ञातं कुपरीक्षितम् । कुभावजनकं सन्तो भाषन्ते न कदाचन ॥१७७॥* ॥२६॥

**प्रतिपन्नानुपेक्षा ॥२७॥२९६॥ इति ।**

प्रतिपन्नस्य अभ्युपगतस्य गुरुविनयस्वाध्यायादेः साधुसमाचारविशेषस्यानुपेक्षा अनवधीरणा, अवधीरितो हि समाचारो जन्मान्तरेऽपि दुर्लभः स्यात् ॥२७॥ तथा -

१. "अणुवओगो दव्वमिति कट्टु" इति अनुयोगद्वारसूत्रे, सू० १४,४८२,५६१॥

**असत्प्रलापाश्रुतिः ॥२८॥२९७॥ इति ।**

असतां ख[1]लप्रकृतीनां प्रलापा अनर्थकवचनरूपा असत्प्रलापास्तेषामश्रुतिरनवधारणम्, श्रुतिकार्यद्वेषाकरणेन अनुग्रहचिन्तनेन च, यथोक्तम्-

*निराकरिष्णुर्यदि नोपलभ्यते भविष्यति क्षान्तिरनाश्रया कथम्?।*
*यदाश्रयात् क्षान्तिफलं मयाऽऽप्यते स सत्कृतिं कामिव नाम नार्हति ॥१७८॥* [ ] ॥२८॥ तथा-

**अभिनिवेशत्यागः ॥२९॥२९८॥ इति ।**

अभिनिवेशस्य मिथ्याग्रहरू[2]पस्याऽप्रज्ञापनीयतामूलबीजस्य सर्वकार्येषु त्याग इति ॥२९॥ तथा-

**अनुचिताग्रहणम् ॥३०॥२९९॥ इति ।**

अनुचितस्य साधुजनाचारबाधाविधायितयाऽयोग्यस्य अशुद्धपिण्ड-शय्या-वस्त्रादेर्धर्मोपकरणस्य बाल-वृद्ध-

१. खलप्रतीतानां J. ॥ २. रूपतयाऽप्रज्ञा L. ॥

नपुंसकादेश्चाप्रव्राजनीयस्य अग्रहणमनुपादानं कार्यमिति । यथोक्तम्-

*पिंडं सेज्जं च वत्थं च चउत्थं पायमेव य। अकप्पियं न इच्छेज्जा पडिगाहेज्ज कप्पियं ॥१७९॥* [दशवै० ६।४७]

*अट्ठारस पुरिसेसुं वीसं इत्थीसु दस नपुंसेसु। पव्वावणाअणरिहा पन्नत्ता वीयरागेहिं ॥१८०॥* ते चामी-

*बाले[2] १ वुड्ढे २ नपुंसे ३ य[5] जड्डे ४ कीवे ५ य वाहिए ६। तेणे ७ रायावगारी ८ य उम्मत्ते ९ य*

---

१. "अट्ठारस पुरिसेसुं वीसं इत्थीसु दस नपुंसेसु। पव्वावणाअणरिहा इति अणला इत्तिया भणिया॥३५०५॥ बाले वुड्ढे णपुंसे य जड्डे कीवे य वाहिए। तेणे रायवकारी य उम्मत्ते य अदंसणे॥३५०६॥ दासे दुट्ठे य मूढे य अणत्ते जुंगिए इ य। ओबद्धए य भयए सेहणिप्फेडिया इ य॥३५०७॥ गुव्विणी बालवच्छा य पव्वावेउं ण कप्पती। एएसिं तु परूवणा कायव्वा दुपयसंजुत्ता। ३५०८॥....पंडए वातिए कीवे कुंभी इस्सालुए त्ति य। सउणी तक्कम्मसेवी य पक्खियापक्खिते त्ति य ॥३५६१॥ सोगंधिए य आसित्ते वद्धिए चिप्पिते ति य। मंतोसहि उवहते इसिसत्ते देवसत्ते य॥३५६२॥" इति निशीथभाष्ये एकादशे उद्देशके॥ अट्ठारस पुरिसेसुं वीसं इत्थीसु दस नपुंसेसुं पव्वावणाअणरिहा तह वियलंगस्सरुवा य।२५॥ इति प्रवचनसारोद्धारे॥ २. बाले वुड्ढे....॥७९०॥ दासे दुट्ठे य...सेहनिप्फेडिया इ य ॥७९१॥ इति प्रवचनसारोद्धारे ॥५.य कीवे जड्डे य वाहिए L.॥

*अदंसणे ॥१८१॥*

*दासे ११ कुट्ठे १२ य मूढे १३ य अणत्ते १४ जुंगिए १५ इ य। ओबद्धए १६ य भयगे १७ सेहनिप्फेडिया १८ इ य ॥१८२॥*

*गुव्विणा बालवच्छा य पव्वावेउं न कप्पइ ॥१८३॥* [निशीथ०] त्ति ॥ तथा-

*पंडे १ कीवे २ वाइय ३ कुंभी ४ ईसालु ५ सउणी य ६। तक्कम्मसेवि ७ पक्खियमपक्खिए ८ तह सुगंधि ९ आसित्ते १० ॥१८४॥* [निशीथ०] त्ति ।

एतत्स्वरूपं च निशीथाध्ययनात् ज्ञातव्यम् ॥३०॥ तथा-

**उचिते अनुज्ञापना ॥३१॥३००॥ इति ।**

१. पंडए १ वाइए २ कीवे ३ कुंभी ४ ईसालु य त्ति य ५। सउणी ६ तक्कम्मसेवी य ७ पक्खियापक्खिए इ य ॥७९३॥ सोगंधिए य ९ आसत्ते १० दस एते नपुंसगा। संकिलिट्ठ त्ति काउणं पव्वावेउं अकप्पिया॥७९४॥ इति प्रवचनसारोद्धारे॥

उचिते अनुचितविलक्षणे पिण्डादौ अनुज्ञापना अनुजानतोऽनुमन्यमानस्य स्वयमेव गु[१]रोस्तद्द्रव्यस्वामिनो वा प्रयोजनम्, यथा-अनुजानीत यूयं मम ग्रहीतुमेतदिति, अन्यथा अदत्तादानप्रसङ्गाद् ॥३१॥ तथा-

**निमित्तोपयोगः ॥३२॥३०१॥ इति ।**

निमित्ते उचिताहारादेर्ग्रहीतुमभिलषितस्य शुद्ध्यशुद्धिसूचके शकुने उ[२]पयोगकारणे साधुजनप्रसिद्धे, प्रवृत्ते सति इतिगम्यते, उपयोग आभोगः कार्यः, अत्र च निमित्ताशुद्धौ चैत्यवन्दनादिकुशलक्रियापूर्वकं निमित्तान्तरमन्वेषणीयम्, एवं यदा त्रीन् वारान् निमित्तशुद्धिर्न स्यात् तदा तद्दिने न तेन किञ्चिद् ग्राह्यम्, यदि परमन्यानीतं भोक्तव्यमिति ॥३२॥ निमित्तशुद्धावपि

**अयोग्येऽग्रहणम् ॥३३॥३०२॥ इति ।**

अयोग्ये उपकाराकारकत्वेनानुचिते पिण्डादावग्रहणम् अनुपादानं कार्यमिति ॥३३॥ तथा-

१. गुरोर्द्रव्य L.॥ २. उपयोगकरणे L. ॥

**अन्ययोग्यस्य ग्रहः ॥३४॥३०३॥ इति ।**

अन्यस्य आत्मव्यतिरिक्तस्य गुरु-ग्लान-बालादेर्यद् योग्यमुपष्टम्भकत्वेनोचितं तस्य ग्रहो विधेय इति ॥३४॥ एवं च गृहीतस्य किं कार्यमित्याह-

**गुरोर्निवेदनम् ॥३५॥३०४॥ इति ।**

हस्तशताद् बहिर्गृहीतस्येर्याप्रतिक्रमण-गमना-ऽऽगमना-लोचनापूर्वकं हस्तशतमध्ये तु एवमेव गुरोर्निवेदनं दायकहस्तमात्रव्यापारप्रकाशनेन लब्धस्य ज्ञापनं समर्पणं च कार्यमिति ॥३५॥ अत एव-

**स्वयमदानम् ॥३६॥३०५॥ इति ।**

स्वयम् आत्मनाऽदानं लब्धस्यान्यस्मै अवितरणम्, गुर्वायत्तीकृतत्वात् तस्य ॥३६॥

ततो यदि गुरुः स्वयमेव कस्मैचित् बालादिकाय किञ्चिद् दद्यात् तत् सुन्दरमेव, अथ कुतोऽपि व्यग्रतया न स्वयं ददाति किन्तु तेनैव दापयति तदा-

**तदाज्ञया प्रवृत्तिः ॥३७॥३०६॥ इति ।**

तस्य गुरोराज्ञया निरोधेन प्रवृत्तिर्दाने कार्या ॥३७॥ तत्र च-

**उचितच्छन्दनम् ॥३८॥३०७॥ इति ।**

उचितस्य समान[1]सम्भोगस्य बालादेः साधोः, न पुनरन्यस्य, तं प्रति दानानधिका[2]रितत्वात्तस्य, छन्दनं छन्दस्य अभिलाषस्य अन्नादिग्रहणं प्रत्युत्पादनं कार्यम्[3] ॥३८॥ ततो दत्तावशिष्टस्यान्नादेः

**धर्मायोपभोगः ॥३९॥३०८॥ इति ।**

धर्माय धर्माधारशरीरसन्धारणद्वारेण धर्मार्थमेव च, न पुनः शरीरवर्ण-बलाद्यर्थमपि, उपभोग उपजीवनम्, तथा चार्षम् -

*वेयण १ वेयावच्चे २ इरियट्ठाए ३ य संयमट्ठाए ४। तह पाणवत्तियाए ५ छट्ठं पुण धम्मचिंताए ६ ॥१८५॥*

१. सम्भोग्यबालादेः L. २. कारितत्वात् इति पाठो यद्यपि हस्तलिखितादर्शेषूपलभ्यते तथापि कारित्वात् इत्यपि पाठोऽत्र कदाचित् सम्भाव्येत॥ ३. इतः पुनः K. प्रतेरारम्भः ॥

[उत्तरा० २६।३३] ॥३९॥ तथा -

**विविक्तवसतिसेवा ॥४०॥३०९॥ इति ।**

विविक्तायाः स्त्री-पशु-पण्डकविवर्जिताया वसतेराश्रयस्य सेवा परिभोगो विधेयः, अविविक्तायां हि वसतौ व्रतिनां ब्रह्मचर्यव्रतविलोपप्रसङ्ग इति ॥४०॥ अत एव ब्रह्मचर्य-व्रतपरिपालनाय एतच्छेषगुप्तीरभिधातुं 'स्त्रीकथा-परिहारः' इत्यादि 'विभूषापरिवर्जनम्' इतिपर्यन्तं सूत्राष्टकमाह । तत्र -

**स्त्रीकथापरिहारः ॥४१॥३१०॥ इति ।**

स्त्रीणां कथा स्त्रीकथा, सा च चतुर्विधा-जाति १ कुल २ रूप ३ नेपथ्य ४ भेदात्, तत्र जातिर्ब्राह्मणादिका, तत्कथा यथा-

*धिक् ब्राह्मणीर्धवाभावे या जीवन्ति मृता इव । धन्याः शूद्रीर्जने मन्ये पतिलक्षेऽप्यनिन्दिताः ॥१८६॥*

१. गाथेयम् ओघनिर्युक्तौ ५८०, पिण्डनिर्युक्तौ ६२, पञ्चवस्तुके ३६५ चाप्युपलभ्यते ॥

कुलं चौलुक्य-चाहुमानादि, तत्कथा -

*अहो चौलुक्यपुत्रीणां साहसं जगतोऽधिकम् । विशन्त्यग्नौ मृते पत्यौ याः प्रेमरहिता अपि ॥१८७॥* [ ]

रूपं शरीराकारः, तत्कथा-

*अहो अन्ध्रपुरन्ध्रीणां रूपं जगति वर्ण्यते । यत्र यूनां दृशो लग्ना न मन्यन्ते परिश्रमम् ॥१८८॥* [ ]

नेपथ्यं वस्त्रादिवेषग्रहः, तत्कथा -

*धिग् नारीरौदीच्या बहुवस्त्राच्छादिताङ्गलतिकत्वात् । यद्यौवनं न यूनां चक्षुर्मोदाय भवति सदा ॥१८९॥*

तस्याः परिहार इति ॥४१॥

**निषद्यानुपवेशनम् ॥४२॥३११॥ इति ।**

निषद्यायां स्त्रीनिवेशस्थाने पट्ट-पीठादौ मुहूर्तं यावत् स्त्रीषूत्थितास्वपि अनुपवेशनं कार्यम्, सद्य एव स्त्रीनिषद्योपवेशने साधोस्तच्छरीरसंयोगसङ्क्रान्तोष्मस्पर्शवशेन मनोविश्रोतसिकादोषसम्भवात् ॥४२॥

**इन्द्रियाप्रयोगः ॥४३॥३१२॥ इति ।**

इन्द्रियाणां चक्षुरादीनां कथञ्चिद् विषयभावापन्नेष्वपि गुह्योरु-वदन-कक्षा-स्तनादिषु स्त्रीशरीरावयवेषु अप्रयोगोऽव्यापारणं कार्यम्, पु[१]नस्तन्निरीक्ष[२]णाद्यर्थं न यत्नः कार्यः ॥४३॥

**कुड्यान्तरदाम्पत्यवर्जनम् ॥४४॥३१३॥ इति ।**

कुड्यं भित्तिस्तदन्तरं व्यवधानं यस्य तत् तथा, दाम्पत्यं दयितापतिलक्षणं युगलम्, कुड्यान्तरं च तद् दाम्पत्यं चेति समासः, तस्य वर्जनम्, वसतौ स्वाध्यायस्थानादौ च न तत्र स्थातव्यं यत्र कुड्यान्तरं दाम्पत्यं भवतीति ॥४४॥

**पूर्वक्रीडितास्मृतिः ॥४५॥३१४॥ इति ।**

पूर्वं प्रव्रज्याप्रतिपत्तिकालात् प्राक् क्रीडितानां प्रौढप्रमोदप्रदप्रमदाप्रसङ्गप्रभृतिविलसितानामस्मृतिरस्मरणम्, अयं च भुक्तभोगान् प्रत्युपदेश इति ॥४५॥

---

१. न पुनस्तन्निरीक्षणाय प्रयत्नः कार्यः K.॥२. क्षणार्थं न L. ॥

**प्रणीताभोजनम् ॥४६॥३१५॥ इति ।**

प्रणीतस्य अतिस्निग्धस्य गलत्स्नेहबिन्दुलक्षणस्याहारस्याभोजनम् अनुपजीवनमिति ॥४६॥

**अतिमात्राभोगः ॥४७॥३१६॥ इति ।**

अप्रणीतस्याप्याहारस्यातिमात्रस्य द्वात्रिंशत्कवलादिशास्त्रसिद्धप्रमाणातिक्रान्तस्याभोगोऽभोजनम् ॥४७॥

**विभूषापरिवर्जनम् ॥४८॥३१७॥ इति ।**

विभूषायाः शरीरोपकरणयोः शृङ्गारलक्षणायाः परिवर्जनमिति । एतेषां च स्त्रीकथादीनां नवानामपि भावानां मोहोद्रेकहेतुत्वाद् निषेधः कृत इति ॥४८॥ तथा-

**तत्त्वाभिनिवेशः॥४९॥३१८॥ इति ।**

तत्त्वे सम्यग्दर्शन-ज्ञान-चारित्रानुसारिणि क्रियाकलापे अभिनिवेशः शक्यकोटिमागते कर्तुमत्यन्तादरपरता, अन्यथा तु मनःप्रतिबन्ध एव कार्यः ॥४९॥ तथा -

**युक्तोपधिधारणा ॥५०॥३१९॥ इति ।**

युक्तस्य शास्त्रप्रसिद्धप्रमाणसमन्वितस्य लोकपरिवादाविषयस्य स्वपरयो रागानुत्पादकस्य उपधे र्वस्त्रपात्रादिलक्षणस्य धारणा उपभोगः, उपलक्षणत्वात् परिभोगश्च गृह्यते, यथोक्तम्-

*धा[१]रणया उवभोगो प[२]रिहरणा होइ परिभोगो ॥१९०॥* [बृहत्कल्पभाष्ये २३६७/२३७२] ॥५०॥ तथा-

**मूर्च्छात्यागः ॥५१॥३२०॥ इति ।**

मूर्च्छाया अभिष्वङ्गस्य सर्वत्र बाह्येऽर्थेऽभ्यन्तरे च शरीरबलादौ वर्जनम् ॥५१॥ तथा-

**अप्रतिबद्धविहरणम् ॥५२॥३२१॥ इति ।**

अप्रतिबद्धेन देश-ग्राम-कुलादावमूर्च्छितेन विहरणं विहारः कार्यः ॥५२॥ तथा-

**परकृतबिलवासः ॥५३॥३२२॥ इति ।**

१. धारणता उपभोगः परिहरणा भवति परिभोगः ॥ २. परिहरिणा मु. विना सर्वेषु हस्तलिखितादर्शेषु ॥

परैरात्मव्यतिरिक्तैः कृते स्वार्थमेव निष्पादिते बिल इव बिले असंस्करणीयतया उपाश्रये वासः ॥५३॥ तथा-

**अवग्रहशुद्धिः ॥५४॥३२३॥ इति ।**

अवग्रहाणां देवेन्द्र-राज-गृहपति-शय्यातर-साधर्मिकाभाव्य-भूभागलक्षणानां शुद्धिस्तदनुज्ञया परिभोगलक्षणा कार्या ॥५४॥

**मासादिकल्पः॥५५॥३२४॥ इति ।**

मासः प्रतीतरूप एव, आदिशब्दाच्चतुर्मासी गृह्यते, ततो मासकल्पश्चतुर्मासीकल्पश्च कार्यः ॥५५॥

यदा तु दुर्भिक्ष-क्षितिपतिविग्रह-जङ्घाबलक्षयादिभिर्निमित्तैः क्षेत्रविभागेन मासादिकल्पः कर्त्तुं न पार्यते तदा किं कर्त्तव्यमित्याह-

**एकत्रैव तत्क्रिया ॥५६॥३२५॥ इति ।**

एकस्मिन्नेव मासकल्पादियोग्ये क्षेत्रे वसत्यन्तरविभागेन वीथ्यन्तरविभागेन च सर्वथा निरवकाशतायां संस्तारकभूमिपरिवर्त्तेन तत्क्रिया मासादिकल्पक्रियेति, अत एव पठ्यते-

*संथा[१]रपरावत्तं अभिग्गहं चेव चित्तरूवं तु । एत्तो चरित्तिणो इह विहार-पडिमाइसु करंति ॥१९१॥*

[ ] ॥५६॥ तत्र च-

**सर्वत्राममत्वम् ॥५७॥३२६॥ इति ।**

सर्वत्र पीठफलकादौ नित्यवासोपयोगिनि अन्यस्मिंश्चाममत्वम् अममीकार इति ॥५७॥ तथा-

**निदानपरिहारः ॥५८॥३२७॥ इति ।**

नितरां दीयते लूयते सम्यग्दर्शनप्रपञ्चबहलमूलजालो ज्ञानादिविषयविशुद्धविनयविधिसमुद्धुरस्कन्धबन्धो विहितावदातदानादिभेदशाखोपशाखाखचितो निरतिशयसुरनरभव-प्रभवसुखसम्पत्तिप्रसूनाकीर्णोऽनभ्यर्णीकृतनिखिल-

१. संस्तारकपरावर्तम् अभिग्रहं चैव चित्ररूपं तु। इतः चारित्रिण इह विहारप्रतिमादिषु कुर्वन्ति॥

व्यसनव्यालकुलशिवालयशर्मफलोल्बणो धर्मकल्पतरुरनेन सुरर्द्ध्याद्याशंसनपरिणामपरशुनेति निदानं तस्य परिहारः, अत्यन्तदारुणपरिणामत्वात् तस्य, यथोक्तम्-

*यः पालयित्वा चरणं विशुद्धं करोति भोगादिनिदानमज्ञः । ही वर्द्धयित्वा फलदानदक्षं स नन्दनं भस्मयते वराकः॥१८८॥* [ ] इति ॥५८॥ तर्हि किं कर्त्तव्यमित्याह -

**विहितमिति प्रवृत्तिः ॥५९॥३२८॥ इति ।**

विहितं कर्त्तव्यतया भगवता निरूपितमेतदिति एवं सर्वत्र धर्मकार्ये प्रवृत्तिः ॥५९॥ तथा-

**विधिना स्वाध्याययोगः ॥६०॥३२९॥ इति ।**

विधिना कालविनयाद्याराधनरूपेण स्वाध्यायस्य वाचनादेर्योगो व्यापारणमिति ॥६०॥ तथा-

**आवश्यकापरिहाणिः ॥६१॥३३०॥ इति ।**

आवश्यकानां स्वकाले नियमात् कर्त्तव्यविशेषाणां प्रत्युपेक्षणामदीनापरिहाणिरभ्रंशः, इदं च प्रधानं

साधुलिङ्गम्, तथा च दशवैकालिकनिर्युक्तिः-

*संवेगो निव्वेओ विसयविवेगो सुसीलसंसग्गी। आराहणा तवो नाणदंसणचरित्तविणओ य ॥१९२॥*

*खंती य मद्दवऽज्जव विमुत्तयाऽदीणया तितिक्खा य। आवस्सगपरिसुद्धी य भिक्खुलिंगाइं एयाइं ॥१९३॥*

[दश. नि. ३४८-३४९] तथा-

**यथाशक्ति तपःसेवनम् ॥६२॥३३१॥ इति ।**

यथाशक्ति तपसोऽनशनादेः सेवनमाचरणम्, यथोक्तम्-

*कायो न केवलमयं परितापनीयो मिष्टै रसैर्बहुविधैर्न च लालनीयः ।*

*चित्तेन्द्रियाणि न चरन्ति यथोत्पथेन वश्यानि येन च तदाचरितं जिनानाम् ॥१९४॥* ॥६२॥ तथा-

**परानुग्रहक्रिया ॥६३॥३३२॥ इति ।**

परेषां स्वपक्षगतानां परपक्षगतानां च जन्तूनां महत्या करुणापरायणपरिणामितया अनुग्रहकरणं ज्ञानाद्युपकार-

सम्पादनमिति ॥६३॥ तथा-

**गुणदोषनिरूपणम् ॥६४॥३३३॥ इति ।**

सर्वत्र विहारादौ कर्त्तव्ये गुणदोषयोर्निरूपणं कार्यम् ॥६४॥ तथा-

**बहुगुणे प्रवृत्तिः ॥६५॥३३४॥ इति ।**

यद् बहुगुणमुपलक्षणत्वात् केवलगुणमयं वा कार्यमाभासते तत्र प्रवर्त्तितव्यम्, नान्यथेति ॥६५॥ तथा-

**क्षान्तिर्मार्दवमार्जवमलोभता ॥६६॥३३५॥ इति ।**

एते क्षान्त्यादयश्चत्वारोऽपि कषायचतुष्टयप्रतिपक्षभूताः साधुधर्ममूलभूमिकास्वरूपा नित्यं कार्या इति ॥६६॥ अत एव-

**क्रोधाद्यनुदयः ॥६७॥३३६॥ इति ।**

क्रोधादीनां चतुर्णां कषायाणामनुदयो मूलत एवानुत्थानम् ॥६७॥ तथा-

**वैफल्यकरणम् ॥६८॥३३७॥ इति ।**

वैफल्यस्य विफलभावस्य कथञ्चिदुदयप्राप्तानामपि क्रोधादीनां करणम्, क्रोधादीनामुदये यच्चिन्तितं कार्यं तस्याकरणेन क्रोधाद्युदयो निष्फलः कार्य इति भावः, एवं च कृते पूर्वोक्ताः क्षान्त्यादय आसेविता भवन्ति ॥६८॥ क्रोधाद्यनुदयार्थिना च यत् कार्यं तदाह-

**विपाकचिन्ता ॥६९॥३३८॥ इति ।**

विपाकस्य क्रोधादिकषायफलस्य चिन्ता विमर्शो विधेयः, यथा-

*क्रोधात् प्रीतिविनाशं मानाद् विनयोपघातमाप्नोति । शाठ्यात् प्रत्ययहानिं सर्वगुणविनाशनं लोभात् ॥१९५॥*

[प्रशम. २५] इति ॥६९॥ तथा -

**धर्मोत्तरो योगः ॥७०॥३३९॥ इति ।**

धर्मोत्तरो धर्मफलः सर्व एव योगो व्यापारो विधेयः, न पुनरट्टट्टहास-केलिकिलत्वादिः पापफल इति ॥७०॥

तथा-

**आत्मानुप्रेक्षा ॥७१॥३४०॥ इति ।**

आत्मनः स्वस्य अनुप्रेक्षा पर्यालोचना भावप्रत्युपेक्षारूपा, यथा-

*किं कयं किं वा सेसं किं करणिज्जं तं[१]वं च न करेमि । पुव्वावरत्तकाले जागरओ भावपडिलेहा ॥१९६॥*

[ओघ नि० २६३] त्ति । एवमात्मन्यनुप्रेक्षिते यत् कृत्यं तदाह-

**उचितप्रतिपत्तिः ॥७२॥३४१॥ इति ।**

उचितस्य गुणबृंहकस्य प्रमादनिग्राहिणश्चानुष्ठानस्य प्रतिपत्तिरभ्युपगम इति ॥७२॥ तथा-

**प्रतिपक्षासेवनम् ॥७३॥३४२॥ इति ।**

यो हि यदा येन दोषेण बाध्यमानो भवति तेन तदा तत्प्रतिपक्षभूतस्य गुणस्यासेवनं कार्यम्, हिमपातपीडितेन-

---

१. तयं च न J. ॥

वाग्नेरिति ॥७३॥ तथा-

**आज्ञानुस्मृतिः ॥७४॥३४३॥ इति ।**

आज्ञाया भगवद्वचनस्य पदे पदे हृदयेऽनुस्मृतिः कार्या, भगवद्वचनानुस्मरणस्य भगवत्स्मरणरूपत्वेन महागुणत्वात्, यदुक्तम्-

*अस्मिन् हृदयस्थे सति हृदयस्थस्तत्त्वतो मुनीन्द्र इति। हृदयस्थिते च तस्मिन् नियमात् सर्वार्थसंसिद्धिः ॥१९७॥* [षोड० २।१४] इति। तथा-

**समशत्रुमित्रता ॥७५॥३४४॥ इति ।**

शत्रौ मित्रे च समानपरिणामता, एको हि तत्र निर्भर्त्सनादिभिरन्यस्तु स्तुतिवन्दनादिभिः स्वचित्तसन्तोषं घटयन्तौ मां निमित्तमात्रमवलम्ब्य प्रवृत्तौ द्वावपि, न तु मत्कार्यं किञ्चनेति, ततः कोऽनयोरूनोऽधिको वा ममेति भावनया ॥७५॥ तथा -

**परीषहजयः ॥७६॥३४५॥ इति ।**

परीषहाणां क्षुत्पिपासादीनां द्वाविंशतेरपि जयोऽभिभवः, तत्र दर्शनपरीषहस्य मार्गाच्यवनार्थं शेषाणां च कर्मनिर्जरार्थं कार्य इति, यथोक्तम्- *मार्गाच्यवन-निर्जरार्थं परिषोढव्याः परीषहाः* [तत्त्वा० ९।८] इति ॥७६॥ तथा-

**उपसर्गातिसहनम् ॥७७॥३४६॥ इति ।**

उपसृज्यन्ते पीडापरिगतैर्वेद्यन्ते ये ते उपसर्गाः, ते च दिव्य-मानुष-तैरश्चा-ऽऽत्मसंवेदनीयभेदाच्चतुर्धा, तेषामतिसहनमभिभवनम्, अन्यथा व्यसनमयत्वेन संसारस्य तेषामनतिसहने मूढमतित्वप्रसङ्गात्, यथोक्तम्

*संसारवर्त्यपि समुद्विजते विपद्भ्यो यो नाम मूढमनसां प्रथमः स नूनम्।*
*अम्भोनिधौ निपतितेन शरीरभाजा संसृज्यतां किमपरं सलिलं विहाय ॥१९८॥* [ ] इति। तथा-

**सर्वथा भयत्यागः ॥७८॥३४७॥ इति ।**

सर्वथा सर्वैःप्रकारैरिहलोकपरलोकभयादिभिर्भयस्य भीतेस्त्यागः परिहारः, निरतिचारयतिसमाचारवशोपलब्ध-

समुत्कृष्टोपष्टम्भतया मृत्योरपि नोद्वेजितव्यम्, किं पुनरन्यभयस्थानेभ्य इति, अत एवोक्तमन्यत्र-

*प्रायेणाकृतकृत्यत्वान्मृत्योरुद्विजते जनः । कृतकृत्याः प्रतीक्षन्ते मृत्युं प्रियमिवातिथिम् ॥१९९॥* [ ] ॥७८॥

तथा-

**तुल्याश्म-काञ्चनता ॥७९॥३४८॥ इति ।**

तुल्ये समाने अभिष्वङ्गाविषयतया अश्म-काञ्चने उपल-सुवर्णे यस्य स तथा, तद्भावस्तत्ता ॥७९॥ तथा-

**अभिग्रहग्रहणम् ॥८०॥ ३४९॥ इति ।**

अभिग्रहाणां द्रव्य-क्षेत्र-काल-भावभेदभिन्नानाम्

*लेवडमलेवडं वा अमुगं दव्वं च अज्ज घेच्छामि । अमुगेण व दव्वेण व अह दव्वाभिग्गहो एस ॥२००॥* [पञ्च० २९८]

इत्यादिशास्त्रसिद्धानां ग्रहणमभ्युपगमः कार्यः ॥८०॥ तथा-

**विधिवत् पालनम् ॥८१॥३५०॥ इति ।**

विधिवद् विधियुक्तं यथा भवति, पालनमभिग्रहाणामिति ॥८१॥ तथा-

**यथार्हं ध्यानयोगः ॥८२॥३५१॥ इति ।**

यथार्हं यो यस्य योग्यस्तदनतिक्रमेण ध्यानयोगो ध्यानयोर्धर्म(र्म्य)शुक्ललक्षणयोर्योगः, अथवा यथार्हमिति यो देशः कालो वा ध्यानस्य योग्यस्तदनुल्लङ्घनेनेति ॥८२॥ तथा-

**अन्ते संलेखना ॥८३॥३५२॥ इति ।**

अन्ते आयुःपर्यन्ते विज्ञाते सति संलेखना शरीर-कषाययोस्तपोविशेष-भावनाभ्यां कृशीकरणम् ॥८३॥ परमत्र-

**संहननाद्यपेक्षणम् ॥८४॥३५३॥ इति ।**

संहननस्य शरीरसामर्थ्यलक्षणस्य आदिशब्दात् चित्तवृत्तेः सहायसम्पत्तेश्च अपेक्षणम् आश्रयणं कार्यम्,

संहननाद्यपेक्ष्य संलेखना विधेयेति भाव इति ॥८४॥ नन्वनयोर्द्रव्यसंलेखना-भावसंलेखनयोः काऽत्यन्तमादरणीयेत्याह-

**भावसंलेखनायां यत्नः ॥८५॥३५४॥ इति ।**

भावसंलेखनायां कषायेन्द्रियविकारतुच्छीकरणरूपायां यत्न आदरः कार्यः, द्रव्यसंलेखनाया अपि भावसंलेखनार्थमुपदेशात्, अयमत्र भावः- इह मुमुक्षुणा भिक्षुणा प्रत्यहं मरणकालपरिज्ञानयत्नपरेण स्थेयम्, मरणकालपरिज्ञानोपायाश्च आगम-देवतावचन-सुप्रतिभा-तथाविधानिष्टस्वप्नदर्शनादयोऽनेके शास्त्र-लोकप्रसिद्धा इति, ततो विज्ञाते मरणकाले पूर्वमेव द्वादश वर्षाणि यावदुत्सर्गतः संलेखना कार्या, तत्र च-

*चत्तारि विचित्ताइं विगईनिज्जूहियाइं चत्तारि । संवच्छरे य दोण्णि उ एगंतरियं च आयामं ॥२०१॥*

*नाइविगिट्ठो य तवो छम्मासे परिमियं च आयामं । अन्ने वि य छम्मासे होइ विगिट्ठं तवोकम्मं ॥२०२॥*

*वासं कोडीसहियं आयामं काउमाणुपुव्वीए । गिरिकंदरं तु गंतुं पायवगमणं अह करेइ ॥२०३॥* [पञ्चा० १५७४-५-६]

यदा तु कुतोऽपि संहननादिवैगुण्यान्न शक्यते इयान् संलेखनाकालः साधयितुं तदा मासवर्षपरिहाण्या जघन्यतोऽपि षण्मासान् यावत् संलेखना कार्या, असंलिखितशरीरकषायो हि भिक्षुरनशनमधिष्ठितः सहसा धातुक्षये समुपस्थिते न सुगतिफलं तथाविधं समाधिमाराधयितुं साधीयान् स्यादिति ॥८५॥ तथा-

**विशुद्धं ब्रह्मचर्यम् ॥८६॥३५५॥ इति ।**

विशेषेण अतिनिबिडब्रह्मचर्यगुप्तिविधानरूपेण शुद्धं ब्रह्मचर्यं प्रतीतमेव विधेयम्, यदत्र संलेखनाधिकारे विशुद्धब्रह्मचर्योपदेशनं तद्वेदोदयस्य क्षीणशरीरतायामपि अत्यन्तदुर्धरत्वख्यापनार्थमिति ॥८६॥

अथ संलेखनानन्तरमाशुघातके वा विष-विशूचिकादौ दोषे सति यद्विधेयं तदाह -

**विधिना देहत्याग इति ॥८७॥३५६॥ इति ।**

विधिना आलोचन-व्रतोच्चार-परक्षामणा-ऽनशन-शुभभावना-पञ्चपरमेष्ठिस्मरणलक्षणेन देहस्य त्यागः परित्यजनम्, पण्डितमरणाराधनमित्यर्थः, इतिशब्दः परिसमाप्तौ, इत्युक्तः सापेक्षयतिधर्मः ॥८७॥ अथ

द्वितीयधर्मप्रस्तावनायाह-

**निरपेक्षयतिधर्मस्तु ॥८८॥३५७॥ इति ।**

निरपेक्षयतीनां धर्मः पुनरयं वक्ष्यमाणः ॥८८॥ तमेवाह-

**वचनगुरुता ॥८९॥३५८॥ इति॥**

वचनमेव आगम एव गुरुः सर्वप्रवृत्तौ निवृत्तौ चोपदेशकत्वेन यस्य स तथा, तद्भावस्तत्ता ॥८९॥ तथा-

**अल्पोपधित्वम् ॥९०॥३५९॥ इति ।**

अल्पः स्थविरापेक्षया उपधिर्वस्त्रपात्रादिरूपो यस्य स तथा, तद्भावस्तत्त्वम्, उपधिप्रमाणं च विशेषशास्त्रादवसेयम् ॥९०॥ तथा-

**निष्प्रतिकर्मशरीरता ॥९१॥३६०॥ इति ।**

निष्प्रतिकर्म तथाविधग्लानाद्यवस्थायामपि प्रतीकारविरहितं शरीरं यस्य स तथा, तद्भावस्तत्त्वम् ॥९१॥ अत

एव-

**अपवादत्यागः ॥९२॥३६१॥ इति ।**

अपवादस्य उत्सर्गापेक्षयाऽपकृष्टवादस्य त्यागः कार्यः, न हि निरपेक्षो यतिः सापेक्षयतिरिव उत्सर्गासिद्धावपवादमपि समालम्ब्य अल्पदोषं बहुगुणं च कार्यमारभते किन्तूत्सर्गपथप्राप्तं केवलगुणमयमेवेति ॥९२॥

तथा-

**ग्रामैकरात्रादिविहरणम् ॥९३॥३६२॥ इति ।**

ग्रामे प्रतीतरूपे उपलक्षणत्वान्नगरादौ च एका चासौ रात्रिश्चेत्येकरात्रः, आदिशब्दाद् द्विरात्रस्य मासकल्पस्य च ग्रहः, तेन विहरणम्, किमुक्तं भवति ? यदा प्रतिमाकल्परूपो निरपेक्षो यतिधर्मः प्रतिपन्नो भवति तदा ऋतुबद्धे काले ग्रामे ज्ञातः सन् स एकरात्रम् अज्ञातश्च एकरात्रं द्विरात्रं वा वसति, यथोक्तम्- *नाँ[1] एगरायवासी एगं व दुगं व अन्नाए ।*

१. ज्ञाते एकरात्रवासी एकं वा द्विकं वा अज्ञाते ॥

[पञ्चा० १८।८] जिनकल्पिक - यथालन्दकल्पिक - शुद्धपरिहारिका ज्ञाता अज्ञाताश्च मासमिति ॥९३॥ तथा-

**नियतकालचरिता ॥९४॥३६३॥ इति।**

नियते तृतीयपौरुषीलक्षणे काले भिक्षाद्यर्थं सञ्चरणम्, यथोक्तम्-*भि[1]क्खा पंथो य तइयाए* ॥२०४॥ [बृहत्कल्पभाष्ये गा० १४१४,१४३०] इति। तथा-

**प्राय ऊ[2]र्ध्वस्थानम् ॥९५॥३६४॥ इति।**

प्रायो बाहुल्येन ऊर्ध्वस्थानं कायोत्सर्गः ॥९५॥ तथा-

**देशनायामप्रबन्धः ॥९६॥३६५॥ इति।**

देशनायां धर्मकथारूपायां धर्मं श्रोतुमुपस्थितेष्वपि तथाविधप्राणिषु अप्रबन्धोऽभूरिभावः, ए[3]गवयणं दुवयणं

१. भिक्षा पन्थाश्च तृतीयस्याम् ॥ २. उर्द्धं स्थानं J ॥३. एकवचनं द्विवचनं वा (?च)॥

वा[1] [ ] इति वचनप्रामाण्यात् ॥९६॥ तथा-

**सदाऽप्रमत्तता ॥९७॥३६६॥ इति ।**

सदा दिवा रात्रौ चाप्रमत्तता निद्रादिप्रमादपरिहारः॥९७॥ तथा -

**ध्यानैकतानत्वमिति ॥९८॥३६७॥ इति ।**

ध्याने धर्मध्यानादावेक एव तानः चित्तप्रसर्पणरूपो यस्य स तथा, तद्भावस्तत्त्वम्, इतिशब्दः समाप्तौ ॥

अथोपसञ्जिहीर्षुराह-

**सम्यग् यतित्वमाराध्य महात्मानो यथोदितम् । सम्प्राप्नुवन्ति कल्याणमिहलोके परत्र च ॥२८॥ इति ।**

सम्यग् यतित्वमुक्तरूपमाराध्य समासेव्य महात्मनो जना यथोदितं यथा शास्त्रे निरूपितम्, किमित्याह-

१. अत्र 'वेति वचन' इति पाठ उपलभ्यते हस्तलिखितादर्शेषु। अत्र चेति इत्यपि पठितुं शक्यते, ततः 'च' () इति पाठोऽप्यत्र स्यात् ।

सम्प्राप्नुवन्ति लभन्ते कल्याणं भद्रम्, क्वेत्याह- इहलोके परत्र चेति प्रतीतरूपमेव ॥१॥ एतदेव विवरीषुराह-

**क्षीराश्रवादिलब्ध्योघमासाद्य परमाक्षयम् । कुर्वन्ति भव्यसत्त्वानामुपकारमनुत्तमम् ॥२९॥ इति ।**

क्षीरं दुग्धं श्रोतृजनकर्णपुटेषु आश्रवति क्षरति भाषमाणो यस्यां लब्धौ सा क्षीराश्रवा, आदिशब्दान्मध्वाश्रवा सर्पिराश्रवा अमृताश्रवा चेत्यादिको यो लब्ध्योघो लब्धिसङ्घातस्तमासाद्य उपलभ्य परमाक्षयं परमं सर्वसुन्दरमक्षयं च अनेकदा उपजीव्यमानमपि अनुपरमस्वभावम्, किमित्याह-कुर्वन्ति विदधति भव्यसत्त्वानामुपकर्तुं योग्यानाम् उपकारं सम्यक्त्व-ज्ञान-चारित्रलाभलक्षणमनुत्तमं निर्वाणैकफलत्वेन अन्योपकारातिशा[१]यिनमिति ॥२॥ तथा-

**मुच्यन्ते चाशु संसारादत्यन्तमसमञ्जसात् । जन्म-मृत्यु-जरा-व्याधि-रोग-शोकाद्युपद्रुतात् ॥३०॥ इति ।**

मुच्यन्ते परिहीयन्ते, चः समुच्चये, आशु शीघ्रं संसाराद् भवात्, कीदृशादित्याह-अत्यन्तमतीव, सङ्गतं युक्तम-

१. तिशायनमिति K. ॥

ञ्जः स्वरूपं यस्य स तथा, तत्प्रतिषेधादसमञ्जसस्तस्मात्, अत एव जन्म-मृत्यु-जरा-व्याधि-रोग-शोकाद्युपद्रुतात्, जन्मना प्रादुर्भावेन मृत्युना मरणेन जरया स्थविरभावलक्षणया व्याधिना कुष्ठादिरूपेण शोकेन इष्टवियोगप्रभवमनोदुःखविशेषेण आदिशब्दाच्छीतवातादिभिरुपद्रवैरुपद्रुताद् विह्वलतामानीतादिति ॥३॥

इति श्रीमुनिचन्द्रसूरिविरचितायां धर्मबिन्दुवृत्तौ यतिधर्मविधिः पञ्चमोऽध्यायःनाम समाप्तः॥५॥

## अथ षष्ठोऽध्यायः ।

व्याख्यातः पञ्चमोऽध्यायः, अधुना षष्ठो व्याख्यायते, त[१]स्य चेदमादिसूत्रम्-

**आशयाद्युचितं ज्यायोऽनुष्ठानं सूरयो विदुः । साध्यसिद्ध्यङ्गमित्यस्माद्यतिधर्मो द्विधा मतः ॥३१॥**

आशयस्य चि[२]त्तधृतिलक्षणस्य आदिशब्दात् श्रुतसम्पत्तेः शरीरसंहननस्य परोपकारकरणशक्तेश्च उचितं योग्यं ज्यायोऽतिप्रशस्यमनुष्ठानं जिनधर्मसेवालक्षणं सूरयः समयज्ञा विदुर्जानन्ति, कीदृशमित्याह-साध्यसिद्ध्यङ्गम्, साध्यस्य सकलक्लेशक्षयलक्षणस्य सिद्ध्यङ्गं निष्पत्तिकारणम् इति अस्मात् कारणाद् यतिधर्मो द्विधा मतः सापेक्षयतिधर्मतया निरपेक्षयतिधर्मतया चेति ॥१॥ साध्यसिद्ध्यङ्गत्वमेव भावयति-

**समग्रा यत्र सामग्री तदक्षेपेण सिद्ध्यति । दवीयसाऽपि कालेन वैकल्ये तु न जातुचित् ॥३२॥**

समग्रा परिपूर्णा यत्र कार्ये सामग्री समग्रसंयोगलक्षणा भवति तत् कार्यमक्षेपेण अविलम्बेन सिद्ध्यति

१. तस्य चेदमादिसूत्रम् नास्ति K.J. ॥ २. चित्तवृति K. । चित्तवृत्ति L.॥

निष्पद्यते, अन्यथा सामग्रीसमग्रताऽयोगात्, अत्रैव व्यतिरेकमाह-दवीयसाऽपि अतिचिररूपतया दूरतरवर्तिनाऽपि कालेन वैकल्ये तु सामग्रिकाया विकलतायां पुनर्न जातुचित् न कदाचिदपीति ॥२॥ एवं सति यत् कर्तव्यं तदाह -

**तस्माद् यो यस्य योग्यः स्यात् तत्तेनालोच्य सर्वथा । आरब्धव्यमुपायेन सम्यगेष सतां नयः ॥३३॥**

तस्मात् कारणाद् यो यतिर्यस्य सापेक्षयतिधर्म-निरपेक्षयतिधर्मयोरन्यतरानुष्ठानस्य योग्यः समुचितः स्याद् भवेत् तद् अनुष्ठानं तेन योग्येन आलोच्य निपुणोहापोहयोगेन परिभाव्य सर्वथा सर्वैरुपाधिभिरारब्धव्यमारम्भणीयम् उपायेन तद्गतेनैव सम्यग् यथावत्, एष योग्यारम्भलक्षणः सतां शिष्टानां नयो नीतिरिति ॥३॥

**इत्युक्तो यतिधर्मः, इदानीमस्य विषयविभागमनुवर्णयिष्यामः ॥१॥३६८॥ इति ।**

प्रतीतार्थमेवेति ॥१॥

**तत्र कल्याणाशयस्य श्रुतरत्नमहोदधेरुपशमादिलब्धि-मतः परहितोद्यतस्य अत्यन्तगम्भीरचेतसः प्रधानपरिणते- र्विधूतमोहस्य परमसत्त्वार्थकर्तुः सामायिकवतो विशुद्ध्यमानाशयस्य यथोचितप्रवृत्तेः**

सात्मीभूतशुभयोगस्य श्रेयान् सापेक्षयतिधर्म एव ॥२॥३६१॥ इति ।

तत्रेति विषयविभागानुवर्णनोपक्षेपे कल्याणाशयस्य भावारोग्यरूपमुक्तिपुरप्रापकपरिणामस्य, श्रुतरत्नमहोदधेः प्रवचनमाणिक्यपरमनीरनिधेः, उपशमादिलब्धिमत उक्तलक्षणोपशमादिलब्धिसमन्वितस्य, परहितोद्यतस्य सर्वजगज्जीवजातहिताधानधनस्य, अत्यन्तगम्भीरचेतसो हर्षविषादादावतिनिपुणैरप्यनुपलब्धचित्तविकारस्य, अत एव प्रधानपरिणतेः सर्वोत्तमात्मपरिणामस्य, विधूतमोहस्य समुत्तीर्णमूढभावतन्द्रामुद्रस्य, परमसत्त्वार्थकर्तुः निर्वाणावन्ध्यबीजसम्यक्त्वादिसत्त्वप्रयोजनविधातुः, सामायिकवतो माध्यस्थ्यगुणतुलारोपणवशसमतापनीतस्वजन-परजनादिभावस्य, विशुद्ध्यमानाशयस्य धवलपक्षक्षपापतिमण्डलस्येव प्रतिकलमवदायमानमानसस्य, यथोचितप्रवृत्तेः प्रस्तावप्रायोग्यप्रा[१]रब्धप्रयोजनस्य, अत एव सात्मीभूतशुभयोगस्य अयःपिण्डस्येव वह्निना शुभयोगेन सह समानीभूतात्मनो यतिविशेषस्य श्रेयान् अतिप्रशस्यः सापेक्षयतिधर्म एव, नेतर इति ॥२॥ कुत इत्याह-

१. प्रारब्धस्वप्रयोजनस्य L.॥

**वचनप्रामाण्यात् ॥३॥३७०॥ इति ।**

भगवदाज्ञाप्रमाणभावात् ॥३॥ एतदपि कुत इत्याह -

**सम्पूर्णदशपूर्वविदो निरपेक्षधर्मप्रतिपत्तिप्रतिषेधात् ॥४॥३७१॥ इति ।**

सुगममेव, प्रतिषेधश्च-

*गच्छे च्चिय निम्माओ जा पुव्वा दस भवे असंपुण्णा । नवमस्स तइयवत्थू होइ जहन्नो सुआभिगमो ॥२०५॥*

[पञ्चा० १८।५] इति वचनादवसीयते ॥४॥ एषोऽपि किमर्थमित्याह-

**परार्थसम्पादनोपपत्तेः ॥५॥३७२॥ इति ।**

परार्थस्य परोपकारलक्षणस्य सम्पादनं करणं तदुपपत्तेः, स हि दशपूर्वधरस्तीर्थोपष्टम्भलक्षणं परार्थं सम्पादयितुं यस्मादुपपद्यत इति ॥५॥ यदि नामैवं ततोऽपि किमित्याह -

**तस्यैव च गुरुत्वात् ॥६॥३७३॥ इति ।**

तस्य परार्थसम्पादनस्य एव, चेत्यवधारणे, गुरुत्वात् सर्वधर्मानुष्ठानेभ्य उत्तमत्वात् ॥६॥ एतदपि कथमित्याह-

**सर्वथा दुःखमोक्षणात् ॥७॥३७४॥ इति ।**

सर्वथा सर्वैः प्रकारैः स्वस्य परेषां चेत्यर्थः, दुःखानां शारीरमानसरूपाणां मोचनात् ॥७॥ तथा-

**सन्तानप्रवृत्तेः ॥८॥३७५॥ इति ।**

परार्थसम्पादनात् सन्तानस्य शिष्यप्रशिष्यादिप्रवाहरूपस्य प्रवृत्तेः ॥८॥ तथा-

**योगत्रयस्याप्युदग्रफलभावात् ॥९॥३७६॥ इति ।**

योगत्रयस्यापि मनोवाक्कायकरणव्यापाररूपस्य परार्थसम्पादने क्रियमाणे, न पुनरेकस्यैवेत्यपिशब्दार्थः, उदग्रफलभावात्, उदग्रस्य प्रकारान्तरेणानुपलभ्यमानत्वेनात्युत्तमस्य फलस्य कर्मनिर्जरालक्षणस्य भावात्, न हि यथा देशनायां सर्वात्मना व्याप्रियमाणं मनोवाक्कायत्रयं फलमाप्नोति तथाऽन्यत्र कृत्यान्तर इति ॥९॥ तथा-

**निरपेक्षधर्मोचितस्यापि तत्प्रतिपत्तिकाले परपरार्थसिद्धौ तदन्यसम्पादकाभावे प्रतिपत्तिप्रतिषेधाच्च ॥१०॥३७७॥ इति ।**

निरपेक्षधर्मोचितस्यापि, किं पुनस्तदनुचितस्येत्यपिशब्दार्थः, तत्प्रतिपत्तिकाले निरपेक्षधर्माङ्गीकरणसमये परपरार्थसिद्धौ परेषां परार्थस्य सम्यग्दर्शनादेः प्रधानप्रयोजनस्य सिद्धौ साध्यायां विषये तदन्यसम्पादकाभावे तस्मात् निरपेक्षयतिधर्मोचितादन्यस्य साधोः परार्थसिद्धिसम्पादकस्याभावे प्रतिपत्तिप्रतिषेधादङ्गीकरणनिवारणात्, चकारो हेत्वन्तरसमुच्चये, तस्यैव च गुरुत्वम् [सू०३७३] इति सण्टङ्क इति ॥१०॥

इत्थं सापेक्षयतिधर्मयोग्यमुक्त्वा निरपेक्षयतिधर्मयोग्यं वक्तुमाह-

**नवादिपूर्वधरस्य तु यथोदितगुणस्यापि साधुशिष्यनिष्पत्तौ साध्यान्तराभावतः सति कायादिसामर्थ्ये सद्वीर्याचारासेवनेन तथा प्रमादजयाय सम्यगुचितसमये आज्ञाप्रामाण्यतस्तथैव योगवृद्धेः प्रायोपवेशनवच्छ्रेया-न्निरपेक्षयतिधर्मः ॥११॥३७८॥ इति ।**

नवादिपूर्वधरस्य तु यथोदितगुणस्यापि त[1]त्र कल्याणाशयस्य इत्यादिसूत्रनिरूपितगुणस्य, किं पुनस्तदन्यगुणस्येत्यपिशब्दार्थः, साधुशिष्यनिष्पत्तौ आचार्योपाध्याय-प्रवर्तक -स्थविर-गणावच्छेदकलक्षणपदपञ्चकयोग्यतया साधूनां शिष्याणां निष्पत्तौ सत्यां साध्यान्तराभावतः साध्यान्तरस्य निरपेक्षधर्मापेक्षया आचारपरिपालनादिरूपस्य अभावतोऽभवनेन सति विद्यमाने कायादिसामर्थ्ये व[2]ज्रर्षभनाराचसंहननशरीरतया वज्रकुड्य-समानधृतितया च महति कायमनसोः समर्थभावे सति, सद्वीर्याचारासेवनेन सतो विषयप्रवृत्ततया सुन्दरस्य वीर्याचारस्य सामर्थ्यागोपनलक्षणस्य निषेवणेन, तथा प्रमादजयाय, तथा तेन निरपेक्षयतिधर्मप्रतिपत्तिप्रकारेण यः प्रमादस्य निद्रादेर्जयो ऽभिभवस्तदर्थं सम्यक् शास्त्रोक्तनीत्या तपः-सत्त्व-सूत्रैकत्व-बललक्षणाभिः पञ्चभिस्तुलनाभिरात्मानं तोलयित्वा, उचितसमये तिथि-वार-नक्षत्र-योग-लग्नशुद्धिलक्षणे आज्ञाप्रामाण्यत आज्ञैवात्रार्थे प्रमाणमिति परिणामात् तथैव प्रतिपित्सितनिरपेक्षयतिधर्मानुरूपतयैव योगवृद्धेः सम्यग्दर्शन-ज्ञान-चारित्र-लक्षणधर्मव्यापारवृद्धेः, प्रायोपवेशनवत्

१. दृश्यतां ६-२॥ २. आद्यसंहननत्रययुक्ततया J. सं. L.॥

प्रायोपवेशनम् अनशनम्, तद्वत् पर्यन्तकालकरणीयानशनक्रियातुल्य इत्यर्थः, श्रेयान् अतिप्रशस्यो निरपेक्षयतिधर्मो जिनकल्पादिरूपः कल्पादिग्रन्थप्रसिद्धस्वरूपो वर्तत इति ॥११॥ तथा-

**तत्कल्पस्य च परं परार्थलब्धिविकलस्य ॥१२॥३७९॥ इति ।**

तत्कल्पस्य निरपेक्षयतिधर्मप्रतिपत्तिसमर्थपुरुषविशेषतुल्यस्य अन्यस्यापि, चशब्दः समुच्चये, परं केवलं परार्थलब्धिविकलस्य तथाविधान्तरायादिकर्मपारतन्त्र्यदोषात् परार्थलब्ध्या साधुशिष्यनिष्पादनादिसामर्थ्यलक्षणया विकलस्य, श्रेयान् निरपेक्षयतिधर्म इत्यनुवर्तते ॥१२॥ अत्र हेतुमाह-

**उचितानुष्ठानं हि प्रधानं कर्मक्षयकारणम् ॥१३॥३८०॥ इति ।**

उचितानुष्ठानं हि यस्मात् प्रधानमुत्कृष्टं कर्मक्षयकारणमिति ॥१३॥ एतदपि कुत इत्याह

**उदग्रविवेकभावाद् रत्नत्रयाराधनाद् ॥१४॥३८१॥ इति ।**

उदग्रस्य उत्कटस्य विवेकस्य विधेयाविधेयवस्तुविभागविज्ञानलक्षणस्य भावात् सकाशात्, किमित्याह-

रत्नत्रयाराधनात्, रत्नत्रयस्य सम्यग्दर्शनादेराराधनाद् निष्पादनात्, उचितानुष्ठाने हि प्रारब्धे नियमाद् रत्नत्रयाराधक उदग्रो विवेको विजृम्भते इत्येतत् प्रधानं कर्मक्षयकारणमिति ॥१४॥ अत्रैव व्यतिरेकमाह-

**अननुष्ठानमन्यदकामनिर्जराङ्गमुक्तविपर्ययात् ॥१५॥३८२॥ इति।**

अननुष्ठानम् अनुष्ठानमेव न भवति अन्यद् विलक्षणमुचितानुष्ठानात्, तर्हि कीदृशं तदित्याह- अकामनिर्जराङ्गम्, अकामस्य निरभिलाषस्य तथाविधबलीवर्दादेरिव या निर्जरा कर्मक्षपणा तस्या अङ्गं निमित्तम्, न तु मुक्तिफलाया निर्जरायाः, कुत इत्याह-उक्तविपर्ययाद् उदग्रविवेकाभावेन रत्नत्रयाराधनाभावादिति ॥१५॥ एतदेव भावयन्नाह-

**निर्वाणफलमत्र तत्त्वतोऽनुष्ठानम् ॥१६॥३८३॥ इति।**

निर्वाणफलं मुक्तिकार्यम् अत्र जिनवचने तत्त्वतः परमार्थवृत्त्या, अनुषङ्गतः स्वर्गादिफलभावेऽपि, अनुष्ठानं सम्यग्दर्शनाद्याराधनारूपं प्रोच्यत इति ॥१६॥ यदि नामैवं ततोऽपि किमित्याह -

**न चासदभिनिवेशवत्तत् ॥१७॥३८४॥ इति ।**

न च नैव असुन्दराग्रहयुक्तं तद् निर्वाणफलमनुष्ठानम्, असदभिनिवेशो हि निष्ठुरेऽपि अनुष्ठाने मोक्षफलं प्रतिबध्नातीति तद्व्यवच्छेदार्थमुक्तं न चासदभिनिवेशवत्तदिति ॥१७॥ नन्वनौचित्येऽप्यनुष्ठानं च भविष्यति मिथ्याभिनिवेशरहितं चेत्याशङ्क्याह-

**अनुचितप्रतिपत्तौ नियमादसदभिनिवेशोऽन्यत्रानाभोगमात्रात् ॥१८॥३८५॥ इति ।**

अनुचितस्यानुष्ठानस्य प्रतिपत्तौ अभ्युपगमे नियमाद् अवश्यंतया असदभिनिवेश उक्तरूपः, असदभिनिवेश-कार्यत्वादनुचितानुष्ठानस्य, अपवादमाह-अन्यत्र अनाभोगमात्रादिति, अन्यत्र विनाऽनाभोग एव अपरिज्ञानमेव केवलम-भिनिवेशशून्यमनाभोगमात्रम्, तस्मादनाभोगमात्रादनुचितप्रतिपत्तावपि नासदभिनि[1]वेश इति भाव इति ॥१८॥ एवं सति किं सिद्धमित्याह-

१. L.J. मू. विना-निवेशभाव इति J. सं. । निवेश इति K. ॥

**सम्भवति तद्वतोऽपि चारित्रम् ॥१९॥३८६॥ इति ।**

सम्भवति जायते तद्वतोऽपि अनाभोगमात्रादनुचितप्रतिपत्तिमतोऽपि, किं पुनस्तदन्यस्येत्यपिशब्दार्थः, चारित्रं सर्वविरतिरूपम् ॥१९॥ अत्रैव विशेषमाह-

**अनभिनिवेशवांस्तु तद्युक्तः खल्वतत्त्वे ॥२०॥३८७॥ इति ।**

अनभिनिवेशवान् निराग्रहः पुनस्तद्युक्तश्चारित्रयुक्तो जीवोऽ-नाभोगेऽपि खलु निश्चयेन अतत्त्वे प्रवचनबाधितार्थे ॥२०॥ एतदपि कुत इत्याह-

**स्वस्वभावोत्कर्षात् ॥२१॥३८८॥ इति ।**

स्वस्य अनौपाधिकत्वेन निजस्य स्वभावस्य आत्मतत्त्वस्य उत्कर्षाद् वृद्धेः, चारित्रिणो हि जीवस्य छद्मस्थतया क्वचिदर्थे अनाभोगेऽपि गौतमादिमहामुनीनामिव तथाविधात्यन्तिकबाधककर्माभावेन स्वस्वभावः सम्यग्दर्शनादिरूपो नापकर्षं प्रतिपद्यत इति ॥२१॥ अयमपि कुत इत्याह -

**मार्गानुसारित्वात् ॥२२॥३८९॥ इति ।**

मार्गस्य सम्यग्दर्शनादेर्मुक्तिपथस्यानुवर्तनात् ॥२२॥ तदपि-

**तथारुचिस्वभावत्वात् ॥२३॥३९०॥ इति ।**

तथा तत्प्रकारा मार्गानुरूपत्वेन या रुचिः श्रद्धा तद्रूपत्वात् ॥२३॥ एतदपि-

**श्रवणादौ प्रतिपत्तेः ॥२४॥३९१॥ इति ।**

स्वयमेव शास्त्रश्रवणे आदिशब्दादन्येन वा प्रेरणायां कृतायां प्रतिपत्तेरनाभोगेन विहितं मयेदमसुन्दरमनुष्ठान-मित्यङ्गीकरणात् ॥२४॥ इयमपि-

**असदाचारगर्हणात् ॥२५॥३९२॥ इति ।**

असदाचारस्य अनुचितानुष्ठानस्य गर्हणात् तदुचितप्रायश्चित्तप्रतिपत्त्या निन्दनात् ॥२५॥ अथ प्रस्तुतमेव निगमयन्नाह-

**इत्युचितानुष्ठानमेव सर्वत्र श्रेयः ॥२६॥३९३॥ इति ।**

इति एवमनुचितानुष्ठाने नियमादसदभिनिवेशभावादुचितानुष्ठानमेव सर्वत्र गृहस्थधर्मप्रतिपत्तौ यतिधर्मप्रतिपत्तौ च श्रेयः प्रशस्यं वर्तते ॥२६॥ कुत इत्याह-

**भावनासारत्वात्तस्य ॥२७॥३९४॥ इति ।**

भावना निरुपाधिको जीववासकः परिणामः, ततो भावना सारं प्रधानं यत्र तत्तथा, तद्भावस्तत्त्वं तस्मात्, तस्य उचितानुष्ठानस्य ॥२७॥ भावनामेव पुरस्कुर्वन्नाह-

**इयमेव प्रधानं निःश्रेयसाङ्गम् ॥२८॥३९५॥ इति ।**

इयमेव भावना प्रधानं निःश्रेयसाङ्गं निर्वाणहेतुः ॥२८॥ एतदपि कुत इत्याह-

**एतत्स्थैर्याद्धि कुशलस्थैर्योपपत्तेः ॥२९॥३९६॥ इति ।**

एतस्या भावनायाः स्थैर्यात् स्थिरभावात् हिः स्फुटं कुशलानां सकलकल्याणाचरणानां स्थैर्यस्य उपपत्तेः

घटनात् ॥२९॥ इयमपि कुत इत्याह-

**भावनानुगतस्य ज्ञानस्य तत्त्वतो ज्ञानत्वात् ॥३०॥३९७॥ इति ।**

इह त्रीणि ज्ञानानि- श्रुतज्ञानं चिन्ताज्ञानं भावनाज्ञानं चेति, तल्लक्षणं चेदम् -

*वाक्यार्थमात्रविषयं कोष्ठकगतबीजसन्निभं ज्ञानम् । श्रुतमयमिह विज्ञेयं मिथ्याभिनिवेशरहितमलम् ॥२०६॥*

*यत्तु महावाक्यार्थजमतिसूक्ष्मसुयुक्तिचिन्तयोपेतम् । उदक इव तैलबिन्दुर्विसर्पि चिन्तामयं तत् स्यात् ॥२०७॥*

*ऐदम्पर्यगतं यद् विध्यादौ यत्नवत् तथैवोच्चैः । एतत्तु भावनामयमशुद्धसद्रत्नदीप्तिसमम् ॥२०८॥* [षोड० ११।७,८,९]

ततो भावनानुगतस्य भावनानुविद्धस्य ज्ञानस्य बोधविशेषस्य तत्त्वतः पारमार्थिकवृत्त्या ज्ञानत्वादवबोधत्वात् ॥३०॥ एतदेव व्यतिरेकतः साधयन्नाह -

**न हि श्रुतमय्या प्रज्ञया भावनादृष्टज्ञातं ज्ञातं नाम ॥३१॥३९८॥ इति ।**

न नैव हिर्यस्मात् श्रुतमय्या प्रथमज्ञानरूपया प्रज्ञया बुद्ध्या कर्तृभूतया करणभूतया वा, भावनादृष्टज्ञातम् भावनया भावनाज्ञानेन दृष्टं सामान्येन ज्ञातं च विशेषेण भावनादृष्टज्ञातं वस्तु ज्ञातमवबुद्धं भवति, नामेति विद्वज्जनप्रकटमेतत्, अयमभिप्रायः- यादृशं भावनाज्ञानेन वस्तु दृश्यते ज्ञायते च न तथा श्रुतज्ञानेनेति ॥३१॥ कुत इत्याह-

**उपरागमात्रत्वात् ॥३२॥३९९॥ इति ।**

उपराग एव केवल उपरागमात्रम्, तद्भावस्तत्त्वं तस्मात्, यथा हि स्फटिकमणेर्जपाकुसुमादिसन्निधानत उपराग एव, न पुनस्तद्भावपरिणतिः सम्पद्यते, एवं श्रुतमय्यां प्रज्ञायां आत्मनो बोधमात्रमेव बहिरङ्गम्, न त्वन्तःपरिणतिरिरिति ॥३२॥ एतदपि कुत इत्याह-

**दृष्टवदपायेभ्योऽनिवृत्तेः ॥३३॥४००॥ इति ।**

यथा भावनाज्ञानेन दृष्टेभ्य उपलक्षणत्वाद् ज्ञातेभ्यश्चानर्थेभ्यो निवर्तते एवं

श्रुतमयप्रज्ञाप्रवृत्तावप्यपायेभ्योऽनिवृत्तेः अनिवर्तनात् ॥३३॥ ननु भावनाज्ञानेऽप्यपायेभ्यो निवृत्तिरसम्भविनीत्याह-

**एतन्मूले च हिताहितयोः प्रवृत्ति-निवृत्ती ॥३४॥४०१॥ इति ।**

एतन्मूले च भावनाज्ञानपूर्विके एव, चकारस्यैवार्थत्वात्, हिताहितयोः प्रतीतयो र्यथासङ्ख्यं प्रवृत्ति-निवृत्ती विधि-प्रतिषेधरूपे भवतो मतिमताम्, नान्यज्ञानमूले इति ॥३४॥ इदमेवोपचिन्वन्नाह-

**अत एव भावनादृष्टज्ञाताद् विपर्ययायोगः ॥३५॥४०२॥ इति।**

अत एव भावनामूलत्वादेव हिताहितप्रवृत्तिनिवृत्त्योः भावनादृष्टज्ञाताद् भावनया दृष्टं ज्ञातं च वस्तु प्राप्य विपर्ययायोगः विपर्यासाप्रवृत्तिलक्षणो जायते, यतो न मतिविपर्यासमन्तरेण पुंसो हितेष्वप्रवृत्तिरहितेषु च प्रवृत्तिः स्यात्, न चासौ भावनाज्ञाने समस्तीति ॥३५॥ एतदपि कथं सिद्धमित्याह-

**तद्वन्तो हि दृष्टापाययोगेऽप्यदृष्टापायेभ्यो निवर्तमाना दृश्यन्त एवान्यरक्षादाविति ॥३६॥४०३॥ इति ।**

तद्वन्तो भावनाज्ञानवन्तः प्रमातारो हिर्यस्माद् दृष्टापाययोगेऽपि प्रत्यक्षोपलभ्यमानमरणाद्यपायप्राप्तौ, किं पुनस्तदप्राप्तावित्यपिशब्दार्थः, अदृष्टपायेभ्यो नरकादिगतिप्रापणीयेभ्यो निवर्तमानाः सुवर्णमययवभक्षिक्रौञ्चजीवाकथकार्द्रचर्मशिरोवेष्टानाविष्टसुवर्णकारारब्धमारणमहामुनिमेतार्य इवाद्यापि महासत्त्वाः केचन दृश्यन्ते एव न न दृश्यन्ते अन्यरक्षादौ, अन्यस्य स्वव्यतिरिक्तस्य रक्षायां मरणादित्राणरूपायाम्, आदिशब्दादुपकारे च मार्गश्रद्धानाद्यारोपणरूपे, इतिशब्दो वाक्यपरिसमाप्तौ ॥३६॥ निगमयन्नाह-

**इति मुमुक्षोः सर्वत्र भावनायामेव यत्नः श्रेयान् ॥३७॥४०४॥ इति।**

इति एवमुक्तयुक्तेर्मुमुक्षोर्यतेः सर्वत्र कृत्ये भावनायामेव उक्तलक्षणायां यत्न आदरः श्रेयान् प्रशस्यः ॥३७॥ कुत इत्याह-

**तद्भावे निसर्गत एव सर्वथा दोषोपरतिसिद्धेः ॥३८॥४०५॥ इति।**

तद्भावे भावनाभावे निसर्गत एव स्वभावादेव सर्वथा सर्वैः प्रकारैर्दोषाणां रागादीनामु उपरतिसिद्धेः ॥३८॥

अथ भावनाया एव हेतुमाह-

**वचनोपयोगपूर्वा विहितप्रवृत्तिर्योनिरस्याः ॥३९॥४०६॥ इति।**

वचनोपयोगः शास्त्रे इदमित्थं चेत्थं चोक्तमित्यालोचनारूपः पूर्वो मूलं यस्याः सा तथा, का इत्याह-विहिते प्रत्युपेक्षणादौ प्रवृत्तिर्विहितप्रवृत्तिर्योनिरुत्पत्तिस्थानमस्याः भावनाया भावनाज्ञानस्येत्यर्थः ॥३९॥ कुत इत्याह-

**महागुणत्वाद् वचनोपयोगस्य ॥४०॥४०७॥ इति ।**

अत्यन्तोपकारित्वाद् वचनोपयोगस्य उक्तरूपस्य ॥४०॥ एतदेव भावयन्नाह -

**तत्र ह्यचिन्त्यचिन्तामणिकल्पस्य भगवतो बहुमानगर्भं स्मरणम् ॥४१॥४०८॥ इति ।**

तत्र वचनोपयोगे सति हिर्यस्मादचिन्त्येन चिन्तयितुमशक्यप्रभावेन चिन्तामणिना मणिविशेषेण कल्पस्य तुल्यस्य भगवतः पारगतस्य बहुमानगर्भं प्रीतिसारं स्मरणमनुध्यानं जायते ॥४१॥ कथमित्याह-

**भगवतैवमुक्तमित्याराधनायोगात् ॥४२॥४०९॥ इति ।**

भगवता अर्हता एवं क्रियमाणप्रकारेण उक्तं निरूपितं प्रत्युपेक्षणादि इति अनेन रूपेण आराधनायोगाद् अनुकूलभाव[1]जननेनेति ॥४२॥ एवं सति यत् सिद्धं तदाह-

**एवं च प्रायो भगवत एव चेतसि समवस्थानम् ॥४३॥४१०॥ इति ।**

एवं च एतस्मिंश्च बहुमानगर्भे भगवत्स्मरणे सति प्रायो बाहुल्येन भगवत एव चेतसि समवस्थानं निवेशनम्, प्रायोग्रहणं च क्रियाकाले क्रियायामेव चित्तावस्थानं विधेयम्, अन्यथा तत्क्रियाया द्रव्यत्वप्रसङ्गादिति सूचनार्थमिति ॥४३॥ ननु तदुक्तकरणात् किं नाम सिध्यतीत्याह-

**तदाज्ञाराधनाच्च तद्भक्तिरेव ॥४४॥४११॥ इति ।**

तस्य भगवत आज्ञाराधनात् पुनः तद्भक्तिरेव भगवद्भक्तिरेवेति ॥४४॥ ए[2]तदेव भावयितुमाह-

१. भावभजनेनेति J.॥ भाजननेनेति K.मू., भावजननेनेति K सं.॥ २. एतदपि भावयितुमाह J. ॥

**उपदेशपालनैव भगवद्भक्तिः, नान्या, कृतकृत्यत्वात् ॥४५॥४१२॥ इति ।**

प्रकटार्थमेतदिति ॥४५॥ एवं तर्हि कथमस्य पुष्पादिपूजाविधिरित्याशङ्क्याह-

**उचितद्रव्यस्तवस्यापि तद्रूपत्वात् ॥४६॥४१३॥ इति ।**

उचितस्य द्रव्यस्तवस्य-

*काले सुइभूएणं विसिट्ठपुप्फाइएहिं विहिणा उ । सारथुइथोत्तग[1]रुई जिणपूया होइ कायव्वा ॥२०१॥* [पञ्चा. ४।३]

इत्यादिवचनोक्तरूपस्य, किं पुनर्भावस्तवस्येति अपिशब्दार्थः, सा उपदेशपालना रूपमस्य तद्भावस्तत्त्वम्, तस्मात् ॥४६॥ कुत इत्याह-

**भावस्तवाङ्गतया विधानात् ॥४७॥४१४॥ इति ।**

१. गुरुई K.L. ॥

शुद्धयतिधर्मकारणतया विधानाद् द्रव्यस्तवस्य, यदा हि विषयपिपासादिभिः कारणैः साधुधर्ममन्दरशिखरमारोढुमक्षमो धर्मं च चिकीर्षुः प्राणी तदा महतः सावद्यान्तराद् निवृत्तेरुपायमन्यमपश्यन् भगवान् अर्हन् सदारम्भरूपं द्रव्यस्तवमुपदिदेश, यथा-

*जिनभवनं जिनबिम्बं जिनपूजां जिनमतं च यः कुर्यात्। तस्य नरामरशिवसुखफलानि करपल्लवस्थानि ॥२१०॥* [ ] इति।

एवं च द्रव्यस्तवोऽपि भगवदुपदेशपालनारूप एवेति भावः ॥४७॥ अथ भगवति चित्तावस्थिते फलमाह-

**हृदि स्थिते च भगवति क्लिष्टकर्मविगमः ॥४८॥४१५॥ इति।**

प्रतीतार्थमेव, परं क्लिष्टं कर्म तदुच्यते यत् संसारवासैकनिबन्धनमिति ॥४८॥ एतदपि कुत इत्याह-

**जलानलवदनयोर्विरोधात् ॥४९॥४१६॥ इति ।**

वारि-वैश्वानरयोरिव अनयोर्भगवच्चित्तावस्थान-क्लिष्टकर्मणोर्विरोधात् परस्परबाधनात् ॥४९॥ पुनरपि

प्रकृतोपसंहारमाह -

**इत्युचितानुष्ठानमेव सर्वत्र प्रधानम् ॥५०॥४१७॥ इति ।**

एतत् प्राग्वत् ॥५०॥ कथमेतदित्याह-

**प्रायोऽतिचारासम्भवात् ॥५१॥४१८॥ इति ।**

यो हि स्वोचितं कर्म कर्त्तुमारभते न तस्य तत्रातिचारः सम्भवति, प्रायोग्रहणेन चेदमाह - तथाविधानाभोगदोषाद् निकाचितक्लिष्टकर्मोदयाद्वा कदाचित् कस्यचित् तथाविधसन्मार्गयायिनः पथिकस्येव कण्टक-ज्वर-दिग्मोहसमानोऽतीचारः स्यादपीति ॥५१॥ एतदपि कथमित्याह-

**यथाशक्ति प्रवृत्तेः ॥५२॥४१९॥इति ।**

यथाशक्ति यथासामर्थ्यं सर्वकार्येषु प्रवृत्तेः ॥५२॥ इयमपि कथम्? उच्यते-

**सद्भावप्रतिबन्धात् ॥५३॥४२०॥ इति ।**

सद्भावे शक्यतया सत्यरूपे कृत्येऽर्थे चित्तस्य प्रतिबन्धात् प्रतिबद्धत्वात् ॥५३॥ विपर्यये बाधकमाह-

**इतरथाऽऽर्त्तध्यानापत्तिः ॥५४॥४२१॥ इति ।**

इतरथा अनुचितारम्भे आर्त्तध्यानस्य प्रतीतरूपस्य आपत्तिः प्रसङ्गः स्यात् ॥५४॥ कथमित्याह-

**अकालौत्सुक्यस्य तत्त्वतस्तत्त्वात् ॥५५॥४२२॥ इति ।**

अकाले चिकीर्षितकार्यारम्भाप्रस्तावे यदौत्सुक्यं तत्कालोचितकार्यान्तरपरिहारेण तीव्रचिकीर्षालक्षणं तस्य तत्त्वतः परमार्थतः तत्त्वाद् आर्त्तध्यानत्वात्, व्यवहारतस्तु धर्मध्यानत्वमपि इति तत्त्वग्रहणमिति ॥५५॥ ननु अनुत्सुकः प्रवृत्तिकालमपि कथं लप्स्यते इत्याशङ्क्याह-

**नेदं प्रवृत्तिकालसाधनम् ॥५६॥४२३॥ इति ।**

न नैवेदम् औत्सुक्यं प्रवृत्तिकालसाधनं कार्यस्य यः प्रवृत्तिकालः प्रस्तावलक्षणस्तस्य साधनं हेतुः, अनवसरोपहतत्वात्, न हि अत्यन्तं बुभुक्षवोऽपि पुरुषा अप्रस्तावे भोजनं लभन्ते, किन्तु प्रस्ताव एवेति ॥५६॥

अतः किं विधेयमित्याह-

**इति सदोचितम् ॥५७॥४२४॥ इति।**

इति एवं सदा सर्वकालमुचितमारब्धव्यं निरुत्सुकेन सता ॥५७॥ कुत इत्याह-

**तदा तदसत्त्वात् ॥५८॥४२५॥ इति।**

तदा प्रवृत्तिकाले तस्य औत्सुक्यस्याऽसत्त्वाद् अभावात्, न हि सम्यगुपायप्रवृत्ता मतिमन्तः कार्यौत्सुक्यमवलम्बन्ते, सदुपायस्य कार्यमप्रसाध्योपरमाभावात्, ततो यो यस्य साधनभावेन व्याप्रियते स तत्कार्यप्रवृत्तिकाले नियमात् स्वसत्त्वमादर्शयति, यथा मृत्पिण्डादिर्घटस्य, नादर्शयति चात्मानमौत्सुक्यं कार्यप्रवृत्तिकाले मतिमतामिति कथं तत् तत्साधनभावं लब्धुमर्हतीति, अत एव पठ्यतेऽन्यत्र-

*अत्वरापूर्वकं सर्वं गमनं कृत्यमेव वा। प्रणिधानसमायुक्तमपायपरिहारतः ॥२११॥* (योगदृष्टि० ५१)

इति ॥५८॥ यदि नौत्सुक्यं प्रवृत्तिकालसाधनं तर्हि किं साधनमित्याशङ्क्याह -

**प्रभूतान्येव तु प्रवृत्तिकालसाधनानि ॥५९॥४२६॥इति।**

प्रभूतान्येव तु बहून्येव न पुनरेकं किञ्चन प्रवृत्तिकालसाधनानि सन्तीति ॥५९॥ कुत इत्याह-

**निदानश्रवणादेरपि केषाञ्चित् प्रवृत्तिमात्रदर्शनात् ॥६०॥४२७॥ इति।**

इह निदानशब्दः कारणमात्रपर्यायः, यथा किमत्र रोगे निदानमित्यादौ प्रयोगे, ततो निदानस्य भोगादिफलत्वेन दानादेः श्रवणाद् देशनायाम्, यथा-

*भोगा दानेन भवन्ति देहिनां सुरगतिश्च शीलेन। भावनया च विमुक्तिस्तपसा सर्वाणि सिध्यन्ति॥२१२॥*

आदिशब्दात् तथाविधश्रुतादिलिप्सा-स्वजनोपरोध-बलात्कारादेः कारणात् केषाञ्चित् गोविन्दवाचक-सुन्दरीनन्दा-ऽऽर्यसुहस्तिदीक्षितद्रमक-भवदेव-करोटकगणिप्रभृतीनां प्रवृत्तिमात्रस्य प्रवृत्तेरेव केवलायाः तात्त्विकोपयोगशून्यायाः प्रथमं प्रव्रज्यायां दर्शनात् शास्त्रकारैरवलोकनात् ॥६०॥

ननु कथं तत्प्रवृत्तिमात्रं सद्भावप्रव्रज्याप्रतिपत्तिकालहेतुरित्याशङ्क्याह-

**तस्यापि तथापारम्पर्यसाधनत्वम् ॥६१॥४२८॥ इति ।**

तस्यापि प्रवृत्तिमात्रस्य, किं पुनरन्यस्य भववैराग्यादेरित्यपिशब्दार्थः, तथापारम्पर्येण तत्प्रकारपरम्परया साधनत्वं साधनभावः, श्रूयते हि केचन पूर्वं तथाविधभोगाभिलाषादिनाऽऽलम्बनेन द्रव्यप्रव्रज्यां प्रतिपद्य पश्चात् तदभ्यासेनैव व्यावृत्तातितीव्रचारित्रमोहोदया भावप्रव्रज्याप्रतिपत्तिकालाराधकाः सञ्जाताः, यथा अमी एव गोविन्दादय इति॥६१॥ तर्हि प्रवृत्तिमात्रमपि कर्त्तव्यमापन्नमित्याह -

**यतिधर्माधिकारश्चायमिति प्रतिषेधः ॥६२॥४२९॥ इति ।**

यतिधर्माधिकारः शुद्धसाधुधर्मप्रस्तावः पुनरयं प्रकान्तः इति एतस्माद्धेतोः प्रतिषेधो निवारणं प्रवृत्तिमात्रस्य-न हि यथा कथञ्चित् प्रवृत्तः सर्वोऽपि प्राणी भावधर्मप्रवृत्तिकालाराधको भवति, किन्तु घु[१]णाक्षरप्रवृत्त्या कश्चिदेवेति सर्वत्रौचित्येन प्रवर्तितव्यम् ॥६२॥ अभ्युच्चयमाह-

---

१ घुणाक्षरवृत्त्या.K.॥

**न चैतत् परिणते चारित्रपरिणामे ॥६३॥४३०॥ इति ।**

न च नैव एतद् अकालौत्सुक्यं परिणते अङ्गाङ्गीभावमागते चारित्रपरिणामे ॥६३॥ कुत इत्याह-

**तस्य प्रसन्नगम्भीरत्वात् ॥६४॥४३१॥ इति ।**

तस्य चारित्रपरिणामस्य प्रसन्नत्वात्, शारदसमयसरःसलिलवत्, तथा गम्भीरत्वाद् महासमुद्रमध्यवत् ॥६४॥ एतदपि कथमित्याह-

**हितावहत्वात् ॥६५॥४३२॥ इति ।**

एकान्तेनैव हित[१]कारित्वात् ॥६५॥ आह-यदि परिणतश्चारित्रपरिणामः प्रसन्नो गम्भीरस्तथा हितावहश्च तत् कथं तैस्तैर्वचनैस्तत्प्रतिपत्तावपि साधूनामनुशासनं शास्त्रेषु निरूप्यते? यथा-

*गुरुकुलवासो गुरुतंतयाय उचियविणयस्स करणं च। वसहीपमज्जणाइसु जत्तो तह कालविक्खाए॥२१३॥*

१. हितकारकत्वात् L.J. ॥

*अनिगूहणा बलंमी सव्वत्थ पवत्तणं पसंतीए। नियलाभ-चिंतणं सइ अणुग्गहो मित्ति गुरुवयणे॥२१४॥*

*संवरनिच्छिड्डत्तं सुद्धुंछुज्जीवणं सुपरिशुद्धं। विहिसज्झाओ मरणादवेक्खणं जइजणुवएसो॥२१५॥*

[योगशतके३३,३४,३५] इत्याशङ्क्याह-

**चारित्रपरिणांतत्साधनानुष्ठानविषयस्तूपदेशः प्रतिपात्यसौ, कर्मवैचित्र्यात् ॥६६॥४३३॥** इति।

चारित्रि[1]णां परिणतचारित्राणां तस्य चारित्रपरिणामस्य साधनानि यान्यनुष्ठानानि गुरुकुलवासादीनि तानि विषयो यस्य स तथा, तुः पुनरर्थे, उपदेशः प्रवर्त्तकवाक्यरूपो यः शास्त्रेषु गीयते सः। प्रतिपाती प्रतिपतनशीलो यतोऽसौ चारित्रपरिणामो वर्त्तते, कुत इत्याह-कर्मवैचित्र्यात्, विचित्राणि हि कर्माणि, ततस्तेभ्यः किं न सम्भाव्यते?, यतः पठ्यते-

*क[2]म्माइं नूणं घणचिक्कणाइं कठिणाइं वज्जसाराइं। णाणड्ढयं पि पुरिसं पंथाओ उप्पहं नेंति॥२१६॥*

---

१. त्रिणां तस्य J. ॥ २. कर्माणि नूनं घनचिक्कणानि कठिनानि वज्रसाराणि। ज्ञानाढ्यमपि पुरुषं पथ उत्पथं नयन्ति॥

ततः पतितोऽपि कदाचित् कस्यचित् चारित्रपरिणामः तथाविधाकर्षवशात् पुनरपि गुरुकुलवासादिभ्यः सम्यक्प्रयुक्तेभ्यः प्रवर्त्तत इति तत्साधनोपदेशो ज्यायानिति ॥६६॥

**तत्संरक्षणानुष्ठानविषयश्च, चक्रादिप्रवृत्त्यवसानभ्रमाधानज्ञातात् ॥६७॥४३४॥ इति ।**

तस्य चारित्रपरिणामस्य लब्धस्य यत् संरक्षणं पालनं तदर्थं यदनुष्ठानं तद्विषयः, चः समुच्चये, उपदेशः-

*वज्जेज्जा संसग्गिं पासत्थाईहिं पावमित्तेहिं। कुज्जा उ अप्पमत्तो सुद्धचरित्तेहिं धीरेहिं ॥२१७॥*

[पञ्च.७३०]

इत्यादिरूपो यः स चक्रस्य कुलालादिसम्बन्धिनः आदिशब्दादरघट्टयन्त्रादेश्च या प्रवृत्तिः भ्रमणरूपा तस्या अवसाने मन्दतारूपे यद् भ्रमाधानं पुनरपि दण्डयोगेन तीव्रत्वमाधीयते य[१]था तथा च(चा)रित्रवतोऽपि जन्तोः तथाविधवीर्यह्रासात् परिणाममन्दतायां तत्तीव्रताऽऽधानार्थमुपदेशः प्रव[२]र्त्यत इति ॥६७॥

१. यथा J. सं. विना नास्ति॥ २. प्रवर्त्तते मु. ॥

अथोपदेशनिष्फलत्वमभिधातुमाह-

**माध्यस्थ्ये तद्वैफल्यमेव ॥६८॥४३५॥इति।**

माध्यस्थ्ये मध्यस्थभावे अप्रवृत्ति-प्रवृत्त्यवसानयोर्मध्यभागरूपे, प्रवृत्तौ सत्यामित्यर्थः, अ[1]स्य उपदेशस्य वैफल्यं विफलभावः ॥६८॥ कुत इत्याह-

**स्वयंभ्रमणसिद्धेः ॥६९॥४३६॥ इति।**

स्वयम् आत्मनैव भ्रमणसिद्धेः चक्रभ्रमणतुल्यप्रवृत्तिसिद्धेः ॥६९॥ एतदेव भावयन्नाह-

**भावयतिर्हि तथाकुशलाशयत्वादशक्तोऽसमञ्जसप्रवृत्तावितरस्यामिवेतरः ॥७०॥४३७॥ इति।**

भावयतिः परमार्थसाधुः हिर्यस्मात् तथा तत्प्रकारश्चारित्रवृद्धिहेतुरित्यर्थः कुशलः परिशुद्ध आशयः चित्तमस्य

१. तस्य मु.॥

तद्भावस्तत्त्वम् तस्माद् अशक्तऽसमर्थोऽसमञ्जसप्रवृत्तौ अनाचारसेवारूपायाम्, दृष्टान्तमाह- इतरस्यामिव भावतः समञ्जसप्रवृत्ताविव इतरोऽभावयतिर्विडम्बकप्रायः ॥६९॥ अत्रैव कश्चिद्विशेषमाह-

**इति निदर्शनमात्रम् ॥७१॥४३८॥ इति।**

इति एतदितरस्यामिवेतर इति यदुक्तं तन्निदर्शनमात्रं दृष्टान्त एव केवलः ॥७१॥ अत एवाह-

**न सर्वसाधर्म्ययोगेन ॥७२॥४३९॥इति।**

न नैव सर्वसाधर्म्ययोगेन सर्वैः धर्मैः साधर्म्यं सादृश्यं तद्योगेन॥७२॥ एतत्कुत इत्याह-

**यतेस्तदप्रवृत्तिनिमित्तस्य गरीयस्त्वात् ॥७३॥४४०॥ इति।**

यतेः साधोस्तत्र असमञ्जसे अप्रवृत्तौ निमित्तस्य सम्यग्दर्शनादिपरिणामस्य गरीयस्त्वात् असमञ्जसप्रवृत्ति-निमित्तान्मिथ्यात्वादेस्तथाविधकर्मोदयजन्यात् अत एव जीवास्वभावभूतात् सकाशादतिगुरुत्वात् ॥७३॥ एतदेव भावयति-

**वस्तुतः स्वाभाविकत्वात् ॥७४॥४४१॥ इति।**

वस्तुतः परमार्थवृत्त्या स्वाभाविकत्वाद् जीवस्वभावमयत्वात् सम्यग्दर्शनादेः समञ्जसप्रवृत्तिनिमित्तस्य ॥७४॥ तथा-

**सद्भाववृद्धेः फलोत्कर्षसाधनात् ॥७५॥४४२॥ इति।**

सद्भावस्य शुद्धपरिणामरूपस्य या वृद्धिरुत्कर्षस्तस्याः फलोत्कर्षसाधनाद् उत्कृष्टफलरूपमोक्षनिष्पादनात्। वृद्धिप्राप्तो हि शुद्धो भावः सम्यग्दर्शनादिर्मोक्षं साधयति, न तु मिथ्यात्वादिः कदाचनापि, अतः परमफलसाधकत्वेन मिथ्यात्वादिभ्योऽसौ गरीयानिति॥७५॥ एतदपि कुत इत्याह -

**उपप्लवविगमेन तथावभासनादिति ॥७६॥४४३॥ इति।**

उपप्लवविगमेन रागद्वेषाद्यान्तरोपद्रवापगमेन तथावभासनात् तथा असमञ्जसस्याप्रवृत्तियोग्यतयाऽवभासनात्

प्रतीतेर्भावयतेः कर्त्तुः, इती[१]तरस्यामिवेतर इति निदर्शनमात्रमिति स्थितम् इतिः वाक्यपरिसमाप्तौ ॥७६॥
अथोपसंहरन्नाह -

**एवंविधयतेः प्रायो भावशुद्धेर्महात्मनः। विनिवृत्ताग्रहस्योच्चैर्मोक्षतुल्यो भवोऽपि हि ॥३४॥ इति ।**

एवंविधस्य स्वावस्थोचितानुष्ठानारम्भिणो यतेः साधोः प्रायो बाहुल्येन भावशुद्धेः सकाशात् महात्मनः उक्तरूपस्य विनिवृत्ताग्रहस्य उपरतशरीरादिगोचरमूर्च्छादोषस्य उच्चैरत्यर्थं मोक्षतुल्यो निर्वाणकल्पो भवोऽपि, मोक्षस्तावन्मोक्ष एवेत्यपिशब्दार्थः, हिः स्फुटम्, यदवाचि-

*निर्जितमदमदनानां वाक्कायमनोविकाररहितानाम्। विनिवृत्तपराशानामिहैव मोक्षः सुविहितानाम्* (प्रशम० २३८) ॥२१८॥ इति। अत्रोपपत्तिमाह -

---

१. दृश्यताम् ६। ७०॥

**सद्दर्शनादिसम्प्राप्तेः सन्तोषामृतयोगतः। भावैश्वर्यप्रधानत्वात् तदासन्नत्वतस्तथा ॥३५॥**

**इति।**

सद्दर्शनादीनाम् अधःकृतचिन्तामणि-कल्पद्रुम-कामधेनूपमानानां सम्यग्दर्शन-ज्ञान-चारित्राणां सम्प्राप्तेः लाभाद् यः सन्तोषामृतयोगस्तस्मात्, मोक्षतुल्यो भवोऽपि हीति सम्बन्धः, उपपत्त्यन्तरमाह-भावैश्वर्यप्रधानत्वात्, भावैश्वर्येण क्षमामार्दवादिना प्रधानः उत्तमस्तद्भावस्तत्त्वं तस्मात् सकाशात् तदासन्नत्वतो मोक्षासन्नभावात्, तथेति हेत्वन्तरसूचक इति॥ एतदेव समर्थयन्नाह।

**उक्तंमासादिपर्यायवृद्ध्या द्वादशभिः परम्। तेजः प्राप्नोति चारित्री सर्वदेवेभ्य उत्तमम् ॥३६॥**

**इति।**

उक्तं निरूपितं भगवत्याम्, किमित्याह-मासादिपर्यायवृद्ध्या मासेन द्वाभ्यां त्रिभिरित्यादिक्रमेण पर्यायस्य वृद्धौ सत्यां यावद् द्वादशभिर्मासैः परं प्रकृष्टं तेजः चित्तसुखलाभलक्षणं प्राप्नोति अधिगच्छति चारित्री विशिष्टचारित्रपात्रं

पुमान्, परत्वमेव व्यनक्ति-सर्वदेवेभ्यो भवनवासिप्रभृतिभ्योऽनुत्तरसुरावसानेभ्यः सकाशादुत्तमं सर्वसुरसुखातिशायीति भावः, भगवतीसूत्रं चेदम्-

*जे इमे अज्जत्ताए समणा निग्गंथा एते णं कस्स तेउल्लेसं वीतीवयंति? मासपरियाए समणे निग्गंथे वाणमंतराणं देवाणं तेउल्लेसं वीइवयइ, एवं दुमासपरियाए समणे निग्गंथे असुरिंदवज्जियाणं भवणवासीणं देवाणं तेउलेसं वीतीवयइ, तिमासपरियाए समणे निग्गंथे असुरकुमारिंदाणं देवाणं तेउलेसं वीतीवयइ, चउमासपरियाए समणे निग्गंथे चंदिमसूरिय-वज्जियाणं गहगण-नक्खत्त-तारारूवाणं जोतिसियाणं तेउलेसं वीईवयइ, पंचमासपरियाए समणे निग्गंथे चंदिम-सूरियाणं जोइसियाणं तेउलेसं वीतीवयइ, छम्मासपरियाए समणे निग्गंथे सोहम्मीसाणाणं तेउलेसं वीतीवयइ, सत्तमासपरियाए समणे निग्गंथे सणंकुमार-माहिंदाणं तेउलेसं वीइवयइ, अट्ठमास-परियाए समणे निग्गंथे बंभलोग-लंतगदेवाणं तेउलेसं [वीइवयइ], नवमासपरियाए समणे निग्गंथे महासुक्क-सहस्साराणं देवाणं तेउलेसं [वीईवयइ], दसमासपरियाए समणे [निग्गंथे] आणय-पाणय-आरण-अच्चुआणं देवाणं तेउलेसं [वीइवयइ], एक्कारसमासपरियाए*

*समणे [निग्गंथे] गेवेज्जाणं देवाणं [तेउलेसं वीइवयइ], बारसमासपरियाए [समणे निग्गंथे] अणुत्तरोववाइयाणं देवाणं तेउलेसं [वीइवयइ] तेण परं सुक्के सुक्काभिजाती भवित्ता सिज्झइ बुज्झइ मुच्चइ परिनिव्वाइ सव्वदुक्खाणमंतं करेइ ॥२१९॥ [भगवती ० १४/९/५३७] त्ति॥*

इति श्रीमुनिचन्द्रसूरिविरचितायां धर्मबिन्दुवृत्तौ यतिधर्मविषयविधिः षष्ठोऽध्यायः समाप्तः।

## अथ सप्तमोऽध्यायः ।

व्याख्यातः षष्ठोऽध्यायः। अथ सप्तमो व्याख्यायते, तस्य चेदमादिसूत्रम् -

**फलप्रधान आरम्भ इति सल्लोकनीतितः। सङ्क्षेपादुक्तमस्येदं व्यासतः पुनरुच्यते ॥३७॥ इति ।**

फलं प्रधानं यस्येति स तथा आरम्भो धर्मादिगोचरा प्रवृत्तिरिति अस्याः सल्लोकनीतितः शिष्टजनसमाचारात्, किमित्याह- सङ्क्षेपात् परिमितरूपतया उक्तमस्य धर्मस्येदं फलं *धनदो धनार्थिनां प्रोक्तः* [पृ०३] इति श्लोकेन शास्त्रादौ, व्यासतो विस्तरेण पुनरुच्यते इदमिदानीमिति ॥१॥ ननु यदि व्यासतः पुनरिदानीं वक्ष्यते तत् किमिति सङ्क्षेपात् पूर्वं फलमुक्तमित्याशङ्क्याह -

**प्रवृत्त्यङ्गमदः श्रेष्ठं सत्त्वानां प्रायशश्च यत्। आदौ सर्वत्र तद्युक्तमभिधातुमिदं पुनः ॥३८॥ इति ।**

प्रवृत्त्यङ्गं प्रवृत्तिकारणम् अदः फलं श्रेष्ठं ज्यायः सत्त्वानां फलार्थिनां प्राणिविशेषाणां प्रायशः प्रायेण, चकारो

वक्तव्यान्तरसमुच्चये, यद् यस्माद् आदौ प्रथमं सर्वत्र सर्वकार्येषु तत् तस्माद् युक्तमुचितम् अभिधातुं भणितुं सङ्क्षेपादादाविति, आदावेव विस्तरेण फलभणने शास्त्रार्थस्य अतिव्यवधानेन श्रोतुस्तत्र नीरसभावप्रसङ्गेनानादर एव स्यादिति । इदं पुनरिति यत् पुनर्व्यासतः फलं तदिदं वक्ष्यमाणम् ॥२॥ यथा-

**विशिष्टं देवसौख्यं यच्छिवसौख्यं च यत्परम् । धर्मकल्पद्रुमस्येदं फलमाहुर्मनी[१]षिणः ॥३९॥ इति ।**

विशिष्टं सौधर्मादिदेवलोकसम्बन्धितया शेषदेवसौख्यातिशायि देवसौख्यं सुरशर्म यदिहैव वक्ष्यमाणम्, शिवसौख्यं मुक्तिशर्म, चः समुच्चये, यदिति प्राग्वत्, परं प्रकृष्टम्, तत् किमित्याह- धर्मकल्पद्रुमस्य भावधर्मकल्पपादपस्य इदं प्रतीतरूपतया प्रथमानं फलं साध्यमाहुरुक्तवन्तो मनीषिणः सुधर्मस्वामिप्रभृतयो महामुनय इति ॥३॥

---

१. र्महर्षयः K.L.J. । किन्तु K.१ J.१. मध्ये वृत्तौ च मनीषिणः इत्येव दृश्यते, अतः मनीषिणः इति पाठोऽत्रास्माभिरादृतः ॥

**इत्युक्तो धर्मः, साम्प्रतमस्य फलमनुवर्णयिष्यामः ॥१॥४४४॥ इति ।**

सुगममेव॥१॥

**द्विविधं फलम्-अनन्तर-परम्प[1]रभेदात् ॥२॥४४५॥ इति ।**

द्विविधं द्विरूपं फलं धर्मस्य, कथमित्याह-अनन्तर-प[2]रम्परभेदाद् आनन्तर्येण परम्परया च ॥२॥

**तत्रानन्तरफलमुपप्लवह्रासः ॥३॥४४६॥ इति ।**

तत्र तयोर्मध्येऽनन्तरफलं दर्श्यते, तद्यथा उपप्लवह्रासः, उपप्लवस्य रागद्वेषादिदोषोद्रेकलक्षणस्य ह्रासः परिहाणिः॥३॥ तथा-

**भावैश्वर्यवृद्धिः ॥४॥४४७॥ इति ।**

भावैश्वर्यस्य औदार्य-दाक्षिण्य-पापजुगुप्सादिगुणलाभ-लक्षणस्य वृद्धिरुत्कर्षः ॥४॥ तथा-

---

१. परंपराभेदात् J.१ K. मू. १ विना॥ २. परंपराभेदात् J.K.L ॥

**जनप्रियत्वम् ॥५॥४४८॥ इति ।**

सर्वलोकचित्ताह्लादकत्वम् ॥५॥

**परम्परफलं तु सुगतिजन्मोत्तमस्थानपरम्परानिर्वाणावाप्तिः ॥६॥४४९॥ इति ।**

यत् सुगतिजन्म यच्चोत्तमस्थानपरम्परया करणभूतया निर्वाणं तयोरवाप्तिः पुनः परम्पराफलमिति ॥६॥ अथ स्वयमेवैतत् सूत्रं भावयति-

**सुगतिर्विशिष्टदेवस्थानम् ॥७॥४५०॥ इति ।**

सुगतिः किमुच्यते इत्याह-विशिष्टदेवस्थानं सौधर्मादिकल्पलक्षणम् ॥७॥

**तत्रोत्तमा रूपसम्पत्, सत्स्थितिप्रभावसुखद्युतिलेश्यायोगः, विशुद्धेन्द्रियावधित्वम्, प्रकृष्टानि भोगसाधनानि, दिव्यो विमाननिवहः, मनोहराण्युद्यानानि, रम्या जलाशयाः, कान्ता अप्सरसः, अतिनिपुणाः किङ्कराः, प्रगल्भो नाट्यविधिः, चतुरोदारा भोगाः, सदा चित्ताह्लादः,**

**अनेकसुखहेतुत्वम्, कुशलानुबन्धः, महाकल्याण[१]-पूजाकरणम्, तीर्थकरसेवा, सद्धर्मश्रुतौ रतिः, सदा सुखित्वम् ॥८॥४५१॥ इति ।**

तत्र देवस्थाने उत्तमा प्रकृष्टा रूपसम्पत् शरीरसंस्थानलक्षणा १, सत्यः सुन्दरा याः स्थिति-प्रभाव-सुख-द्युति-लेश्यास्ताभिर्योगः समागमः, तत्र स्थितिः पल्योपम-सागरोपमप्रमाणायुष्कलक्षणा, प्रभावो निग्रहा-ऽनुग्रहसामर्थ्यम्, सुखं चित्तसमाधिलक्षणम्, द्युतिः शरीराऽऽभरणादिप्रभा, लेश्या तेजोलेश्यादिका इति २, विशुद्धानि स्वविषयाविपर्यस्तज्ञानजननेन निर्मलानीन्द्रियाणि अवधिश्च यस्य स तथा, तद्भावस्तत्त्वम् ३, प्रकृष्टानि प्रकर्षवन्ति भोगसाधनानि भोगोपकरणानि ४, तान्येव दर्शयति- दिव्यो निजप्रभामण्डलविडम्बिताशेषतेजस्विचक्रो विमाननिवहः विमानसङ्घातः ५, मनोहराणि मनःप्रमोदप्रदानि अशोक-चम्पक-पुन्नाग-नागप्रभृतिवनस्पतिसमाकुलानि उद्यानानि वनानि ६, रम्या रन्तुं योग्याः जलाशयाः वापी-ह्रद-सरोवरलक्षणाः ७, कान्ताः कान्तिभाजः अप्सरसो देव्यः ८,

१. णकपू J. सं० ॥ दृश्यतां पृ. १४२ पं० ६, पृ० १४७ पं० १३॥

अतिनिपुणाः परिशुद्धविनयविधिविधायिनः किङ्कराः प्रतीतरूपा एव ९, प्रगल्भः प्रौढो नाट्यविधिः तीर्थकरादिचरितप्रतिबद्धाभिनयलक्षणः १०, चतुरोदारा चतुराः झटित्येवेन्द्रियचित्ताक्षेपदक्षा उदाराश्च उत्तमा भोगाः शब्दादयः श्रोत्रादीन्द्रियविषयाः ११, सदा सततं चित्ताह्लादो मनःप्रसादरूपः १२, अनेकेषां स्वव्यतिरिक्तानां देवादीनां तत्तन्नानाविधसमुचिताचारसमाचरणचातुर्यगुणेन सुखहेतुत्वं सन्तोषनिमित्तभावः १३, कुशलः परिणामसुन्दरोऽनुबन्धः सर्वकार्याणाम् १४, महाकल्याणकेषु जिनजन्म-महाव्रतप्रतिपत्त्यादिषु पूजायाः स्नात्र-पुष्पारोपण-धूपवास-प्रदानादिना प्रकारेण करणं निर्मापणम् १५, तीर्थकराणां निजप्रभावावर्जितजगत्त्रयजन्तुमानसानाममृत-मेघासाराका-रस[१]रसदेशनाविधिनिहतभव्यभविकजनमनःसन्तापानां पुरुषरत्नविशेषाणां सेवा वन्दन-नमन-पर्युपासन-पूजनादिनाऽ-ऽराधना १६, सतः पारमार्थिकस्य धर्मस्य श्रुतचारित्रलक्षणस्य श्रुतौ आकर्णने रतिः स्वर्गप्रभवतुम्बरुप्रभृतिगान्धर्वि-कारब्धपञ्चमस्वरगीतश्रवणरतेरपि सकाशादधिकसन्तोषलक्षणा १७, सदा सर्वकालं सुखित्वं बाह्यशयना-ऽऽसन-वस्त्रा-

१. सद्देशना J.॥

ऽलङ्कारादिजनितशरीरसुखयुक्तत्वम् १८॥८॥ तथा-

**तच्च्युतावपि विशिष्टे देशे विशिष्ट एव काले स्फीते महाकुले निष्कलङ्केऽन्वयेन उदग्रे सदाचारेण आख्यायिका-पुरुषयुक्ते अनेकमनोरथापूरकमत्यन्तनिरवद्यं जन्म ॥९॥४५२॥ इति ।**

तच्च्युतावपि देवलोकादवतारे, किं पुनस्तत्र सुखमेवेत्यपिशब्दार्थः, विशिष्टे देशे मगधादौ, विशिष्ट एव काले सुषमदुष्षमादौ स्फीते परिवारादिस्फीतिमति महाकुले इक्ष्वाक्वादौ निष्कलङ्के असदाचारकलङ्कपङ्कविकले अन्वयेन पितृ-पितामहादिपुरुषपरम्परया, अत एव उदग्रे उद्भटे, केनेत्याह-सदाचारेण देव-गुरु-स्वजनादि-समुचितप्रतिपत्तिलक्षणेन, आख्यायिका कथा तत्प्रतिबद्धा ये पुरुषास्तथाविधान्यासाधारणाचरणगुणेन तैर्युक्ते सम्बद्धे, किमित्याह- अनेकमनोरथापूरकं स्वजन-परजन-परिवारादिमनोऽभिलषितपूरणकारि, अत्यन्तनिरवद्यं शुभलग्न-शुभग्रहावलोकनादि विशिष्ट-गुणसमन्वितत्वेन एकान्ततो निखिलदोषविकलं जन्म प्रादुर्भाव इति ॥९॥ तत्र च यद्भवति तदाह-

**सुन्दरं रूपम्, आलयो लक्षणानाम्, रहितमामयेन, युक्तं प्रज्ञया, सङ्गतं कलाकलापेन ॥१०॥४५३॥इति ।**

सुन्दरं शुभसंस्थानवत्तया रूपम् आकारः, आलयो लक्षणानां चक्र-वज्र-स्वस्तिक-मीन-कलश-कमलादीनाम्, रहितं परित्यक्तमामयेन ज्वरा-ऽतीसार-भगन्दरादिना रोगेन, युक्तं सङ्गतं प्रज्ञया बहु-बहुविधादिविशेषणग्राहिकया वस्तुबोधशक्त्या, सङ्गतं सम्बद्धं कलानां लिपिशिक्षादीनां शकुनरुतपर्यवसानानां कलापेन समुदायेन ॥१०॥ तथा-

**गुणपक्षपातः १, असदाचारभीरुता २, कल्याणमित्रयोगः ३, सत्कथाश्रवणम् ४, मार्गानुगोबोधः ५, सर्वोचितप्राप्तिः हिताय सत्त्वसङ्घातस्य, परितोषकरी गुरूणाम्, संवर्द्धनी गुणान्तरस्य, निदर्शनं जनानाम् ६, अत्युदार आशयः ७, असाधारणा विषयाः, रहिताः सङ्क्लेशेन, अपरोपतापिनः, अमङ्गुलावसानाः ८ ॥११॥४५४॥ इति ।**

गुणाः शिष्टाचरितविशेषा असज्जनानभ्यर्थनादयः, तथा च पठन्ति -

*[१] असन्तो नाभ्यर्थ्याः सुहृदपि न याच्यस्तनुधनः, प्रिया वृत्तिर्न्याय्या मलिनमसुभङ्गेऽप्यसुकरम् ।*

*विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां, सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥२२०॥* [नीतिश.१८]

तेषां पक्षोऽभ्युपगमः, तत्र पातोऽवतार इति, अत एव असदाचारभीरुता चौर्यपारदार्याद्यनाचाराद् व्याधि-विष-प्रदीपनकादिभ्य इव दूरं भीरुभावः, कल्याणमित्रैः सुकृतबुद्धिनिबन्धनैर्जनैर्योगः सम्बन्धः, सतां सदाचाराणां गृहिणां यतीनां च कथाश्रवणं चरिताकर्णनम्, मार्गानुगो मुक्तिपथानुवर्ती बोधो वस्तुपरिच्छेदः, सर्वेषां धर्मार्थकामानामाराधनं प्रत्युचितानां वस्तूनां प्राप्ति र्लाभः सर्वोचितप्राप्तिः, कीदृश्यसाविति विशेषणचतुष्टयेनाह[२]-हिताय कल्याणाय सत्त्वसङ्घातस्य जन्तुजातस्य, परितोषकरी प्रमोददायिनी गुरूणां माता-पित्रादिलोकस्य, संवर्द्धनी वृद्धिकारिणी

---

१. ''प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरं त्वसन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः' इति गुजराती प्रिन्टिंगप्रेसमुद्रिते भर्तृहरिविरचिते नीतिशतके ॥

२. इतः परं हिताय सत्त्वसङ्घातस्य परितोषकरी गुरूणां संवर्द्धनी गुणान्तरस्य निदर्शनं जनानाम् इत्यधिकः पाठः L.सं. ॥

गुणान्तरस्य स्वपरेषां गुणविशेषस्य, निदर्शनं दृष्टान्तभूमिस्तेषु तेष्वाचरणविशेषेषु ज[१]नानां शिष्टलोकानाम्, तथाऽत्युदारो ऽतितीव्रौदार्यवान् आशयो मनःपरिणामः, असाधारणा अन्यैरसामान्याः शालिभद्रादीनामिव विषयाः शब्दादयः, रहिताः परिहीणाः सङ्क्लेशेन अत्यन्ताभिष्वङ्गेन, अपरोपतापिनः परोपरोधविकलाः, अमङ्गुलावसानाः पथ्यान्नभोग इव सुन्दरपरिणामाः ॥११॥ तथा-

**काले धर्मप्रतिपत्तिः॥१२॥४५५॥ इति ।**

काले विषयवैमुख्यलाभावसरलक्षणे धर्मप्रतिपत्तिः सर्वसावद्यव्यापारपरिहाररूपा ॥१२॥ तत्र च-

**गुरुसहायसम्पत् ॥१३॥४५६॥ इति ।**

गुर्वी सर्वदोषविकलत्वेन महती सहायानां गुरुगच्छादीनां सम्पत् सम्पत्तिः ॥१३॥ ततश्च-

**साधु संयमानुष्ठानम् ॥१४॥४५७॥ इति ।**

---

१. जनानां विशिष्टलोकानां K. ॥

साधु सर्वातिचारपरिहारतः शुद्धं संयमस्य प्राणातिपातादिपापस्थानविरमणरूपस्य अनुष्ठानं करणम् ॥१४॥ ततोऽपि-

**परिशुद्धाराधना ॥१५॥४५८॥ इति ।**

परिशुद्धा निर्मलीमसा आराधना जीवितान्तसंलेखनालक्षणा ॥१५॥ तत्र च-

**विधिवच्छरीरत्यागः ॥१६॥४५९॥ इति ।**

शास्त्रीयविधिप्रधानं यथा भवति एवं कलेवरपरिमोक्षः ॥१६॥ ततो

**विशिष्टत[1]रदेवस्थानम् ॥१७॥४६०॥ इति ।**

विशिष्टतरं प्राग्लब्धदेवस्थानापेक्षया सुन्दरतरं स्थानं विमानावासलक्षणमस्य स्यात् ॥१७॥ ततः

**सर्वमेव शुभतरं तत्र ॥१८॥४६१॥ इति ।**

१. तरं देव L. ॥

सर्वमेव रूपसम्पदादि शुभतरं प्राच्यापेक्षयाऽतीव शुभं तत्र स्थाने ॥१८॥ परं

**गतिशरीरादिहीनम् ॥१९॥४६२॥ इति ।**

गतिर्देशान्तरसञ्चाररूपा, शरीरं देहः, आदिशब्दात् परिवारप्रवीचारादिपरिग्रहस्तैर्हीनं तुच्छं स्यात्, उत्तरोत्तरदेवस्थानेषु पूर्वपूर्वदेवस्थानेभ्यो गत्यादीनां हीनतया शास्त्रेषु प्रतिपादनात् ॥१९॥ तथा-

**रहितमौत्सुक्यदुःखेन ॥२०॥४६३॥ इति ।**

रहितं-त्यक्तं चित्तवाक्कायत्वरारूपव्याबाधया ॥२०॥ पुनरपि कीदृगित्याह -

**अतिविशिष्टाह्लादादिमत् ॥२१॥४६४॥ इति ।**

अतिविशिष्टा अत्युत्कर्षभाजो ये आह्लादादय आह्लाद-कुशलानुबन्ध-महाकल्याणपूजाकरणादयः सुकृतविशेषास्तद्युक्तम् ॥२१॥ ततः

**तच्च्युतावपि विशिष्टदेश इत्यादि समानं पूर्वेण ॥२२॥४६५॥ इति ।**

सुगममेव । नवरं पूर्वेण इति पूर्वग्रन्थेन, स च विशिष्टे देशे विशिष्ट एव काले स्फीते महाकुले [सू०४५२] इत्यादिरूप इति ॥२२॥ विशेषमाह-

**विशिष्टतरं तु सर्वम् ॥२३॥४६६॥ इति ।**

प्रागुक्तादतिविशिष्टं पुनः सर्वम् अत्यन्तनिरवद्यं जन्म [सू०४५२] सुन्दररूपादि [सू०४५३] ॥२३॥ कुत एतदित्याह-

**क्लिष्टकर्मविगमात् ॥२४॥४६७॥ इति ।**

दौर्गत्य-दौर्भाग्य-दुष्कुलत्वादिपर्यायवेद्यकर्मविरहात् ॥२४॥ अयमपि

**शुभतरोदयात् ॥२५॥४६८॥ इति ।**

शुभतराणामतिप्रशस्तानां कर्मणां परिपाकात् ॥२५॥ असावपि

**जीववीर्योल्लासात् ॥२६॥४६९॥ इति ।**

जीववीर्यस्य परिशुद्धसामर्थ्यलक्षणस्य उल्लासाद् उद्रेकात् ॥२६॥ एषोऽपि

**परिणतिवृद्धेः ॥२७॥४७०॥ इति ।**

परिणतेस्तस्य तस्य शुभाध्यवसायस्य वृद्धेरुत्कर्षात् ॥२७॥ इयमपि

**तत्तथास्वभावत्वात् ॥२८॥४७१॥ इति ।**

तस्य जीवस्य तथास्वभावत्वात् परिणतिवृद्धिस्वरूपत्वात्, परिपक्के हि भव्यत्वे प्रतिक्षणं वर्द्धन्त एव जीवानां शुभतराः परिणतय इति ॥२८॥ किञ्च,

**प्रभूतोदाराण्यपि तस्य भोगसाधनानि, अयत्नोपनतत्वात् प्रासङ्गिकत्वादभिष्वङ्गाभावात् कुत्सिताप्रवृत्तेः शुभानुबन्धित्वा-दुदारसुखसाधनान्येव बन्धहेतुत्वाभावेन ॥२९॥४७२॥ इति ।**

प्रभूतानि प्रचुराणि उदाराणि उदग्राणि, किं पुनरन्यथारूपाणीति अपिशब्दार्थः, तस्य पूर्वोक्तजीवस्य भोगसाधनानि पुरपरिवाराऽन्तःपुरादीनि, उदारसुखसाधनान्येवेत्युत्तरेण योगः, कुत इत्याह-अयत्नोपनतत्वात्, अयत्नेन

अत्युद्गाढपुण्यप्रकर्षोदयपरिपाकाक्षिप्तत्वात् तथाविधपुरुषकाराभावेन उपनतत्वाद् ढौकितत्वात्, तदपि कुत इत्याह-प्रासङ्गिकत्वात् कृषिकरणे पलालस्येव प्रसङ्गोत्पन्नत्वात्, एतदपि अभिष्वङ्गाभावात्, भरतादीनामिव निबिडगृद्ध्यभावात्, अयमपि कुत्सिताप्रवृत्तेः कुत्सितेषु नीतिमार्गोत्तीर्णेषु भोगसाधनेष्वप्रवृत्तेः, इयमपि शुभानुबन्धित्वाद् मोक्षप्राप्तिनिमित्तार्यदेश-दृढसंहननादिकुशलकार्यानुबन्धविधा[१]यकत्वात्, किमित्याह-उदारसुखसाधनान्येव, उदारस्य अन्यातिशायिनः सुखस्यैव शरीरचित्ताह्लादरूपस्य साधनानि जनकानि, न त्विहलोक-परलोकयोरपि दुःख[२]स्य, अत्रैव तात्त्विकं हेतुमाह-बन्धहेतुत्वाभावेन, बन्धस्य कुगतिपातहेतोरशुभकर्मप्रकृतिलक्षणस्य हेतुत्वं हेतुभावः प्रक्रान्तभोगसाधनानामेव तस्याभावेन, इदमुक्तं भवति- प्रभूतोदाराण्यपि भोगसाधनानि बन्धहेतुत्वाभावादुदार-सुखसाधनान्येव तस्य भवन्ति, बन्धहेतुत्वाभावश्चायत्नोपनतत्वादिकादुत्तरोत्तर- हेतुबीजभूताद्धेतुपञ्चकादिति ॥२९॥

बन्धहेतुत्वाभावमेव विशेषतो भावयन्नाह-

---

१. विधायित्वात् L. ॥ २. दुःखस्येति अत्रैव L.॥

**अशुभपरिणाम एव हि प्रधानं बन्धकारणम्, तदङ्गतया तु बाह्यम् ॥३०॥४७३॥ इति ।**

अशुभपरिणाम एव हिर्यस्मात् प्रधानं मुख्यं बन्धकारणं नरकादिफलपापकर्मबन्धनिमित्तं न तु अन्यत् किञ्चित्, तदङ्गतया तु अशुभपरिणामकारणतया पुनर्बाह्यमन्तःपुरपुरादि बन्धकारणमिति ॥३०॥ कुत इत्याह-

**तदभावे बाह्यादल्पबन्धभावात् ॥३१॥४७४॥ इति ।**

तदभावे अशुभपरिणामाभावे बाह्याद् जीवहिंसादेरल्पबन्धभावात् तुच्छबन्धोत्पत्तेः ॥३१॥

एतदपि कथमित्याह-

**वचनप्रामाण्यात् ॥३२॥४७५॥ इति ।**

वचनस्य आगमस्य प्रामाण्यात् प्रमाणभावात् ॥३२॥

एतदेव भावयन्नाह-

**बाह्योपमर्देऽप्यसञ्ज्ञिषु तथाश्रुतेः ॥३३॥४७६॥ इति ।**

॥ ३१२ ॥

बाह्यः शरीरमात्रजन्यः स चासावुपमर्दश्च बहुतमजीवोपघातरूपस्तत्रापि, किं पुनस्तदभावे इति अपिशब्दार्थः, असञ्ज्ञिषु सम्मू[1]र्च्छनजमहामत्स्यादिषु तथा अल्पतया बन्धस्य श्रुतेः, *अस्सन्नी खलु पढमं* [बृहत्सं० २८४] इत्यादेर्वचनस्य सिद्धान्ते समाकर्णनात्, तथाहि - असञ्ज्ञिनो महामत्स्यादयो योजनसहस्रादिप्रमाणशरीराः स्वयम्भूरमणमहासमुद्रमनवरतमालो[2]डमानाः पूर्वकोट्यादिजीविनोऽनेकसत्त्वसङ्घातसंहारकारिणोऽपि रत्नप्रभापृथिव्यामेव उत्कर्षतः पल्योपमासङ्ख्येयभागजीविषु चतुर्थप्रतरवर्त्तिनारकेषु जन्म लभन्ते न परतः, तन्दुलमत्स्यस्तु बाह्योपमर्दाभावेऽपि निर्निमित्तमेवाऽऽपूरितातितीव्ररौद्रध्यानोऽन्तर्मुहूर्तमायुरनुपाल्य सप्तमनरकपृथिव्यां त्रयस्त्रिंशत्सागरोपमायुर्नारक उत्पद्यते इति परिणाम एव प्रधानं बन्धकारणमिति सिद्धं भवतीति ॥३३॥ एवं सति यदन्यदपि सिद्धिमास्कन्दति तद् दर्शयति-

**एवं परिणाम एव शुभो मोक्षकारणमपि ॥३४॥४७७॥ इति ।**

---

१. संमूर्च्छज K.॥ २. लोडयमाना L.K.सं० ॥

एवं यथा अशुभबन्धे, परिणाम एव[2] शु[3]भः सम्यग्दर्शनादिर्मोक्षकारणमपि मुक्तिहेतुरपि, किं पुनर्बन्धस्येति अपिशब्दार्थः॥३४॥ कुत इत्याह-

**तदभावे समग्रक्रियायोगेऽपि मोक्षासिद्धेः ॥३५॥४७८॥ इति ।**

तस्य शुभपरिणामस्याभावे समग्रक्रियायोगेऽपि परिपूर्णश्रामण्योचितबाह्यानुष्ठानकलापसम्भवेऽपि, किं पुनस्तदभावे इति अपिशब्दार्थो मोक्षासिद्धेर्निर्वाणानिष्पत्तेरिति ॥३५॥ एतदपि कुत इत्याह -

**सर्वजीवानामेवानन्तशो ग्रैवेयकोपपातश्रवणात् ॥३६॥४७९॥ इति।**

सर्वजीवानामेव सर्वेषामपि व्यवहाराहार्णां प्राणिनामनन्तशोऽनन्तान् वारान् ग्रैवेयकेषु विमानविशेषेषूपपातस्य उत्पत्तेः श्रवणात् शास्त्रे समाकर्णनात् ॥३६॥ यदि नामैवं ततः किं सिद्धमित्याह -

**समग्रक्रियाऽभावे तदप्राप्तेः ॥३७॥४८०॥ इति।**

१. एवं J.सं.॥ २. शुभसम्य J.॥

समग्रक्रियाऽभावे परिपूर्णश्रामण्यानुष्ठानाभावे तदप्राप्तेर्नवमग्रैवेयकोपपाताप्राप्तेः, तथा चावाचि -

*आणोहेणाणंता मुक्का गे[1]वेज्जगेसु य सरीरा । न य तत्थाऽ-संपुण्णाए साहुकिरियाए उववाओ ॥* [पञ्चा.१४।४८]

त्ति ॥२२१॥ उपसंहरन्नाह-

**इत्यप्रमादसुखवृद्ध्या तत्काष्ठासिद्धौ निर्वाणावाप्तिरिति ॥३८॥४८१॥ इति ।**

इति एवमुक्तनीत्याऽप्रमादसुखस्य अप्रमत्ततालक्षणस्य वृद्ध्या उत्कर्षेण तस्य चारित्रधर्मस्य काष्ठासिद्धौ प्रकर्षनिष्पत्तौ शैलेश्यवस्थालक्षणायां निर्वाणस्य सकलक्लेशलेशविनिर्मुक्तजीवस्वरूपलाभलक्षणस्यावाप्तिर्लाभ इतिः परिसमाप्ताविति ॥४१॥

**यत्किञ्चन शुभं लोके स्थानं तत्सर्वमेव हि। अनुबन्धगुणोपेतं धर्मादाप्नोति मानवः ॥४०॥ इति ।**

यत्किञ्चन सर्वमेवेत्यर्थः शुभं सुन्दरं लोके त्रिजगल्लक्षणे स्थानं शक्राद्यवस्थास्वभावं तत्सर्वमेव हिः स्फुटम्,

१. गेवेज्जगेसू सरीरा L.J. । गेवेज्जगेसु सरीरा K. मू. । गेवेज्जगेसु य सरीरा K. सं.

कीदृशमित्याह - अनुबन्धगुणोपेतं जात्यस्वर्णघटितघटादिवदुत्तरोत्तरानुबन्धसमन्वितं धर्मादुक्तनिरुक्ताद् आप्नोति लभते मानवः पुमान्, मानवग्रहणं च तस्यैव परिपूर्णधर्मसाधनसहत्वादिति ॥१॥ तथा-

**धर्मश्चिन्तामणिः श्रेष्ठो धर्मः कल्याणमुत्तमम् । हित एकान्ततो धर्मो धर्म एवामृतं परम् ॥४१॥ इति ।**

एतन्निगदसिद्धमेव, परं यत् पुनः पुनर्धर्मशब्दोपादानं तद्धर्मस्यात्यन्तादरणीयताख्यापनार्थमिति ॥२॥ तथा-

**चतुर्दशमहारत्नसद्भोगान्नृष्वनुत्तमम् । चक्रवर्त्तिपदं प्रोक्तं धर्महेलाविजृम्भितम् ॥४२॥ इति ।**

चतुर्दशानां महारत्नानां सेनापति-गृहपति-पुरोहित-गज-तुरग-वर्द्धकि-स्त्री-चक्र-च्छत्र-चर्म-मणि-काकिणी-खड्ग-दण्डलक्षणानां सद्भोगात् परानपेक्षितया सुन्दराद् भोगाद् नृषु नरेषु मध्ये अनुत्तमं सर्वप्रधानम्, किं तदित्याह-चक्रवर्त्तिपदं चक्रधरपदवी प्रोक्तं प्रतिपादितं सिद्धान्ते धर्महेलाविजृम्भितं धर्मलीलाविलसितमिति ॥३॥

**इति श्रीमुनिचन्द्रसूरिविरचितायां धर्मबिन्दुवृत्तौ धर्मफलविधिः सप्तमोऽध्यायः समाप्तः॥**

## अथ अष्टमोऽध्यायः ।

व्याख्यातः सप्तमोऽध्यायः। अधुनाऽष्टम आरभ्यते, तस्य चेदमादिसूत्रम् -

**किं चेह बहुनोक्तेन तीर्थकृत्त्वं जगद्धितम् । परिशुद्धादवाप्नोति धर्माभ्यासान्नरोत्तमः ॥४३॥** इति ।

किञ्च इत्यभ्युच्चये, इह धर्मफलचिन्तायां बहुना प्रचुरेणोक्तेन धर्मफलेन? यतः तीर्थकृत्त्वं तीर्थ[कर]पदलक्षणं जगद्धितं जगज्जन्तुजातहिताधानकरं परिशुद्धादमलीमसाद् अवाप्नोति लभते धर्माभ्यासाद् प्रतीतरूपाद् नरोत्तमः स्वभावत एव सामान्यापरपुरुषप्रधानः, तथाहि-ती[1]र्थकरपदप्रायोग्यजन्तूनां सामान्यतोऽपि लक्षणमिदं शास्त्रेषूद्घुष्यते यथा-*एते आकालं परार्थव्यसनिन उपसर्जनीकृतस्वार्था उचितक्रियावन्तोऽदीनभावाः सफलारम्भिणः अदृढानुशयाः कृतज्ञतापतयो ऽनुपहतचित्ता देवगुरुबहुमानिनस्तथा गम्भीराशयाः* [ललित०] इति ॥१॥

ननु यदि तीर्थकृत्त्वं धर्मादेवाप्नोति तथापि कथं तदेव प्रकृष्टं धर्मफलमिति ज्ञातुं शक्यमित्याह-

---

१. 'करपदयोग्य' K. । 'करप्रायोग्य L. ॥

**नातः परं जगत्यस्मिन् विद्यते स्थानमुत्तमम्। तीर्थकृत्त्वं यथा सम्यक् स्वपरार्थप्रसाधकम् ॥४४॥ इति ।**

न नैव अतस्तीर्थकृत्त्वात् परमन्यद् जगत्यस्मिन्नुपलभ्यमाने चराचरस्वभावे विद्यते समस्ति स्थानं पदम् उत्तमं प्रकृष्टं तीर्थकृत्त्वम् उक्तरूपं यथा येन प्रकारेण सम्यग् यथावत् स्वपरार्थप्रसाधकं स्वपरप्रयोजननिष्पादकम् ॥२॥ एतदेव भावयति-

**पञ्चस्वपि महाकल्याणेषु त्रैलोक्यशङ्करम्। तथैव स्वार्थसंसिद्ध्या परं निर्वाणकारणम् ॥४५॥ इति ।**

पञ्चस्वपि, न पुनरेकस्मिन्नेव क्वचित्, महाकल्याणेषु गर्भाधान-जन्मदिनादिषु त्रैलोक्यशङ्करं जगत्त्रयसुखकारि, तीर्थकृत्त्वमित्यनुवर्त्तते, इत्थं परार्थसाधकत्वमुक्त्वा स्वार्थसाधकत्वमाह - तथैव त्रैलोक्यसु[१]खकरणप्रकारेण स्वार्थसंसिद्ध्या क्षायिकसम्यग्दर्शन-ज्ञान-चारित्रनिष्पत्त्या परं प्रधानं निर्वाणकारणं

१. सुखकरणप्रका K. मू. । सुखकरप्रका K. सं. ॥

मुक्तिहेतुरिति ॥३॥

**इत्युक्तप्रायं धर्मफलम्, इदानीं तच्छेषमेव उदग्रमनुवर्णयिष्यामः ॥१॥४८२॥ इति ।**

सुगममेव, परं तच्छेषम् इति धर्मफलशेषम् ॥१॥ एतदेव दर्शयति-

**त[1]च्च सुखपरम्परया प्रकृष्टभावशुद्धेः सामान्यचरमजन्म तथा तीर्थकृत्त्वं च ॥२॥४८३॥ इति ।**

तच्च तत् पुनर्धर्मफलशेषमुदग्रं परम्परया उत्तरोत्तरक्रमेण प्रकृष्टभावशुद्धेः सकाशात्, किमित्याह- सामान्यचरमजन्म, सामान्यं तीर्थकराऽतीर्थकरयोः समानं चरमजन्म अपश्चिमदेहलाभलक्षणम् तथेति पक्षान्तरोपक्षेपे तीर्थकृत्त्वं तीर्थकरभावलक्षणम्, चः समुच्चये ॥२॥

**तत्राक्लिष्टमनुत्तरं विषयसौख्यम्, हीनभावविगमः, उदग्रत[2]रसम्पत्, प्रभूतोपकारकरणम्, आशयविशुद्धिः, धर्मप्रधानता, अवन्ध्यक्रि[3]यत्वम् ॥३॥४८४॥ इति ।**

---

१. प्रतिषु पाठाः- तच्च सुखपरंपरया K मू०१ J१ K.L. । तच्च सुखं परंपरया J.। तच्च परंपरया K. सं०१॥ २. 'तरा सम्पत् K.मू०१ । तरसम्पत् K. सं०१ ॥ ३. क्रियात्वम J.१ विना॥

तत्र सामान्यतश्चरमजन्मनि अक्लिष्टं परिणामसुन्दरम् अनुत्तरं शेषभोगसौख्येभ्यः प्रधानं विषयसौख्यं शब्दादिसेवालक्षणम्, हीनभावविगमो जाति-कुल-विभव-वयो-ऽवस्थादिन्यूनता-रूपहीनत्वविरहः, उदग्रतरा प्राग्भवेभ्योऽत्यन्तोच्चा सम्पद् द्विपदचतुष्पदादिसमृद्धिः, तस्यां च प्रभूतस्य अतिभूयिष्ठस्य उपकारस्य स्वपरगतस्य करणं विधानम्, अत एव आशयस्य चित्तस्य विशुद्धिरमालिन्यरूपा, धर्मप्रधानता धर्मैकसारत्वम्, अतिनिपुणविवेकवशोपलब्धयथावस्थितसमस्तवस्तुतत्त्वतया अवन्ध्या अनिष्फला क्रिया धर्मार्थाद्याराधनरूपा यस्य तद्भावस्तत्त्वम् ॥३॥ तथा-

**विशुद्ध्यमानाप्रतिपातिचरणावाप्तिः, तत्सात्म्यभावः, भव्यप्रमोदहेतुता, ध्यानसुखयोगः, अतिशयर्द्धिप्राप्तिः ॥४॥४८५॥ इति ।**

विशुद्ध्यमानस्य सङ्क्लिश्यमानविलक्षणतया अप्रतिपातिनः कदाचिदप्यभ्रंशभाजः चरणस्य चारित्रस्य अवाप्तिर्लाभः, ततश्च तेन विशुद्ध्यमानाप्रतिपातिना चरणेन सात्म्यं समानात्मता तत्सात्म्यम्, तेन सहैकीभाव इत्यर्थः,

तेन भावो भवनं परिणतिरिति, भ[1]व्यप्रमोदहेतुता ध्यानसुखयोगः भव्यजनसन्तोषकारित्वं ध्यानसुखस्य शेषसुखातिशायिनः चित्तनिरोधलक्षणस्य योगः, अतिशयर्द्धिप्राप्तिरतिशयर्द्धेरामर्षौषध्यादिरूपायाः प्राप्तिः ॥४॥ ततश्च कालेन-

**अपूर्वकरणम्, क्षपकश्रेणिः, मोहसागरोत्तारः, केवलाभिव्यक्तिः, परमसुखलाभः ॥५॥४८६॥इति ।**

अपूर्वाणां स्थितिघात-रसघात-गुणश्रेणि-गुणसङ्क्रमा-ऽपूर्व-स्थितिबन्धलक्षणानां पञ्चानामर्थानां प्राच्यगुणस्थानेष्वप्राप्तानां करणं यत्र तदपूर्वकरणमष्टमगुणस्थानकम्, ततश्च क्षपकस्य घातिकर्मप्रकृतिक्षयकारिणो यतेः श्रेणिर्मोहनीयादिप्रकृतिक्षयक्रमरूपा सम्पद्यते, क्षपकश्रेणिक्रमश्चायम् - इह परिपक्वसम्यग्दर्शनादिगुणो जीवश्चरमदेहवर्त्ती अविरत-देशविरत-प्रमत्ताप्रमत्त-संयतान्यतरगुणस्थानकस्थः प्रवृद्धतीव्रशुद्धध्यानाधीनमानसः क्षपकश्रेणिमारुरुक्षुरपूर्वगुणस्थानकमवाप्य प्रथमतः चतुरोऽनन्तानुबन्धिनः क्रोधादीन् युगपत् क्षपयितुमारभते, ततः

१. भव्यप्रमोदहेतुता भव्यजनसन्तोषकारित्वं ध्यानसुखस्य L.J.। भव्य-प्रमोदहेतुता भव्यजनसन्तोषकारित्वं ध्यानसुखयोगः ध्यानसुखस्य मु० ॥

सावशेषेष्वेतेषु मिथ्यात्वं क्षपयितुमुपक्रमते, ततस्तदवशेषे मिथ्यात्वे च क्षीणे सम्यग्मिथ्यात्वं सम्यक्त्वं च क्रमेणोच्छिनत्ति, तदनन्तरमेवाबद्धायुष्कोऽनिवृत्तिकरणं नाम सकलमोहापोहैकसहं नवमगुणस्थानकमध्यारोहति, तत्र च तथैव प्रतिक्षणं विशुद्ध्यमानः कियत्स्वपि सङ्ख्यातेषु भागेषु गतेष्वष्टौ कषायान् अप्रत्याख्यानावरण-प्रत्याख्यानावरणसञ्ज्ञितान् क्रोधादीनेव क्षपयितुमारभते, क्षीयमाणेषु च तेष्वेताः षोडश प्रकृतीरध्यवसायविशेषाद् निद्रानिद्रा १ प्रचलाप्रचला २ स्त्यानगृद्धि ३ नरकगति ४ नरकानुपूर्वी ५ तिर्यग्गति ६ तिर्यगानुपूर्वी ७ एकेन्द्रिय ८ द्वीन्द्रिय ९ त्रीन्द्रिय १० चतुरिन्द्रियजातिनाम ११ आतपनाम १२ उद्योतनाम १३ स्थावरनाम १४ साधारणनाम १५ सूक्ष्मनाम १६ लक्षणाः क्षपयति, ततोऽष्टकषायावशेषक्षये यदि पुरुषः प्रतिपत्ता ततो नपुंसकवेदं ततः स्त्रीवेदं ततो हास्यादिषट्कं ततः पुनः पुरुषवेदं क्षपयति, यदि पुनर्नपुंसकं स्त्री वा तदा पुरुषवेदस्थाने स्ववेदमितरवेदद्वयं च यथाजघन्यप्रथमतया क्षपयति, ततः क्रमेण क्रोधादीन् सञ्ज्वलनान् त्रीन्[1] बादरलोभं चात्रैव क्षपयित्वा

सूक्ष्मसम्परायगुणस्थाने च सूक्ष्मम्, सर्वथा विनिवृत्तसकलमोहविकारां क्षीणमोहगुणस्थानावस्थां संश्र[२]यते, तत्र च समुद्रप्रतरणश्रान्तपुरुषवत् सङ्ग्रामाङ्गणनिर्गतपुरुषवद्वा मोहनिग्रहनिश्चलनिबद्धाध्यवसायतया परिश्रान्तः सन्नन्तर्मुहूर्त्तं विश्रम्य तद्गुणस्थानकद्विचरमसमये निद्राप्रचले चरमसमये च ज्ञानावरणान्तरायप्रकृतिदशकं दर्शनावरणावशिष्टं प्रकृतिचतुष्कं च युगपदेव क्षपयति । बद्धायुः पुनः सप्तकक्षयानन्तरं विश्रम्य यथानिबद्धं चायुरनुभूय भवान्तरे क्षपकश्रेणिं समर्थयत इति यश्चात्रापूर्वकरणोपन्यासानन्तरं क्षपकश्रेणेरुपन्यासः स सैद्धान्तिकपक्षापेक्षया, यतो दर्शनमोहसप्तकस्यापूर्वकरणस्थ एव। क्षयं करोतीति तन्मतम्, न तु यथा कार्मग्रन्थिका भिप्रायेण अविरतसम्यग्दृष्ट्याद्यन्यतरगुणस्थानकचतुष्टयस्थ इति ।

ततो मोहसागरोत्तारः, मोहो मिथ्यात्वमोहादिः स एव सागरः स्वयम्भूरमणादिपारावारः मोहसागरः, तस्मादुत्तारः परपारप्राप्तिः, ततः केवलाभिव्यक्तिः, केवलस्य केवलज्ञान-केवल-दर्शनलक्षणस्य जीवगुणस्य ज्ञानावरणादिघातिकर्मोपरतावभिव्यक्तिराविर्भावः, ततः परमसुखलाभः, परमस्य प्रकृष्टस्य देवादिसुखातिशायिनः सुखस्य

१. त्रीनतः बादर K. ॥ २. संश्रयति K. ॥

लाभः प्राप्तिः, उक्तं च-

*यं च्च कामसुखं लोके यच्च दिव्यं महासुखम् । वीतरागसुखस्येदमनन्तांशे न वर्त्तते ॥२२२॥* [ ] इति ॥५॥

अत्रैव हेतुमाह-

**सदारोग्याप्तेः ॥६॥४८७॥ इति ।**

सदारोग्यस्य भावारोग्यरूपस्य आप्तेर्लाभात् ॥६॥ इयमपि कुत इत्याह-

**भावसन्निपातक्षयात् ॥७॥४८८॥ इति ।**

भावसन्निपातस्य पारमार्थिकरोगविशेषस्य क्षयादुच्छेदात् ॥७॥ सन्निपातमेव व्याचष्टे

**राग-द्वेष-मोहा हि दोषाः, तथा तथाऽऽत्मदूषणात् ॥८॥४८९॥ इति ।**

---

१. ''यच्च कामसुखं लोके यच्च दिव्यं महत् सुखम्। तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ('तृष्णाक्षयसुखस्यैतत् कलां नार्हति षोडशीम्' इति प्रत्यन्तरे) ॥'' इति महाभारते शान्तिपर्वणि १२।१६८।३६, १२।१७१।५१, १२।२६८।६ ॥

राग-द्वेष-मोहा वक्ष्यमाणलक्षणाः हिः स्फुटं दोषा भावसन्निपातरूपा, अत्र हेतुमाह-तथा तथा तेन तेन प्रकारेण अभिष्वङ्गकरणादिना आत्मनो जीवस्य दूषणाद् विकारप्रापणात् ॥८॥ तत्त्व-भेद-पर्यायैर्व्याख्येति न्यायाद् रागादीनेव तत्त्वत आह-

**अविषयेऽभिष्वङ्गकरणाद् रागः॥९॥४९०॥ इति ।**

अविषये प्रकृतिविशरारुतया मतिमतामभिष्वङ्गानर्हे स्त्र्यादौ वस्तुनि अभिष्वङ्गकरणात्चित्तप्रतिबन्धसम्पादनात्, किमित्याह-रागो दोषः ॥९॥

**तत्रैवाग्निज्वालाकल्पमात्सर्यापादनाद् द्वेषः ॥१०॥४९१॥ इति ।**

तत्रैव क्वचिदर्थेऽभिष्वङ्गे सति अग्निज्वालाकल्पस्य सम्यक्त्वादिगुणसर्वस्वदाहकतया मात्सर्यस्य पर[१]सम्पत्त्य-सहिष्णुभावलक्षणस्य आपादनाद् विधानाद् द्वेषो दोषः ॥१०॥

१. परं प्रत्यसहिष्णु J. ॥

**हेयेतरभावाधिगमप्रतिबन्धविधानान्मोहः ॥११॥४९२॥ इति ।**

इह निश्चयनयेन हेयानां मिथ्यात्वादीनाम् इतरेषां च उपादेयानां सम्यग्दर्शनादीनां भावानां व्यवहारतस्तु विष-कण्टकादीनां स्रक्-चन्दनादीनां च अधिगमस्य अवबोधस्य प्रतिबन्धविधानात् स्खलनकरणाद् मोहो दोषः॥११॥ अथैतेषां भावसन्निपातत्वं सम[1]र्थयन्नाह-

**सत्स्वेतेषु न यथावस्थितं सुखम्, स्वधातुवैषम्यात् ॥१२॥४९३॥ इति ।**

सत्स्वेतेषु रागादिषु न नैव यथावस्थितं पारमार्थिकं सुखं जीवस्य, अत्र हेतुः- स्वधातुवैषम्याद् दधति धारयन्ति जीवस्वरूपमिति धातवः सम्यग्दर्शनादयो गुणाः, स्वस्य आत्मनो धा[2]तवः, तेषां वैषम्यात्

१. समर्थयमान L. ॥ समर्थमान J. ॥ २. धातवः २ तेषां मु.। अत्र 'धातवः स्वधातवः' इति २ अङ्कस्य लिखने तात्पर्य भाति ॥

यथावस्थित[१]वस्तुस्वस्वरूपपरिहारेणान्यथारूपतया भवनं तस्मात्, यथा हि वातादिदोषोपघाताद्धातुषु रसासृगादिषु वैषम्यापन्नेषु न देहिनो यथावस्थितं कामभोगजं मनःसमाधिजं वा शर्म किञ्चन लभन्ते तथा अमी संसारिणः सत्त्वाः रागादिदोषवशात् सम्यग्दर्शनादिषु मलीमसरूपतां प्राप्तेषु न राग-द्वेष-मोहोपशमजं शर्म समासादयन्तीति ॥१२॥ अमुमेवार्थं व्यतिरेकत आह -

**क्षीणेषु न दुःखम्, निमित्ताभावात् ॥१३॥४९४॥ इति ।**

क्षीणेषु रागादिषु न दुःखं भावसन्निपातजं समुत्पद्यते, कुत इति चेदुच्यते- निमित्ताभावात् निबन्धनविरहादिति ॥१३॥ तर्हि किं स्यादित्याह-

**आत्यन्तिकभावरोगविगमात् परमेश्वरताऽऽप्तेस्तत्तथास्वभावत्वात् परमसुखभाव इति ॥१४॥४९५॥ इति ।**

१. स्थितस्वस्वरूप J. मू० । 'स्थितस्वरूप' J. सं० L. ॥

आत्यन्तिकः पुनर्भावाभावेन भावरोगाणां रागादीनां यो विगमः समुच्छेदः, तस्माद् या परमेश्वरतायाः शक्र-चक्राधिपाद्यैश्वर्यातिशायिन्याः केवलज्ञानादिलक्षणाया आप्तिः प्राप्तिः तस्याः, परमसुखभाव इत्युत्तरेण योगः, कुत इत्याह- तत्तथास्वभावत्वात्, तस्य परमसुखलाभस्य तथास्वभावत्वात् परमेश्वरतारूपत्वात्, परमसुखभावः सम्पद्यते, इतिः वाक्यपरिसमाप्ताविति ॥१४॥

इत्थं तीर्थकरातीर्थकरयोः सामान्यमनुत्तरं धर्मफलमभिधाय साम्प्रतं तीर्थकृत्त्वलक्षणं तदभिधातुमाह-

**देवेन्द्रहर्षजननम् ॥१५॥४९६॥ इति ।**

देवेन्द्राणां चमर[1]-चन्द्र-शक्रादीनां हर्षस्य सन्तोषस्य जननं सम्पादनमिति ॥१५॥ तथा-

**पूजानुग्रहाङ्गता ॥१६॥४९७॥ इति ।**

पूजया जन्मकालादारभ्याऽऽनिर्वाणप्राप्तेस्तत्तन्निमित्तेन निष्पादितया अमरगिरिशिखरमज्जनादिरूपया योऽनुग्रहो

---

१. चमरशक्रादीनां K.॥

निर्वाणबीजलाभभूतो जगत्त्रयस्याप्युपकारः तस्याङ्गता कारणभावः, भगवतो हि प्रतीत्य त[1]त्तन्निबन्धनाया भक्तिभरनिर्भरामरप्रभुप्रभृतिप्रभूतसत्त्वसम्पादितायाः पूजायाः सकाशात् भूयसां भव्यानां मोक्षानुगुणो महानुपकारः सम्पद्यते इति ॥१६॥ तथा-

**प्रातिहार्योपयोगः ॥१७॥४९८॥ इति ।**

प्रतिहारकर्म प्रातिहार्यम्, तच्च अशोकवृक्षादि, यदवाचि-

*अशोकवृक्षः सुरपुष्पवृष्टिर्दिव्यो ध्वनिश्चामरमासनं च । भामण्डलं दुन्दुभिरातपत्रं सत्प्रातिहार्याणि जिनेश्वराणाम्* ॥२२३॥ तस्योपयोग उपजीवनमिति ॥१७॥ ततः

**परं परार्थकरणम् ॥१८॥४९९॥ इति ।**

परं प्रकृष्टं परार्थस्य परप्रयोजनस्य सर्वसत्त्वस्वभाषा-परिणामिन्या पीयूषपानसमधिकानन्ददायिन्या सर्वतोऽपि

१ L. विना-तःतन्निब J. । तत्तनिब K.. ॥

योजनमानभूमिभागयायिन्या वाण्या अन्यैश्च तैस्तैश्चित्रैरुपायैः करणं निष्पादनमिति ॥१८॥

एतदेव 'अविच्छेदेन' इत्यादिना 'इति परं परार्थकरणम्' एतदन्तेन सूत्रकदम्बकेन स्फुटीकुर्वन्नाह-

**अविच्छेदेन भूयसां मोहान्धकारापनयनं हृद्यैर्वचनभानुभिः ॥१९॥५००॥ इति ।**

अविच्छेदेन यावज्जीवमपि भूयसामनेकलक्षकोटिप्रमाणानां भव्यजन्तूनां मोहान्धकारस्य अज्ञानान्धतम[स]-स्यापनयनमपसारो हृद्यै र्हृदयङ्गमैर्वचनभानुभिर्वाक्यकिरणैः ॥१९॥ मोहान्धकारे चापनीते यत् स्यात् प्राणिनां तदाह-

**सूक्ष्मभावप्रतिपत्तिः॥२०॥५०१॥ इति ।**

सूक्ष्माणामनिपुणबुद्धिभिरगम्यानां भावानां जीवादीनां प्रतिपत्तिरवबोधः ॥२०॥ ततः-

**श्रद्धामृतास्वादनम् ॥२१॥५०२॥ इति ।**

सूक्ष्मभावेष्वेव या श्रद्धा रुचिः सैवामृतं त्रिदशभोजनं तस्यास्वादनं हृ[१]दयजिह्वया समुपजीवनमिति ॥२१॥

---

१. हृद्जिह्वया L. ॥

ततः-

**सदनुष्ठानयोगः ॥२२॥५०३॥ इति ।**

सदनुष्ठानस्य साधुगृहस्थधर्माभ्यासरूपस्य योगः सम्बन्धः ॥२२॥ ततः-

**परमापायहानिः ॥२३॥५०४॥ इति ।**

परमा प्रकृष्टा अपायहानिर्नार[१]कादिकुगतिप्रवेशलभ्यानर्थसार्थोच्छेदः॥२३॥ ततोऽपि उपक्रियमाणभव्यप्राणिनां यत् स्यात् तदाह-

**सानुबन्धसुखभाव उत्तरोत्तरः प्रकामप्रभूतसत्त्वोपकाराय अवन्ध्यकारणं निर्वृतेः ॥२४॥५०५॥ इति ।**

सानुबन्धसुखभाव उत्तरोत्तर उत्तरेषु प्रधानेषूत्तरः प्रधानः प्रकामः प्रौढः प्रभूतोऽतिबहुर्यः सत्त्वोपकारः तस्मै

१. ''नरकस्तु नारकः स्यान्निरयो दुर्गतिश्च सः'' ॥ इति अभिधानचिन्तामणौ ५।२।१३५९॥ ''नरकस्य बाहुलकाद् दीर्घत्वे नारकः, नरं कायत्यत्र वा'' इति स्वोपज्ञवृतौ ॥

सम्पद्यते, स च अवन्ध्यकारणमवन्ध्यो हेतुर्निर्वृतेर्निर्वाणस्य ॥२४॥ निगमयन्नाह-

**इति परं परार्थकरणम् ॥२५॥५०६॥ इति ।**

इति एवं यथा प्रागुक्तं परं परार्थकरणं तस्य भगवत इति॥२५॥ साम्प्रतं पुनरप्युभयोः साधारणं धर्मफलमाह-

**भवोपग्राहिकर्मविगमः ॥२६॥५०७॥ इति ।**

परिपालि[1]तपूर्वकोट्यादिप्रमाणसयोगकेवलिपर्याययोरन्ते भवोपग्राहिकर्मणां वेदनीयाऽऽयुर्नामगोत्ररूपाणां विगमो नाशो जायते ॥२६॥ ततः-

**निर्वाणगमनम् ॥२७॥५०८॥ इति ।**

निर्वान्ति देहिनोऽस्मिन्निति निर्वाणं सिद्धिक्षेत्रं जीवस्यैव स्वरूपावस्थानं वा तत्र गमनम् अवतारः॥२७॥ तत्र च-

१. लितदेशूनपूर्व J. सं.॥

**पुनर्जन्माद्यभावः ॥२८॥५०९॥ इति ।**

पुनः द्वितीयतृतीयादिवारया जन्मादीनां जन्म-जरा-मरण-प्रभृतीनामनर्थानामभाव आत्यन्तिकोच्छेदः ॥२८॥ अत्र हेतुः-

**बीजाभावतोऽयम् ॥२९॥५१०॥ इति ।**

बीजस्य अनन्तरमेव वक्ष्यमाणस्याभावाद् अयं पुनर्जन्माद्यभाव इति ॥२९॥ बीजमेव व्याचष्टे-

**कर्मविपाकस्तत् ॥३०॥५११॥ इति ।**

कर्मणां ज्ञानावरणादीनां विपाक उदयस्तत् पुनर्जन्मादिबीजमिति ॥३०॥ न च वक्तव्यमेषोऽपि निर्वाणगतो जीवः सकर्मा भविष्यति इत्याह-

**अकर्मा चासौ ॥३१॥५१२॥ इति ।**

अकर्मा च कर्मविकलश्च असौ निर्वाणशरणो जीवः ॥३१॥ भवतु नाम अकर्मा, तथापि पुनर्जन्माद्यस्य

भविष्यतीत्याह

**तद्वत एव तद्ग्रहः ॥३२॥५१३॥ इति ।**

तद्वत एव कर्मवत एव तद्ग्रहः पुनर्जन्मादिलाभः ॥३२॥ ननु क्रियमाणत्वेन कर्मण आदिमत्त्वप्रसङ्गेन कथं सर्वकालं कर्मवत एव तद्ग्रह इत्याशङ्क्याह -

**तदनादित्वेन तथाभावसिद्धेः ॥३३॥५१४॥ इति ।**

तस्य कर्मणः कृतकत्वेऽप्यनादित्वेन द्वितीयाध्याय-प्रपञ्चितयुक्त्या तथाभावस्य तद्वत एव तद्ग्रहरूपस्य सिद्धेः निष्पत्तेरिति ॥३३॥

*ननु ज्ञानिनो धर्मतीर्थस्य, कर्त्तारः परमं पदम् । गत्वाऽऽगच्छन्ति भूयोऽपि, भवं तीर्थनिकारतः ॥२२४॥* [ ] इति वचनप्रामाण्यात् कथं नाकर्मणोऽपि जन्मादिग्रह इत्याशङ्क्याह -

**सर्वविप्रमुक्तस्य तु तथास्वभावत्वान्निष्ठितार्थत्वान्न तद्ग्रहणे निमित्तम् ॥३४॥५१५॥ इति ।**

सर्वेण कर्मणा विप्रमुक्तस्य पुनस्तथास्वभावत्वात् तत्प्रकाररूपत्वात्, किमित्याह-निष्ठितार्थत्वाद् निष्पन्ननिःशेषप्रयोजनत्वाद्धेतोः नैव तद्ग्रहणे जन्मादिग्रहणे निमित्तं हेतुः समस्तीति, अयमभिप्रायः- यो हि सर्वैः कर्मभिः सर्वथापि विप्रमुक्तो भवति न तस्य जन्मादिग्रहणे किञ्चिन्निमित्तं समस्ति, निष्ठितार्थत्वेन जन्मादिग्राहकस्वभावाभावात्, यश्च तीर्थनिकारलक्षणो हेतुः कैश्चित् परिकल्प्यते सोऽप्यनुपपन्नः कषाय-विकारजन्यत्वात् तस्येति ॥३४॥ एवं च सति यत् सिद्धं तदाह-

**नाजन्मनो जरा ॥३५॥५१६॥ इति ।**

न नैव अजन्मन उत्पादविकलस्य जरा वयोहानिलक्षणा सम्पद्यते ॥३५॥ एवं च

**न मरणभयशक्तिः ॥३६॥५१७॥ इति ।**

नेति प्रतिषेधे मरणभयस्य प्रतीतरूपस्य सबन्धिनी शक्तिः बीजरूपेति ॥३६॥ तथा-

**न चान्य उपद्रवः ॥३७॥५१८॥ इति ।**

न च नैव अन्यः तृष्णाबुभुक्षादिरुपद्रवो व्यसनम् ॥३७॥ तर्हि किं तत्र स्यादित्याशङ्क्याह-

**विशुद्धस्वरूपलाभः ॥३८॥५१९॥ इति ।**

विशुद्धं निर्मलीमसं यत् स्वरूपं तस्य लाभः प्राप्तिः॥३८॥ तथा-

**आत्यन्तिकी व्याबाधानिवृत्तिः ॥३९॥५२०॥ इति ।**

अत्यन्तं भवा आत्यन्तिकी व्याबाधानिवृत्तिः शारीरमानसव्यथाविरहः ॥३९॥ तामेव विशिनष्टि-

**सा निरुप[1]मं सुखम् ॥४०॥५२१॥ इति ।**

सा आत्यन्तिकी व्याबाधानिवृत्तिर्निरुपममुपमानातीतं सुखम् ॥४०॥ अत्र हेतुः-

**सर्वत्राप्रवृत्तेः ॥४१॥५२२॥ इति ।**

सर्वत्र हेये उपादेये च वस्तुनि अप्रवृत्तेर[2]व्यापरणात् ॥४१॥ इयमपि कथमित्याह-

१. परमसुखम् J. १. J.L. ॥ २. अव्यापारणात् K. ॥

**समाप्तकार्यत्वात् ॥४२॥५२३॥ इति ।**

समाप्तानि निष्ठितानि कार्याणि यस्य स तथा, तद्भावस्तत्त्वं तस्मात् ॥४२॥ अत्रैवाभ्युच्चयमाह-

**न चैतस्य क्वचिदौत्सुक्यम् ॥४३॥५२४॥ इति ।**

न नैव चः समुच्चये एतस्य निर्वृतस्य जन्तोः क्वचिदर्थे औत्सुक्यं काङ्क्षारूपम् ॥४३॥ ननु किमि[१]त्येतन्निषिध्यत इत्याह -

**दुःखं चैतत् स्वास्थ्यविनाशनेन ॥४४॥५२५॥ इति ।**

दुःखं पुनरेतद् औत्सुक्यम्, कथमित्याह- स्वास्थ्यविनाशनेन स्वास्थ्यस्य सर्वसुखमूलस्यापनयनेन ॥४४॥ यदि नामौत्सुक्यात् स्वास्थ्यविनाशस्तथापि कथमस्य दुःखरूपतेत्याशङ्क्याह-

**दुःखशक्त्युद्रेकतोऽस्वास्थ्यसिद्धेः ॥४५॥५२६॥ इति ।**

१. किमेतन्नि L.॥

दुःखशक्तेर्दुःखबीजरूपाया उद्रेकत उद्भवात् सकाशाद् अस्वास्थ्यस्य स्वा[1]त्मन्येवास्वस्थतारूपस्य सिद्धेः सम्भवात् ॥४५॥ अस्वास्थ्यसिद्धिरपि कथं गम्या इत्याह-

**अहितप्रवृत्त्या ॥४६॥५२७॥ इति ।**

अहितप्रवृत्त्या, अहितेषु दुःखशक्त्युद्रेकवशसञ्जातास्वास्थ्यनिवर्त्तकेषु वस्तुषु मनःप्रीतिप्रदप्रमदादिषु प्रवृत्त्या चेष्टनेन ॥४६॥ अथ स्वास्थ्यस्वरूपमाह-

**स्वास्थ्यं तु निरुत्सुकतया प्रवृत्तेः ॥४७॥५२८॥ इति ।**

स्वास्थ्यमस्वास्थ्यविलक्षणं पुनः निरुत्सुकतया औत्सुक्यपरिहारेण प्रवृत्तेः सर्वकृत्येषु ॥४७॥ एवं च सति यत्सिद्धं तदाह-

**परमस्वास्थ्यहेतुत्वात् परमार्थतः स्वास्थ्यमेव ॥४८॥५२९॥ इति ।**

१. आत्मन्येवा K.॥

परमस्वास्थ्यहेतुत्वात् चित्तविप्लवपरिहारेण प्रकृष्टस्वावस्थाननिमित्तत्वात् परमार्थतस्तत्त्ववृत्त्या स्वास्थ्यमेव 'निरुत्सुकतया प्रवृत्ति'रिति सम्बध्यते, सा च भगवति केवलिनि समस्ति इति सिद्धं, यदुत न तस्य क्वचिदौत्सुक्यमिति ॥४८॥ ननु भवेऽपवर्गे चैकान्ततो निःस्पृहस्य कथं विहितेतरयोरर्थयोरस्य प्रवृत्तिनिवृत्ती स्यातामिति, उच्यते, द्रव्यत एव पूर्वसंस्कारवशात् कुलालचक्रभ्रमवत् स्याताम्। एतद् भावयन्नाह -

**भावसारे हि प्रवृत्त्यप्रवृत्ती सर्वत्र प्रधानो व्यवहारः ॥४९॥५३०॥ इति ।**

भावसारे मानसविकल्पपुरःसरे, हिशब्दः पूर्वोक्तभावनार्थः, प्रवृत्त्यप्रवृत्ती सर्वत्र[१] विहितेतरयोरर्थयोर्विषये, किमित्याह - प्रधानो भावरूपः व्यवहारो लोकाचाररूपः, इदमुक्तं भवति- यैव मनःप्रणिधानपूर्विका क्वचिदर्थे प्रवृत्तिर्निवृत्तिर्वा तामेव तात्त्विकीं तत्त्ववेदिनो वदन्ति, न पुनरन्याम्, यतोऽनाभोगादिभिः परिपूर्णश्रामण्यक्रियावन्तोऽपि अभव्यादयो न तात्त्विकश्रामण्य-क्रियावत्तया समये व्यवहृताः, तथा सम्मूर्च्छनजमत्स्यादयः

१. सर्वत्र हितेतरयो J.॥

सप्तमनरकपृथ्वीप्रायोग्यायुर्बन्धनिमित्तमहारम्भादिपापस्थानवर्त्तिनोऽपि तथाविधभावविकलत्वान्न तदायुर्बन्धं प्रति प्रत्यलीभवन्ति एवं सयोगकेवलिनोऽपि सर्वत्र निःस्पृहमनसः पूर्वसंस्काराद्विहितेतरयोरर्थयोः प्रवृत्तिनिवृत्ती कुर्वन्तोऽपि न भावतस्तद्वन्तो व्यवह्रियन्ते ॥४९॥ अत्रैवाभ्युच्चयमाह -

**प्रतीतिसिद्धश्चायं सद्योगसचेतसाम् ॥५०॥५३१॥ इति ।**

प्रतीतिसिद्धः स्वानुभवसंवेदितः, चः समुच्चये, अयं पूर्वोक्तोऽर्थः सद्योगेन शुद्धध्यानलक्षणेन ये सचेतसः सचित्तास्तेषाम्, सम्पन्नध्यानरूपामलमानसा महामुनयः स्वयमेवामुमर्थं प्रतिपद्यन्ते, न पुनरत्र परोपदेशमाकाङ्क्षन्ते इति ॥५०॥ अथ प्रस्तुतमेवाह-

**सुस्वास्थ्यं च परमानन्दः ॥५१॥५३२॥ इति ।**

निरुत्सुकप्रवृत्तिसाध्यस्वास्थ्याद् यदधिकं स्वास्थ्यं तत् सुस्वास्थ्यमुच्यते, तदेव परमानन्दो मोक्षसुखलक्षणः ॥५१॥ कुत इत्याह-

**तदन्यनिरपेक्षत्वात् ॥५२॥५३३॥ इति ।**

तस्माद् आत्मनः सकाशादन्यस्तदन्यः स्वव्यतिरिक्तः तन्निरपेक्षत्वात् ॥५२॥ नन्वन्यापेक्षा किं दुःखरूपा यदेवमुच्यते इत्याह-

**अपेक्षाया दुःखरूपत्वात् ॥५३॥५३४॥ इति ।**

प्रतीतार्थमेव ॥५३॥ एतदेव भावयति-

**अर्थान्तरप्राप्त्या हि तन्निवृत्तिर्दुःखत्वेनानिवृत्तिरेव ॥५४॥५३५॥ इति ।**

अर्थान्तरस्य इन्द्रियार्थरूपस्य प्राप्त्या लाभेन हिर्यस्मात् तन्निवृत्तिः किमित्याह-दुःखत्वेनार्थान्तरप्राप्तेरनिवृत्तिरेव दुःखस्येति ॥५४॥ अथैनां निवृत्तौ निराकुर्वन्नाह-

**न चास्यार्थान्तरावाप्तिः ॥५५॥५३६॥ इति ।**

न च न पुनरस्य सिद्धस्य अर्थान्तरावाप्तिः स्वव्यतिरिक्तभावान्तरसम्बन्धः ॥५५॥ एतदेव भावयति-

**स्वस्वभावनियतो ह्यसौ विनिवृत्तेच्छाप्रपञ्चः ॥५६॥५३७॥ इति ।**

स्वस्वभावनियतः स्वकीयस्वरूपमात्रप्रतिष्ठितः, हिर्यस्माद्, असौ भगवान् सिद्धो विनिवृत्तेच्छाप्रपञ्चः अत्यन्तनिवृत्तसर्वार्थगोचरस्पृहाप्रबन्धः ॥५६॥ आकाशेनापि सह तस्य सम्बन्धं निराकुर्वन्नाह-

**अतोऽकामत्वात् तत्स्वभावत्वान्न लोकान्तक्षेत्राप्तिराप्तिः ॥५७॥५३८॥**

अतो विनिवृत्तेच्छाप्रपञ्चत्वाद् यद् अकामत्वं निरभिलाषत्वं तस्मात् यत् तत्स्वभावत्वमर्थान्तरनिरपेक्षत्वं तस्माद् न लोकान्तक्षेत्राप्तिः सिद्धिक्षेत्रावस्थानरू[१]पा आप्तिरर्थान्तरेण सह सम्बन्धः ॥५७॥ एतदपि भावयति-

**औत्सुक्यवृद्धिर्हि लक्षणमस्याः, हानिश्च समयान्तरे ॥५८॥५३९॥ इति ।**

औत्सुक्यस्य वृद्धिः प्रकर्षः, हिर्यस्मात्, लक्षणं स्वरूपमस्या अर्थान्तरप्राप्तेः, हानिश्च औत्सुक्यस्यैव भ्रंशः समयान्तरे प्राप्तिसमयादग्रेतनसमयलक्षणे ॥५८॥ ननु किमिदमौत्सुक्यलक्षणं सिद्धे नास्ति? अत आह-

**न चैतत् तस्य भगवतः, आकालं तथावस्थितेः ॥५९॥५४०॥ इति ।**

न च नैव एतद् अर्थान्तरप्राप्तिलक्षणमनन्तरोक्तं तस्य सिद्धस्य भगवतः, आकालं सर्वमप्यागामिनं कालं यावत् तथावस्थितेः प्रथमसमयादारभ्य तथा तेनैव प्रथमसमयसम्पन्नेनैकेन निष्ठितार्थत्वलक्षणेन स्वरूपेणावस्थानात् ॥५९॥ एतदपि कुत इत्याह -

**कर्मक्षयाविशेषात् ॥६०॥५४१॥ इति ।**

कर्मक्षयस्य कात्स्न्र्येन सिद्धत्वप्रथमक्षण एव सञ्जातस्य सर्वक्षणेषु अविशेषादभेदात् ॥६०॥ एवं सति यत्सिद्धं तदाह-

**इति निरुपमसुखसिद्धिः ॥६१॥५४२॥ इति ।**

इति एवमौत्सुक्यात्यन्तिकनिवृत्तेर्निरुपमसुखसिद्धिः सिद्धानां श्रद्धेया ॥६१॥ अथोपसंहरन्नाह-

**सद्ध्यानवह्निना जीवो दग्ध्वा कर्मेन्धनं भुवि। सद्ब्रह्मादिपदैर्गीतं स याति परमं पदम् ॥४६॥ इति।**

सद्ध्यानवह्निना शुक्लध्यानलक्षणज्वलज्ज्वलनेन करणभूतेन जीवो भव्यजन्तुविशेषो, दग्ध्वा प्रलयमानीय कर्मेन्धनं भवोपग्राहिकर्मलक्षणं भुवि मनुष्यक्षेत्रलक्षणायाम्, किमित्याह-सद्ब्रह्मादिपदैः, सद्भिः सुन्दरैः ब्रह्मादिपदैः ब्रह्मलोकान्तादिभिर्ध्वनिभिर्गीतं शब्दितं स आराधितशुद्धसाधुधर्मो जीवो याति प्रतिपद्यते परमं पदम् इति ॥१॥ न च वक्तव्यम्-अकर्मणः कथं गतिरित्याह-

**पूर्वावेधवशादेव तत्स्वभावत्वतस्तथा। अनन्तवीर्ययुक्तत्वात् समयेनानुगुण्यतः ॥४७॥**

**इति।**

पूर्वाविधवशात्, पूर्वं संसारावस्थायां य आवेध आवेशो गमनस्य तस्य वशः, तस्मात्, एवशब्दोऽवधारणे, तत्स्वभावत्वतः, स ऊर्ध्वगमनलक्षणो बन्धनमुक्तत्वेनैरण्डबीजस्येव स्वभावो यस्य स तथा, तद्भावस्तत्त्वम्, तस्मात्, तथेति हेत्वन्तरसमुच्चये, अनन्तवीर्ययुक्तत्वाद् अपारसामर्थ्यसम्पन्नत्वात् समयेनैकेन आनुगुण्यतः शैलेश्यवस्थावष्टब्ध-क्षेत्रमपेक्ष्य समश्रेणितया, परमपदं यातीत्यनुवर्त्तत इति ॥२॥

**स तत्र दुःखविरहादत्यन्तसुखसङ्गतः । तिष्ठत्ययोगो योगीन्द्रवन्द्यस्त्रिजगतीश्वरः ॥४८॥**

**इति ।**

**॥ इ[1]ति धर्मबिन्दौ (शेष)धर्मफलविधिरष्टमोऽध्यायः समाप्तः॥**

**॥ कृतिराचार्य (श्री) हरिभद्रस्येति ॥ मङ्गलं महाश्रीः ॥**

स अनन्तरोक्तो जीवस्तत्र सिद्धिक्षेत्रे दुःखविरहात् शारीरमानसबाधावैधुर्यात्, किमित्याह- अत्यन्तसुखसङ्गत आत्यन्तिकैकान्तिकशर्मसागरोदरमध्यमग्नस्तिष्ठति अयोगो मनो-वाक्-कायव्यापारविकलः योगीन्द्रवन्द्यो योगिप्रधानमाननीयः, अत एव त्रिजगतीश्वरः द्रव्य-भावापेक्षया सर्वलोकोपरिभागवर्त्तितया जगत्त्रयपरमेश्वर इति ॥२॥

१. पाठोऽयं K. १ मध्ये एव वर्तते, J.K.L. मध्ये नास्ति। इति धर्मबिन्दौ शेषफलप्रदर्शनविधिरष्टमोऽध्यायः D. । J. १ मध्ये त्वत्रेदृशः पाठः-इति धर्मबिन्दौ शेषफलप्रदर्शने अष्टमोऽध्यायः समाप्तः। समाप्तं चेदं धर्म-बिन्द्वाख्यं प्रकरणम्। कृतिराचार्यश्रीहरिभद्रस्य॥ मङ्गलं महाश्रीः ॥ -J.१ ॥

इति श्रीमुनिचन्द्रसूरिविरचितायां धर्मबिन्दुप्रकरणवृत्तौ विशेषतो धर्मफलविधिरष्टमोऽध्यायः समाप्तः॥

नाविःकर्त्तुमुदारतां निजधियो वाचां न वा चातुरीमन्येनापि च कारणेन न कृता वृत्तिर्मयाऽसौ परम् ।
तत्त्वाभ्यासरसादुपात्तसुकृतोऽन्यत्रापि जन्मन्यहं सर्वादीनवहानितोऽमलमना भूयासमुच्चैरिति ॥१॥

---

॥ इति श्रीमुनिचन्द्रसूरिविरचिता धर्मबिन्दुप्रकरण[१]वृत्तिः समाप्ता ॥

१. वृत्तिः समाप्तः। ग्रन्थाग्रं सहस्र ३०००। संवत् ११८१ वैशाख वदि १५... पारसदेवेन लिखितमिति... लेखकपाठकयोः शुभं भूयात् ॥-K.। वृत्तिः समाप्तः ।।छ॥
प्रत्यक्षरं ग्रन्थ ३००० ॥-J.। वृत्तिः समाप्ताः ॥ प्रत्यक्षरं निरूप्यास्या ग्रन्थमानं विनिश्चितम्। अनुष्टुभां सहस्राणि त्रीणि पूर्णानि बुध्यताम् ॥ग्रन्थाग्रम् ३००० । शुभं भवत्सर्वसङ्घस्य ॥-L.॥